तिलकनामानि	६–७	पू०	६
कोविदार–काञ्चनारनामानि	७–८		७
चम्पकनामानि	९–१०	पू०	८
नागकेसरनामानि	१०–११		९
नागकेसरपुष्पचूर्णनामानि	१२	पू०	९
कदम्बनामानि	१२–१३	पू०	९
धूलीकदम्बनामानि	१३		१०
धाराकदम्बनामानि	१४	पू०	१०
नीप[कदम्बविशेष]नामानि	१४–१५	पू०	१०
कुटजनामानि	१५–१६		११
कुटजफलनामानि	१७	पू०	१२
शिरीषनामानि	१७–१८		१२
पाटली-पाटलानामानि	१९		१३
श्वेतपाटलानामानि	२०		१४
अगरुनामानि	२१		१४
मल्लिगन्धागरुनामानि	२२	प्र०	१५
कृष्णागरुनामानि	२२	द्वि०	१५
श्रीखण्ड-चन्दननामानि	२२–२३		१५
बर्बरकचन्दननामानि	२४	पू०	१६
[1]रक्तचन्दननामानि	२४–२५	पू०	१६
[2]कुचन्दननामानि	२५–२६	पू०	१७
[3]द्रुमोत्पलनामानि	२६		१७
निर्गन्धद्रुमोत्पलनामानि	२७	पू०	१७
पुन्नागनामानि	२७–२८	पू०	१८
अगस्त्यनामानि	२८		१८
करवीरनामानि	२९		१८

विषयः	श्लोकः		पृष्ठम्
रक्तकरवीरनामानि	३०	पू०	१९
तमालनामानि	३०		१९
तमालपत्रनामानि	३१	पू०	१९
[4]सूक्ष्मैलानामानि	३१–३२	पू०	२०
[5]स्थूलैलानामानि	३२–३३	पू०	२०
कर्पूरनामानि	३३–३४	पू०	२१
[6]कक्कोलकनामानि	३४–३५	पू०	२१
लवङ्गनामानि	३५–३६	पू०	२२
नलिकानामानि	३६–३७	पू०	२२
अतिमुक्तनामानि	३७–३८	पू०	२३
[7]पिप्पलनामानि	३८–३९	पू०	२४
[8]गर्दभाण्डनामानि	३९–४०		२५
पर्कटीनामानि	४१	पू०	२५
वटनामानि	४१–४२	पू०	२६
उदुम्बरनामानि	४२–४३	पू०	२६
[9]काकोदुम्बरिकानामानि	४३–४४	पू०	२७
राजादननामानि	४४–४५	पू०	२७
[10]पियालनामानि	४५–४६	पू०	२८
आम्रातकनामानि	४६–४७		२८
अर्कनामानि	४८		२९
राजार्कनामानि	४८–४९	पू०	३०
[11]स्नुहीनामानि	४९–५०	पू०	३०
करमर्दनामानि	५०–५१	पू०	३१
जम्बीरनामानि	५१–५२	पू०	३१
[12]करुणनामानि	५२		३२
बीजपूरनामानि	५३–५४		३२
मातुलुङ्गी[बीजपूरविशेष]नामानि	५५		३३
अम्लीकानामानि	५६		३३
[13]वृक्षाम्लनामानि	५७		३४
[14]अम्लवेतसनामानि	५८–५९	पू०	३४

१ रतांजणी ॥ २ पतंग ॥ ३ कणयर ॥ ४ एलची ॥ ५ बृहदेला, कंकोलीफल ॥ ६ कंकोल ७ पीपल ॥ ८ पींपरी ॥ ९ कालुम्बरी ॥ १० चारु। ११ थोहरी ॥ ९ १२ करणा ॥ १३ तिन्तिडीक १४ अम्लवेतसवृक्षनिर्यासः ॥

विषयः	श्लोकः		पृष्ठम्
हीनोत्तमाम्लवेतसनामानि	५९–६०	पू०	३५
कपित्थनामानि	६०–६१		३५
[1]अश्मन्तकनामानि	६२		३६
नारङ्गनामानि	६३		३६
खदिरनामानि	६४		३७
श्वेतखदिरनामानि	६५		३७
[2]विट्खदिरनामानि	६६		३८
शाल्मलिनामानि	६७-६८	प्र०	३८
शाल्मलिनिर्यासनामानि	६८	द्वि०	३९
[3]कुशाल्मलिनामानि	६८		३९
शिंशपानामानि	६९		३९
शिंशपाविशेषनामानि	६९	च०	४०
[4]कुशिंशपानामानि	७०	पू०	४०
बदरीनामानि	७०–७१		४०
[5]शमीनामानि	७२–७३		४१
[6]शमीफलनामानि	७३	च०	४१
[7]इङ्गुदीनामानि	७४		४२
गुग्गुलुनामानि	७५–७६	पू०	४३
पारिभद्रनामानि	७६		४४
करीरनामानि	७७		४४
विकङ्कतनामानि	७८		४४
बिल्वनामानि	७९–८०	पू०	४५
हरीतकीनामानि	८०–८१	पू०	४६
बिभीतकनामानि	८१–८२		४७
आमलकीनामानि	८३		४८
अरणिनामानि	८४–८५	पू०	४८
अरलुनामानि	८५–८७	पू०	४९
शिग्रुनामानि	८७–८८		५०
श्वेतशिग्रुनामानि	८९	पू०	५१
रक्तशिग्रुनामानि	८९	पू०	५१
तिनिशनामानि	८९–९०		५१
पलाशनामानि	९१–९२	पू०	५२
धवनामानि	९२–९३	पू०	५२
श्रीपर्णीनामानि	९३–९५	पू०	५३
सप्तच्छदनामानि	९५–९७	पू०	५४
[8]आरग्वधनामानि	९७–९९	पू०	५५
बीजकनामानि	९९–१०१	पू०	५६
बीजकभेदनामानि	१०१		५७
[9]अश्वकर्णनामानि	१०२		५७
[10]देवसालनामानि	१०३		५८
शाकनामानि	१०४-५	पू०	५८
धर्मणनामानि	१०५-६		५९
सिल्हकनामानि	१०७	प्र०	६०
कोलिपत्रनामानि	१०७	द्वि०	६०
महापत्रनामानि	१०७		६०
सरलनामानि	१०८	पू०	६०
देवदारुनामानि	१०८–१०	पू०	६१
मधूकनामानि	११०–११		६२
[11]जलमधूकनामानि	११२		६२
तिन्दुकनामानि	११३		६३
तिन्दुकविशेषनामानि	११४		६३
रोध्रनामानि	११५	प्र०	६४
श्वेतलोध्रनामानि	११५		६४
रक्तलोध्रनामानि	११६–१७	प्र०	६४
कृष्णलोध्रनामानि	११७	द्वि०	६५
भूर्जनामानि	११७–१८	पू०	६५
[12]श्लेष्मातकनामानि	११८–१९		६६
लकुचनामानि	१२०	प्र०	६७
पनसनामानि	१२०	द्वि० तृ०	६७
पनसफलनामानि	१२०	च०	६७
आम्रनामानि	१२१–२२	पू०	६८
आम्रविशेषनामानि	१२२		६८
क्षुद्राम्रनामानि	१२३–२४	प्र०	६८

१ आसद्रा ॥ २ अरंजु ॥ ३ शाल्मलिविशेष ॥ ४ शिंशपाविशेष ॥ ५ खेजडी ॥ ६ सांगर ॥ ७ हिंगोटु ॥ ८ कांक ॥ ९ किरमालउ ॥ १० सागु ॥ ११ अर्जुन ॥ १२ महाडोलु ॥ १३ गुंदी ॥

विषयः	श्लोकः		पृष्ठम्
जम्बूनामानि	१२४–२५	प्र०	६९
जम्बूविशेषनामानि	१२५		७०
[1]मदननामानि	१२६–२७		७०
कुब्जकनामानि	१२८ पू०		७१
[2]निचुलनामानि	१२८–२९	पू०	७१
वेतसनामानि	१२९–३०	पू०	७२
अम्बुवेतसनामानि	१३०–३१	पू०	७२
वरुणनामानि	१३१–३२		७३
अङ्कोठनामानि	१३३		७४
[3]भल्लातकनामानि	१३४–३५	पू०	७४
अरिष्टनामानि	१३५–३६	पू०	७५
निबम्बनामानि	१३६–३७		७६
[4]महानिम्बनामानि	१३८		७७
पीलुनामानि	१३९–४०	पू०	७७
[5]गिरिपीलुनामानि	१३९–४०	पू०	७७
पारापतनामानि	१४०–४१	प्र०	७८
महापारापतनामानि	१४१	द्वि०तृ०	७८
रुद्राक्षनामानि	१४१	च०	७८
चतुर्मुखरुद्राक्षनामानि	१४२	प्र०	७९
द्विमुखरुद्राक्षनामानि	१४२	द्वि०	७९
षण्मुखरुद्राक्षनामानि	१४२	तृ०	७९
पञ्चमुखरुद्राक्षनामानि	१४२	च०	७९
एकमुखरुद्राक्षनामानि	१४३	पू०	७९
पुत्रञ्जीवनामानि	१४३		७९
करञ्जनामानि	१४४–४५	पू०	७९
षड्ग्रन्थिककरञ्जनामानि	१४५		८०
मर्कटीकरञ्जनामानि	१४६	पू०	८०
अङ्गारवल्लीकरञ्जनामानि	१४६		८०
[1]रोहीतकनामानि	१४७		८१
[2]कट्फलनामानि	१४८		८१
दाडिमनामानि	१४९	पू०	८२
ओड्रपुष्पनामानि	१४९		८२
धातकीनामानि	१५०		८२
सल्लकीनामानि	१५१–५२	पू०	८३
एरण्डनामानि	१५२–५४		८४
किम्पाकनामानि	१५५	पू०	८५
काम्पिल्यकनामानि	१५५–५६	पू०	८५
कतकनामानि	१५६		८६
कर्पासीनामानि	१५७	पू०	८६
वन्यकर्पासीनामानि	१५७		८६
वन्दानामानि	१५८		८७
वन्दाविशेषनामानि	१५९	पू०	८७
आटरूषनामानि	१५९–६०	पू०	८७
तुम्बुरुनामानि	१६०–६१	पू०	८८
कदलिनामानि	१६१–६२	पू०	८९
तगरनामानि	१६२		८९
[4]तूलनामानि	१६३		९०
मुष्ककनामानि	१६४		९०
वंशनामानि	१६५		९१
[5]गाङ्गेरुकीनामानि	१६६		९१
दारुहरिद्रानामानि	१६७–६८	पू०	९२
[6]ग्रन्थिपर्णनामानि	१६८–६९		९३
[7]स्पृक्कानामानि	१७०–७१		९३
विडङ्गनामानि	१७२		९५
इन्द्राक्षनामानि	१७३		९५
ऋद्धि–सिद्धिनामानि	१७४		९६
पद्मकनामानि	१७५		९६
कङ्कुष्ठनामानि	१७६		९७
परूषकनामानि	१७७		९७
खर्जूरनामानि	१७८	पू०	९८
महाखर्जूरिकानामानि	१७८		९८
ताडनामानि	१७९	पू०	९९
नालीकेरनामानि	१७९–८०	पू०	९९
पूगनामानि	१८०–८१	पू०	१००

१ मयणहल ॥ २ इजर, वेतेसविशेष ॥ ३ भीलामा ॥ ४ बकायणि ॥ ५ अखोड ॥ ६ रोहीडउ ॥ ७ कायफल ॥ ८ अरडूसा ॥ ९ पद्मनस ॥ १० गांगेटी ॥ ११ थूणीयउ ॥ १२ पीक ॥

विषयः	श्लोकः	पृष्ठम्
पूगफलनामानि	१८१	प्र० १००
चिक्कपूगनामानि	१८१	पू० १००
हिन्तालनामानि	१८१	१०१
तालीनामानि	१८२	पू० १०१
केतकनामानि	१८२	१०१
तृणजातिनामानि	१८३	१०१
सिन्दुवार-निर्गुण्डीनामानि	१८४	१०३
नीलनिर्गुण्डीनामानि	१८५	पू० १०३
श्वेतनिर्गुण्डीनामानि	१८५	१०४
शेफालिकानामानि	१८६	१०४
शुक्लशेफालिकानामानि	१८७	पू० १०४
प्रियङ्गुनामानि	१८७-८८	१०४
मधुयष्टीनामानि	१८९	१०६
अश्वगन्धानामानि	१९०	१०६
मेषशृङ्गीनामानि	१९१	पू० १०७
मेषशृङ्गीविशेषनामानि	१९१-९२	पू० १०७
कर्कटशृङ्गीनामानि	१९१-९३	पू० १०७
[1]निर्दिग्धिकानामानि	१९३-९४	पू० १०८
[2]बृहन्निर्दिग्धिकानामानि	१९४-९५	पू० १०९
विदारीनामानि	१९५-९६	पू० १०९
क्षीरविदारीनामानि	१९६-९७	११०
पृष्णिपर्णीनामानि	१९८-९९	पू० ११०
गोक्षुरनामानि	१९९-२०१	पू० १११
दन्तीनामानि	२०१-२	पू० ११२
नागदन्तीनामानि	२०२-३	११३
[3]अपामार्गनामानि	२०४-५	११३
आर्द्रकनामानि	२०६	११४
[4]पुनर्नवानामानि	२०७-८	प्र० ११५
[5]पुनर्नवाविशेषनामानि	२०८	११५
[6]ज्योतिष्मतीनामानि	२०९	११६
माषपर्णीनामानि	२१०	११६
मुद्गपर्णीनामानि	२११	११७
भूम्यामलकीनामानि	२१२	११८
[7]हरिद्रानामानि	२१३-१४	पू० ११८
प्रपुनाटनामानि	२१४-१५	पू० ११९
[8]मुण्डीनामानि	२१५-१६	पू० ११९
महामुण्डीनामानि	२१६-१७	पू० १२०
[9]बाकुचीनामानि	२१७-१८	१२०
रास्नानामानि	२१९	१२१
नाकुलीनामानि	२२० पू०	१२१
गन्धनाकुलीनामानि	२२०-२१	पू० १२२
कुठेरकनामानि	२२१-२२	प्र० १२२
कुठेरकविशेषनामानि	२२२ द्वि०	तृ० १२३
कृष्णकुठेरकनामानि	२२२-२३	पू० १२३
तुलसीनामानि	२२३-२४	पू० १२३
फणिज्जकनामानि	२२४-२५	पू० १२४
त्रायमाणानामानि	२२५-२६	१२४
[10]यवासकनामानि	२२७-२८	१२५
किराततिक्तनामानि	२२९	१२६
[11]कुष्ठनामानि	२३०	१२६
वालकनामानि	२३१	१२७
शटीनामानि	२३२	१२८
[12]एलावालुकनामानि	२३३	१२८
कुङ्कुमनामानि	२३४-३५	पू० १२९
जातिनामानि	२३५-३६	पू० १२९
जातिकलिकानामानि	२३६	१३०
जातिफलनामानि	२३७	१३०
[13]यूथिकानामानि	२३८-३९	प्र० १३१
[14]पीतयूथिकानामानि	२३९	द्वि० १३१
कुन्दनामानि	२३९-४०	पू० १३२
नवमालिकानामानि	२४०-४१	१३२
[15]मल्लिकानामानि	२४२	१३३
वार्षिकीमल्लिकानामानि	२४३	१३३
[16]कुमारीनामानि	२४४	१३४
अमिलातनामानि	२४५	१३४
सैरेयकनामानि	२४६	पू० १३५

१ रींगणी ॥ २ वृद्धरींगणी ॥ ३ आझाझाडा ॥ ४ साटहडा ॥ ५ साटहडी ॥ ६ मालकांगुणी ॥ ७ हलद्र ॥८ मोडथेरी ॥९ बावची ।।१० धमासउ ॥ ११उपलोठ ॥ १२ एलीयउ ॥ १३ जूही ॥ १४ सुवर्णजूही ॥ १५ केवडी ॥ १६ सेवंत्री ।

विषयः	श्लोकः	पृष्ठम्
रक्तसैरेयकनामानि	२४६ तृ०	१३५
पीतसैरेयकनामानि	२४६ च०	१३५
नीलसैरेयकनामानि	२४७ पू०	१३५
किङ्किरातनामानि	२४७	१३६
चित्रकनामानि	२४८	१३६
वासन्तीनामानि	२४९	१३७
नीलीनामानि	२५०–५१ पू०	१३७
दमननामानि	२५१–५२ पू०	१३८
धत्तूरनामानि	२५२-५३ पू०	१३९
धत्तूरफलनामानि	२५३	१३९
[1]शङ्खपुष्पीनामानि	१५४–५५ पू०	१३९
कर्चूरनामानि	२५५	१४०
अजमोदानामानि	२५६–५७ पू०	१४०
यवानीनामानि	२५७	१४१
सहदेवानामानि	२५८ पू०	१४१
श्वेतसहदेवानामानि	२५८ तृ०	१४२
रक्तसहदेवानामानि	२५८ च०	१४२
पर्पटकनामानि	२५९ पू०	१४२
गोजिह्वानामानि	२५९	१४२
बलानामानि	२६०–६१ पू०	१४३
महाबलानामानि	२६१–६३	१४३
मुसलीनामानि	२६४	१४४
हिङ्गुनामानि	२६५	१४५
हिङ्गुपत्रीनामानि	२६६–६७ पू०	१४५
काकजङ्घानामानि	२६७–६८ पू०	१४६
काकनासानामानि	२६८–६९ पू०	१४६
पाषाणभेदनामानि	२६९	१४७
हयुषानामानि	२७० प्र०	१४७
विगन्धहयुषानामानि	२७० द्वि०	१४७
हयूषाविशेषनामानि	२७०	१४८
घण्टारवानामानि	२७१	१४८
शणनामानि	२७२	१४८
कुसुम्भनामानि	२७३ पू०	१४९

विषयः	श्लोकः	पृष्ठम्
शालपर्णीनामानि	२७३–७४ पू०	१४९
भार्गीनामानि	२७४–७६ पू०	१५०
[2]नाकुलीनामानि	२७६–७७ पू०	१५१
तेजस्विनीनामानि	२७७–७८ पू०	१५१
[3]मिस्रेयानामामि	२७८–७९ पू०	१५१
[4]पथिकानामानि	२७९–८० पू०	१५२
[5]मांसीनामानि	२८०–८१ पू०	१५३
गन्धमांसीनामानि	२८१–८२ पू०	१५३
[6]मुरानामानि	२८२–८३ पू०	१५४
[7]प्रपुण्डरीकनामानि	२८३–८४ पू०	१५५
[8]जतूकानामानि	२८४–८५ पू०	१५५
मांसरोहानामानि	२८५	१५६
[9]रक्तपादीनामानि	२८६	१५६
[10]रक्तपादीविशेषनामानि	२८७	१५६
जलपिप्पलीनामानि	२८८	१५७
[11]शिवमल्लीनामानि	२८९	१५७
अतिविषानामानि	२९०	१५८
मेदानामानि	२९१पू०	१५८
महामेदानामानि	२९१	५८१
गुञ्जानामानि	२९२–९३	१६०
पाठानामानि	२९४–९५ पू०	१६१
शतावरीनामानि	२९५–९७	१६१
कटुकानामानि	२९८–९९	१६२
कपिकच्छूनामानि	३००–१	१६३
मञ्जिष्ठानामानि	३०२–३ पू०	१६४
मरिचनामानि	३०३–४ पू०	१६५
पिप्पलीनामानि	३०४–५ पू०	१६५
पिप्पलीमूलनामानि	३०५–६ पू०	१६६
चविकानामानि	३०६	१६६
[12]चविकाफलनामानि	३०७पू०	१६७
गिरिकर्णीनामानि	३०७	१६७
श्वेतगिरिकर्णीनामानि	३०८ त्रि०	१६७
कृष्णगिरिकर्णीनामानि	३०८–९ पू०	१६७

१ शंखाहूली ॥ २ जवासी ॥ ३ व्रीहाली ॥४ तालीसपत्र ॥५ छड ॥६ एकांगी ॥७ पद्म ॥ ८ जंतुवार ॥ ९ खयरी ॥ १० हंसपदी ॥ ११ बूअ ॥१२ गजपीपली ॥

विषयः	श्लोकः	पृष्ठम्
इन्द्रवारुणी	३०९–१० पू०	१६८
इन्द्रवारुणीविशेषनामानि	३१०–११ पू०	१६८
वचानामानि	३११–१२ पू०	१६९
श्वेतवचानामानि	३१२	१६९
[1]शौरिवानामानि	३१३–१४ प्र०	१७०
[2]कृष्णशारिवानामानि	३१४	१७०
[3]मूर्वानामानि	३१५–१६	१७१
[4]लाङ्गलीनामानि	३१७	१७१
गुडूचीनामानि	३१८-१९	१७२
[5]देवताडनामानि	३२०	१७३
कोशातकीनामानि	३२१–२२	१७३
हस्तिकोशातकीनामानि	३२३पू०	१७४
क्षीरिणीनामानि	३२३–२४	१७४
शङ्खिनीनामानि	३२५	१७५
[6]आखुपर्णीनामानि	३२६	१७५
[7]पद्मिनीनामानि	३२७	१७६
[8]कमलनामानि	३२८–२९	१७७
सितकमलनामानि	३३०प्र०	१७८
रक्तकमलनामानि	३३० द्वि०तृ०	१७८
कैरविणीनामानि	३३०	१७८
उत्पलनामानि	३३१ पू०	१७८
उत्पलविशेषनामानि	३३१	१७८
नीलोत्पलनामानि	३३२प्र०	१७९
रक्तोत्पलनामानि	३३२द्वि०	१७९
सौगन्धिकनामानि	३३२तृ०	१७९
बीजकोशनामानि	३३२–३३ प्र०	१७९
पद्मनालनामानि	३३३पू०	१७९
किञ्जल्कनामानि	३३३तृ०	१८०
नव्यदलनामानि	३३३	१८०
पद्मकन्दनामानि	३४४ प्र०	१८०
उत्पलकन्दनामानि	३३३ द्वि०	१८०
पद्मबीजनामानि	३३४	१८१
वारिपर्णीनामानि	३३५ पू०	१८१

विषयः	श्लोकः	पृष्ठम्
जलशेवालनामानि	३३५	१८१
शतपुष्पानामानि	३३६	१८२
[9]जीरकनामानि	३३७ पू०	१८२
कृष्णजीरकनामानि	३३७–३८ पू०	१८३
रसोन–लशुननामानि	३३८–३९ प्र०	१८३
लशुनविशेषनामानि	३३९पू०	१८४
पलाण्डुनामानि	३३९–४० प्र०	१८४
नीलपलाण्डुनामानि	३४० पू०	१८४
[10]सप्तलानामानि	३४०–४१ पू०	१८५
प्रसारणीनामानि	३४१–४२	१८५
ब्राह्मीनामानि	३४३	१८६
सूरणकन्दनामानि	३४४पू०	१८६
वृद्धदारकनामानि	३४४–४५ पू०	१८६
सुवर्चलानामानि	३४५–४६ पू०	१८७
[11]भृङ्गराजनामानि	३४६–४७ पू०	१८७
[12]कासमर्दनामानि	३४७	१८८
वास्तुकनामानि	३४८	१८८
पालङ्कीनामानि	३४९पू०	१८८
[13]जीवन्तीनामानि	३४९–५० पू०	१८९
[14]अम्ललोणिकानामानि	३५०–५१	१८९
[15]तण्डुलीयनामानि	३५२	१९०
शमठनामानि	३५३	१९०
स्थलशमठनामानि	३५४ पू०	१९१
काकमाचीनामानि	३५४	१९१
श्वीहस्तिनीनामानि	३५५ पू०	१९१
[16]सुनिषण्णनामानि	३५५–५६ पू०	१९१
मूलकनामानि	३५६–५७ पू०	१९२
[17]चाणक्यमूलकनामानि	३५७–५८ पू०	१९२
हिमलोचीनामानि	३५८	१९२
कलम्बीनामानि	३५९ पू०	१९३
[18]कारवेल्लनामानि	३५९	१९३

१ उत्पलशारिवा ॥ २ चन्दनशारिवा ॥ ३ पोलउनी ॥ ४ राडागारी ॥ ५ देवदाली ॥६ उंदिरकनी । ७ पोयणी ॥८ श्वेतकमल ॥९ श्वेतजीरा ॥ १० साथरि ॥ ११ भांगरउ ॥१२ कासंदड ॥ १३ दोडी ॥१४ आंबउत्री ॥१५ तंदुलेजा ॥ १६ खडकूतिर ॥१७ वृहन्मूलक ॥१८ कारेली ॥

विषयः	श्लोकः		पृष्ठम्
पटोलनामानि	३६०		१९३
[1] कर्कोटनामानि	३६१	पू०	१९४
कूष्माण्डनामानि	३६१	तृ०	१९४
कालिङ्गीनामानि	३६१		१९४
तुम्बीनामानि	३६२		१९४
चिर्भिटीनामानि	३६३–६४	प्र०	१९५
चिर्भिटीफलनामानि	३६४	द्वि०	१९५
कूर्चकनामानि	३६४–६५		१९५
पुष्करमूलनामानि	३६६		१९६
वस्तगन्धानामानि	३६७		१९६
बिम्बीनामानि	३६८		१९७
रौहिषनामानि	३६९		१९८
[2] भूस्तृणनामानि	३७०		१९८
दर्भनामानि	३७१		१९९
काशनामानि	३७२		१९९
उलपनामानि	३७३	पू०	२००
इक्षुनामानि	३७३		२००
इक्षुभेदनामानि	३७४	पू०	२००
नलनामानि	३७४–७५	पू०	२०१
नलीनामानि	३७५		२०२
शरनामानि	३७६		२०२
मुञ्जनामानि	३७७	पू०	२०२
बालतृणनामानि	३७७		२०२
तृणनामानि	३७८	प्र०	२०३
घासनामानि	३७८	द्वि०	२०३
दूर्वानामानि	३७८–७९	पू०	२०३
श्वेतदूर्वानामानि	३७९–८०	पू०	२०४
गण्डदूर्वानामानि	३८०		२०४
मुस्तानामानि	३८१		२०४
[3] कुटन्नटनामानि	३८२–८३		२०५
वीरणनामानि	३८४	पू०	२०६
[4] वीरणमूलनामानि	३८४		२०६
लामज्जकनामानि	३८५	पू०	२०६

विषयः	श्लोकः		पृष्ठम्
धान्यैकार्थिकनामानि	३८६	पू०	२०८
आशुवीहिनामानि	३८६	तृ०	२०८
षष्टिकनामानि	३८६		२०८
शालिनामानि	३८७	प्र०	२०९
कलमनामानि	३८७	द्वि०	२०९
रक्तशालिनामानि	३८७	तृ०	२०९
महाशालिनामानि	३८७		२०९
यवनामानि	३८८	प्र०	२१०
नीलयवनामानि	३८८	द्वि०	२१०
मसूरनामानि	३८८	तृ०	२१०
कलायनामानि	३८८–८९	प्र०	२१०
चणकनामानि	३८९	द्वि०	२११
माषनामानि	३८९		२११
मुद्गनामानि	३९०	पू०	२११
पीतमुद्गनामानि	३९०		२११
कृष्णमुद्गनामानि	३९१	पू०	२११
वनमुद्गनामानि	३९१–९२	प्र०	२१२
[5] राजमुद्गनामानि	३९२–	द्वि०	२१२
गोधूमनामानि	३९२	तृ०	२१२
वल्लनामानि	३९२		२१३
कुलत्थनामानि	३९३	प्र०	२१३
कुलत्थिकानामानि	३९३	द्व०	२१३
तूवरीनामानि	३९३	तृ०	२१३
कुल्माषनामानि	३९३		२१४
नीवारनामानि	३९४	प्र०	२१४
श्यामाकनामानि	३९४	द्वि०	२१४
कङ्गुनामानि	३९४		२१४
कृष्णकङ्गुनामानि	३९५	प्र०	२१५
रक्तकङ्गुनामानि	३९५प्र०		२१५
सितकङ्गुनामानि	३९५	द्वि०	२१५
पीतकङ्गुनामानि	३९५	तृ०	२१५
कोद्रवनामानि	३९५		२१५
चीनकनामानि	३९६	प्र०	२१५

१ कंकोडा ॥ २ गन्धतृण ॥ ३ काकरडूळे ॥ ४ उशीर ॥ ५ मोठ ॥

विषयः	श्लोकः		पृष्ठम्
[1]यवनालनामानि	३९६		२१६
शणनामानि	३९७	प्र०	२१६
अतसीनामानि	३९७	द्वि०	२१६
गवेधुकानामानि	३९७	तृ०	२१६
[2]वन्यतिलनामानि	३९७		२१७
[3]षष्ठतिलनामानि	३९८	प्र०	२१७
सर्षपनामानि	३९७	द्वि०तृ०	२१७
श्वेतसर्षपनामानि	३९८		२१८
[4]राजिकानामानि	३९९		२१७
शमीधान्यनामानि	४००	प्र०	२१८
शूकधान्यनामानि	४००	द्वि०	२१८
सस्यशूकनामानि	४००	तृ०	२१९
कणिशनामानि	४००		२१९
स्तम्बनामानि	४०१	प्र०	२१९
नालनामानि	४०१	द्वि०	२१९
अफलनालनामानि	४०१	तृ०	२१९
धान्यत्वगूनामानि	४०१	तृ०	२२०
बुसनामानि	४०१		२२०

१ प्रथमं परिशिष्टम्
हेमचन्द्रीयनिघण्टुशेषमूलग्रन्थस्य पाठभेदाः २२१

२ द्वितीयं परिशिष्टम्
निघण्टुशेषान्तर्गतानां शब्दानां तल्लिङ्ग-तदर्थ-निर्देशपूर्वकमकारादिवर्णक्रमेणानुक्रमणिका २३५

३ तृतीयं परिशिष्टम्
निघण्टुशेषटीकाकृन्निर्दिष्टलोकभाषारूढ-नाम्नां संस्कृतभाषारूढान्येकार्थिकानि २९५

४ चतुर्थं परिशिष्टम्
निघण्टुशेषटीकाकृन्निर्दिष्टमूलशब्द-भाषार्थानां मूलसूत्रात्मक-पु० आदर्शो-ल्लिखितभाषार्थैः सह तुलना ३२३

५ पञ्चमं परिशिष्टम्
निघण्टुशेषटीकायां टीकाकृतो दृष्टानामवतरणानामकारादिवर्णक्रमेणानुक्रमणिका ३३०

६ षष्ठं परिशिष्टम्
निघण्टुशेषटीकान्तर्निर्दिष्टानां ग्रन्थकृन्नाम्नामकारादिक्रमः ३४७

७ सप्तमं परिशिष्टम्
निघण्टुशेषटीकान्तर्निर्दिष्टानां ग्रन्थनाम्नामकारादिक्रमः ३४८

८ अष्टमं परिशिष्टम्
निघण्टुशेषटीकायां टीकाकृतोद्धृतानां धन्वन्तरिनिघण्टुश्लोकानां आनन्दाश्रमग्रन्थमालामुद्रितधन्वन्तरिनिघण्टुश्लोकपाठेन सह तुलना ३४९

---

१ जुवार ।। २ श्यामतिल ।। ३ श्वेततिल ।। ४ कृष्णसर्षप राजसर्षप ।।

शुद्धिपत्रम् ।

पृष्ठम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
१	१८	–प्रकाराःपराः	प्रकाराः परा–
४	शीर्षके	सटीकेनि घण्टु–	सटीके निघण्टु–
१५	२६	–पणिक–	–पर्णिक–
१६	१	पुंक्लीब–	पुं-क्लीब–
१६	३	रभुङ्क	''रभुङ्
१६	४	''पदि—	''पदि–
१९	७	आह च—	आह च— [करवीरोऽश्वहाऽश्वघ्नो हयमारोऽश्वमारकः ।]
२०	४	छदम् ।	छदम् । [रामं तापसजं वासो गोपनं वस्त्रमंशुकम् ॥]
२७	२७	फलयु०	फ़लयू०
३०	२	–पुष्पी	–पुँष्पी
३९	४	–जिविका	–जीविका
४३	३	भल्लकी वृक्षः	भल्लुकीवृक्षः
४४	२४	क[२]इर'	[२]'कइर'
४६	१३	भु(भ)वने	भवने
४७	६	संवर्तकः	संवर्तकः
४७	२६	बहेडा'	'बहेडा'
५३	२३	२	रे
५४	१०	–त्वग	–त्वग्
५५	८	–पत्रो युग्मपत्रोऽबहु–	–पत्रोऽयुग्मपत्रो बहु–
५६	४	–शम्बी	–शिम्बी
५७	१	पतीसालः	पीतसालः
६१	४	–महा देव–	–महा-देव–
६१	१४	इदन्द्रुमः स्वर्ग–	इन्द्रद्रुमः स्वर्ग–
७५	२८	त्रिबु	त्रिषु
७७	१४	गुलमारि-	गुल्मारि–
८१	२०	कैडर्या	कैडर्यो
८४	२९	०नि	नि०
८८	१२	-माताऽट	–माताऽऽट–
९१	१	ङः	ङः
९१	२९	–स्वाङ्गवे–	–स्वा गवे–
९६	९	मङ्गलं	मङ्गलं[१]
९६	२४	पीतैरक्तश्चारुश्च	पीतैरक्तश्चारुश्च

९८	२३	-केयम् ।	-केयम्—
११०	२१	पृष्णिपर्णी	पृष्णिपर्ण्यौ
११२	२७	चित्र°	चित्रो°
११४	११	वर्ग ५	वर्ग १
११५	२८	क्रर-	क्रूर-
१२१	३	-सूत्रणे	-सूत्रेण
१३१	१३	गो-	"गौ-
१३६	१५	वलिन द्वीपि-	वलिन-द्विपि-
१४२	१	सितः	सितैः
१४७	१७	वर्ग २	वर्ग १
१४७	२८	-भृच्चि°	-भिच्चि°
१४९	२४	दीघमूला	दीर्घमूला
१५९	४	-वर्णाऽधरा-	-वर्णा धरा-
१६१	२३	द्वीपशत्रु-	द्विपिशत्रु-
१६३	७	नाम्ना(?)रास्ना	नाम्ना
१६३	१२	कपिकच्छूरात्म-	कपिकच्छ्वामात्म-
१६८	११	चैन्द्री	त्वैन्द्री
१६८	१८	वान्तो	बान्तो
१६९	२७	[धन्व०वर्ग२श्लो०३]	०
१७५	९९	काञ्चनी क्षीरी	काञ्चनक्षीरी
१८०	३	पद्मनालं	पद्मनालं
१८१	२२	शेवलं	शेवालं
,,	,,	शैवलं	शेवलं
१८३	६	कणाऽऽख्याता	कणा ख्याता
१८३	१६	कुञ्चिका	ञ्चिका
१९१	२०	श्रीवराकः(श्रीवारकः)।	श्रीवारकः
,,	२३	,,	,,
१९४	२६	'लबुड्	लबुङ्
१९७	७	वर्ग१	वर्ग२
१९७	१०	तुण्डा	तुण्डी
१९८	२५	-कटुम्बके	कुटुम्बके
१९९	३०	सारीवानी रजो	सारी वानीरजो
२०२	१६	इक्षुकाण्डः	इषुः काण्डः
२०५	३	इत्याहः	इत्याह
२१५	२७	न०	नि०
२१६	१५	उमा तु	उमाय

आचार्यश्रीहेमचन्द्रसूरिविरचितः

निघण्टुशेषः

वाचनाचार्यश्रीश्रीवल्लभगणिनिर्मितटीकासमेतः ।

॥ जयन्तु वीतरागाः ॥

आचार्यश्रीहेमचन्द्रसूरिविरचितः

निघण्टुशेषः ।

वाचनाचार्यश्री-श्रीवल्लभगणिविनिर्मितया टीकया समेतः ।

[प्रथमो वृक्षकाण्डः]

॥ ऐँ नमः ॥ श्रीगुरुभ्यो नमः ॥

सिद्धः शब्दसमुच्चयः शुचितरो यस्माद् भवद्विस्मयो,
निस्संशीतिसुशान्तिसातसहितः श्रेयांसि स स्राक् क्रियात् ।
यज्ज्ञानाम्बुदसद्रसेन रसवान् ख्यातश्च वानस्पतो,
वर्गो वल्गुगुणो विराजति भुवि **श्रीवर्धमानो** जिनः ॥१॥

वाग्देवतां स्तौमि सदा प्रसन्नां, सन्नाऽतिकुज्ञानभरामुदाराम् ।
विद्यार्थिनां पानकृते कृतार्थां, पीयूषकुम्भं दधतीं करेण ॥२॥

यद्वक्त्रोद्भूतचञ्चद्वचनरससुधालोलपो भव्यभावः,
सेवां कुर्वन्निवास्ति प्रमुखमुखमिषाच्चन्द्रमाश्चन्द्रिमाढ्यः ।
दाढर्च्याऽगूढप्रतिज्ञाजितकविधिषणा भूरिकालं धरायां,
नन्दन्तु श्रीवरज्ञानविमलगुरवः सुध्युपाध्यायमिश्राः ॥३॥

निघण्टुशेषस्य करोमि **टीकां**, किंज्ञोऽप्यहं स्वीयगुरुप्रभावात् ।
शास्त्राण्यनेकानि विमृश्य दृष्ट्वा, चाहर्निशं स्वीयसुबुद्धिवृद्ध्यै ॥४॥

इह हि चतुरुदधिवलयितवसुमतीमण्डलमण्डनायमानसुमानषड्दर्शनवादिमदोन्मादिद्विरदप्रकटघटागञ्जनसिंहोपमान-महनीयमहिम**शब्दानुशासना-ऽभिधानकोष**सत्य(?)साहित्याद्यनेकपवित्रशास्त्रविधानसावधानतावाप्तकविकुलगरिमप्राग्भाराः प्रथितावितथात्मनीनपद्मजनीनसमीचीनगुणगणजनितसकलप्रबलसुजनसमाजचमत्काराः श्री**पूर्णतल्लगण**गगनाङ्गणसमलङ्करणसहस्रकिरणश्रमणगणशिरश्चूडामणिकरणि**श्रीदेवचन्द्रसूरि**चरणकमलचञ्चरीकप्रकाराः**पराजिताखर्वप्रतिज्ञासुपर्वसूरयः श्रीहेमचन्द्रसूरयः** प्रचिक्रंसितशास्त्रविधानसमये प्रवर्त्तमानाः **श्रेयस्काम्ययाऽभीप्सितप्रशस्तदेवतानमस्काराचरणादिमङ्गलं दुरपोहप्रत्यूहसन्दोहव्यपोहनाय**

प्रचिकीर्षितनिघण्टुशेषाख्यशास्त्रसमाप्तिविधानाय सारशिष्टाचारसमाचरणाय च प्रथमपद्येन प्रतिपादयन्ति स्म । तद्यथा—

विहितैकार्थ-नानार्थ-देश्यशब्दसमुच्चयः ।
निघण्टुशेषं वक्ष्येऽहं नत्वाऽर्हत्पदपङ्कजम् ॥१॥ इति ।

अत्राहुरपरे—ननु प्रस्तुतशास्त्रकरणमवगणय्य किमर्थमादावेवोचितदेवतानमस्क्रियाऽऽविष्क्रिया ? । विघ्नोपशमार्थमिति चेत्, न, किं नमस्कारादेव विघ्नोपशमः ? उताऽपरस्मादपि ? । यद्याद्यः कल्पस्तर्हि किं यत्र यत्र नमस्कारस्तत्र तत्र विघ्नोपशमः ? किं वा यत्र यत्र विघ्नोपशमस्तत्र तत्र नमस्कारः ? । तत्र नाऽऽद्यो निरवद्यः, **कादम्बर्यादौ** विद्यमानेऽपि नमस्कारे परिसमाप्त्यभावेन तदनुपलम्भात् । अभिधानकोषेष्वेवायं नियम इति चेत्, न, तेष्वपि कुत्रचिन्नमस्कारपुरस्कारेऽप्यपरिसमाप्त्युपपत्तेः । द्वितीयपक्षोऽपि सूक्ष्मः, **मीमांसाभाष्यादौ** विघ्नोपशमोपलम्भेऽपि तत्प्रारम्भे नमस्कारानाविष्कारात्, तस्य तु तत्समाप्त्यैव निर्णीतत्वात् । किञ्च—'नमस्कारादेव' इत्यत्रैवकारो नमस्कारेण समं विघ्नोपशमस्यान्ययोगं व्यवच्छिनत्ति, स च प्रागुक्तव्यभिचारयुक्त्या न प्रमाणकोटीमाटीकिष्ट । नाप्यपरस्मादपीति पक्षः सूपपादः, सर्वत्रापि निश्चयेन तदुपादानस्यैव विलोक्यमानत्वात् । यद्वा अपरस्मादपि साध्यसिद्धौ प्रेम्णा तस्यैवोपादानं बाललीलायितं कल्पयेत् । अपि च—नमस्कारादित्यत्रापादानोपादानं विघ्नोपशमं प्रति नमस्कारस्य निमित्तत्वं जनकत्वेन व्यञ्जकत्वेन वा व्यनक्ति ? । जनकत्वेन चेत्, तर्हि किं नित्योऽनित्यो नित्यानित्यो वा स तज्जनकत्वेन तवाऽभिप्रेतः ? । नित्यश्चेत्, न, नित्यस्य जनकत्वानुपपत्तिः, शश्वदेकस्वभावात् । पूर्वं पश्चाच्च अतज्जनकत्वे शास्त्रारम्भे एव तज्जनकत्वे चैकस्वभावहान्या नित्योऽप्यनित्यतां सत्यापयेत्, "अप्रच्युता-ऽनुत्पन्न-स्थिरैकरूपं नित्यम्" [ ] इति नित्यलक्षणात् । सहकारिकारणजनितसाहाय्यात् तज्जनको भविष्यतीति चेत्, न, सहकारिकारणस्य तत्साहाय्यकारित्वेनाद्याप्यप्रसिद्धत्वात् । प्रसिद्धत्वे वा तत्साहाय्यस्य भेदाऽभेदोभयैर्भेत्तुं शक्यत्वात् । न च नमस्कारोऽनित्यः, शास्त्रारम्भे शास्त्रकारैरवश्यं विधीयत इति भवताऽभ्युपेतत्वात् । अनित्यस्तज्जनक इति चेत्, न, अनित्यः किं कतिपयक्षणावस्थायी ? क्षणस्थायी वा ? । प्राच्ये क्रियारूपत्वान्नमस्कारस्य तथात्वं प्रतिपत्तुमशक्तिः, क्रियायाः क्षणविनाशित्वात् । द्वितीये स्वोत्पत्तिमात्रव्यग्रस्य क्षणिकस्य तज्जननं प्रति अभविष्णुतैव, स्वोत्पत्तेः प्राक् पश्चादुत्पत्तिसमये एव वा क्षणिकः कार्यं कुर्यादिति विकल्पजालेन प्रत्यवस्थातुं शक्यत्वात् । कथं क्षणिको वा

१ °त्पाद° नि० ॥

नमस्कारः कालभूयस्त्वभाविनीं शास्त्रसमाप्तिं यावत् तिष्ठेत् ? तत्प्रत्यूहसन्दोहं व्यपोहेच्च ?। नापि नित्यानित्यः, परस्परपक्षोपक्षिप्तदूषणगणावकीर्णत्वात् । तदुक्तम्—

प्रत्येकं यो भवेद् दोषो द्वयोर्भावे कथं न सः ?।

[ ] इति ।

नापि व्यञ्जकत्वेन, तस्य तद्वच्यञ्जकत्वेन त्वयाऽद्याप्यप्रसाधितत्वात् । किञ्च— नमस्कारात् कस्य प्रत्यूहस्य व्यपोहः ? किं भूतस्य भविष्यतो वर्तमानस्य वा ?। न तावदाद्यविकल्पद्वयस्य, तस्याऽतीतानागततया व्यपोहितुमसमर्थत्वात् । वर्तमानस्य किं सतोऽसतो वा ? । न तावत् सतः, तस्य भोग्यत्वेनोपसेदुषः परःशताभिर्नमस्याभिर्दुरपोहत्वात् । असतस्त्वसत्त्वादेव तदपोहानुपपत्तिः । अन्यच्च—यदि नमस्कार एव प्रत्यूहव्यपोहकः स्यात् तदा प्रत्यूहसन्दोहदन्दह्यमानो जनो नमस्कारैस्तं व्यपास्य को न स्वं सुखाचेक्रियात् ? । ततो विघ्नोपशमार्थं नमस्कार इति यत्किञ्चिदेतत् । अत्र प्रतिविधीयते—

यदवादि 'प्रस्तुतशास्त्रकरणमवगणय्य नमस्कारकरणं किमर्थम् ?' इत्यादि तदेतत् सर्वं तवाऽप्रामाणिकतामेव प्रवीणयति । न खलु प्रामाणिकीभूय कश्चिद् विपश्चिच्छास्त्रारम्भसम्भावितं नमस्कारं तिरस्कुर्वीत, शास्त्रारम्भे शास्त्रकारैस्तस्यैव प्रस्तुतत्वात् । यच्चावाचि 'किं नमस्कारादेव विघ्नोपशमः ?' इत्यादि तदप्यसूपपादम्, यतो नमस्कारादेव न वयं विघ्नोपशममभिदध्महे, किन्तु तज्जनितनिर्मलधर्मादेव । स चाऽभीष्टदेवताप्रणिधानाद्यनेकसविवेकव्यापारसाध्यः । अत एव यत्र क्वापि विघ्नोपशमस्तत्राऽवश्यं मानसप्रणिधानाद्युत्पन्नधर्मस्यैव हेतुत्वम्, कार्यवैशिष्ट्यगम्यत्वात् कारणवैशिष्ट्यस्य । यत्र तु तत्सद्भावेऽपि विघ्नसद्भावस्तत्र धर्मा-ऽधर्मयोरल्पीयस्त्व-बलीयस्त्वे हेतू, बलीयसाऽल्पीयसो घर्षणात् । एतेन नित्याऽनित्याद्यनल्पविकल्पजालमपि प्रतिक्षिप्तमवसेयम् । यतः—क्रियारूपत्वेनानित्योऽपि नमस्कारो धर्मं विनिर्माय विनश्यति, स चाशेषविघ्नविघातनिघ्नो भवति । तथा च प्रतिपादयाञ्चकार **श्रीकन्दलीकारः**— "स हि धर्म्मोत्पादकस्तिरयत्यन्तरायबीजम्" [ ] इति । व्यञ्जकपक्षस्य त्वस्वीकार एव परीहारः । यदप्याचचक्षे विचक्षणेन 'नमस्कारात् कस्य प्रत्यूहस्य व्यपोहः ?' इति, तदप्यल्पीयः, वर्तमानस्यैव तस्य धर्मेण तिरस्करणात् । न च वाच्यम्—कथं वर्तमानस्तिरस्क्रियते ? इति, उद्दण्डप्रचण्डमुद्गरदण्डादिना विद्यमानस्यैव घटादेर्विघटनोपपत्तेः । इदमेव च धर्मस्यालङ्कर्मीणत्वम्, यदुपेतमपि प्रत्यूहव्यपोहं विदधाति, अन्यथा तेनोपकृतं किं स्यात् ? । ततश्चावश्यं शास्त्रप्रारम्भे नमस्कारो विधेयः, प्रमाणप्रतिष्ठितत्वात् । तथाहि —विवादाध्यस्तो नमस्कारः शास्त्रारम्भेऽवश्यं विधेयः, विघ्नोपशमफलत्वात्, **त्रिपुरा**दिमन्त्रजापवदित्यलं कुचर्चया । प्रस्तुतं प्रस्तुमः—

तत्र **'अहं'** हेमचन्द्राचार्यः **'वक्ष्ये'** कथयिष्यामि । "ब्रूंगक् व्यक्तायां वाचि" आदादिकोऽयम् उभयपदी इत्यस्य वचादेशे सिद्धम् । कम् ? **'निघण्टुशेषं'** "घटि क्यपि द्युतौ" इति **कविकल्पद्रुमधातुपाठः**, नितरां घण्टचन्ते– एकत्र भाष्यन्ते शब्दा अनेनेति **निघण्टुः** , "भृ-मृ-तृ-त्सरि-" [हैमोणादिसू० ७१६] इति बहुवचनादुः, पुल्लिङ्गः । यद् **वैजयन्ती**–

नामशास्त्रे निघण्टुर्ना [ ] इति ।

व्याडिस्तु–

अर्थान् निघण्टयत्यस्मान्निघण्टुः परिकीर्तितः ।

पुं-नपुंसकयोः स स्यात् [ ] इति ।

नन्वयं धातुर्द्युत्यर्थे उक्तो धातुपाठे तत् कथं परिभाषणार्थः ? उच्यते—

क्रियावाचित्वमाख्यातुं प्रसिद्धोऽर्थः प्रदर्शितः ।

प्रयोगतोऽन्ये ज्ञातव्याः, अनेकार्था हि धातवः ॥

[ ]

इत्युक्तत्वाद् युक्तेयं व्युत्पत्तिः । अकारान्तोऽपि **निघण्ट**शब्दः । तदुक्तं **चामुण्ड**-पण्डितेन–

इति **वर्णनिघण्टोऽयं** बीजानां वच्मि किञ्चन । [ ] इति ।

तदुक्तादतिरिक्तः शेषः प्रणिगद्यते । यद्वा शिनष्टि–विशिँष्टकृष्टिजनानां प्राचीननिघण्ट्वप्रोक्तवनस्पतिनामसमूहेषु ज्ञानोत्पादनं करोतीति **शेषः** । "शिष् हिंसायाम्" शिष्यते–विचित्रवनस्पत्यभिधानजाडयं हिंस्यते अनेनेति वा **शेषः** । निघण्टोः– स्वोपज्ञनामसंग्रहस्य शेषो **निघण्टुशेष**स्तम् । किं कृत्वा ? **नत्वा**, काय-वाङ्-मनोभिः प्रणम्येत्यर्थः । किम् ? **'अर्हत्पदपङ्कजम्'** अर्हतां पदपङ्कजम् अर्हत्पदपङ्कजम्, तीर्थकृच्चरणकमलमित्यर्थः । किंविशिष्टोऽहम् ? **'विहितैकार्थ-नानार्थ-देश्यशब्दसमुच्चयः'** एकार्थः–**अभिधानचिन्तामणि**नाममालालक्षणः, नानार्थः–

" ध्यात्वाऽर्हतः कृतैकार्थशब्दसन्दोहसंग्रहः ।

एकस्वरादिषट्काण्डचा कुर्वेऽनेकार्थसङ्ग्रहम् ॥" [हैमाने० का. १, श्लो. १] इत्यादिलक्षणः, देश्यशब्दसमुच्चयः–**देशीनाममाला**, एषां द्वन्द्वे एकार्थ-नानार्थ-देश्यशब्दसमुच्चयाः, ततो विहिताः–विनिर्मिता एकार्थ-नानार्थ-देश्यशब्द-

१. अदा° पु१ ॥ २. "नाममालायाम्" इति पु१ टिप्पणी ॥ ३. विशिष्टविद्वज्जनानामित्यर्थः ॥

समुच्चया येन स विहितैकार्थ-नानार्थ-देश्यशब्दसमुच्चयः । एतेनेदं ज्ञापितं भवति—पूर्वमपूर्वाभिधानचिन्तामणि-शेषसङ्ग्रह-देशीशब्दसङ्ग्रहान् विधायाथ निघण्टुशेषं करोमीत्यर्थः । इति प्रथमपद्यार्थः ॥१॥

वृक्ष-गुल्म-लता-शाक-तृण-धान्यक्रमादिह ।
षट् काण्डानि प्रवक्ष्यन्ते सप्तम्युद्देशपूर्वकम् ॥२॥

व्याख्या— 'इह' इति निघण्टुशेषे **'षट् काण्डानि'** षट् सर्गाः **'प्रवक्ष्यन्ते'** प्रतिपादयिष्यन्ते । कथम् ? **'सप्तम्युद्देशपूर्वकं'** सप्तम्या—विभक्तिविशेषेण उद्देशः—कथनं सप्तम्युद्देशः, स पूर्वो यस्य तत् सप्तम्युद्देशपूर्वकम्, एवं यथा भवति तथा । कस्मात् ? इत्याह— **'वृक्ष-गुल्म-लता-शाक-तृण-धान्यक्रमात्'** वृक्षाश्च प्रतीताः गुल्माश्च सिन्दुवाराद्याः लताश्च गुञ्जाद्याः शाकाश्च शतपुष्पमुख्याः तृणाश्च रौहिषप्रमुखाः धान्यानि च पाटलादीनि वृक्ष-गुल्म-लता-शाक-तृण-धान्यानि, तेषां वाचकाः शब्दा अपि वृक्ष-गुल्म-लता-शाक-तृण-धान्यानि, वाच्य-वाचकयोरभेदोपचारात् ; तेषां क्रमः—परिपाटी तस्मात् तथा । एतावता वृक्षकाण्डं गुल्मकाण्डमित्याद्युक्तं भवतीति द्वितीयपद्यार्थः ॥२॥

अशोके स्त्रीप्रियः शोकनाशनः स्यन्दनोऽलसः ।
वञ्जुलो मदनावासः स्त्रीपादाहतिदोहदः ॥३॥

हेमपुष्पः कर्णपूरः कङ्केल्लिर्मधुमण्डनः ।
पिण्डपुष्पो लतावृक्षः पौलोमी-रोहिणीद्रुमः ॥४॥

"शुं गतौ" न शवति **अशोकः**, "भीण्-शलि-" [हैमोणादिसू० २१] इति कः; नास्ति शोकोऽस्मादिति वा; "अश्नुते अशोकः" इति तु **क्षीरस्वामी**, पृषोदरादित्वात् साधुः, तत्र । स्त्रियः प्रिया यस्य स **स्त्रीप्रियः**; स्त्रीणां प्रियो यः स इति वा । शोकं नाशयति **शोकनाशनः** । "स्यन्दौङ् स्रवणे" अन्तस्थीयोपान्त्योऽयम्, स्यन्दते **स्यन्दनः**, "ग्वसि-रसि—" [हैमोणादिसू० २६९] इत्यनः । "अली भूषण-पर्याप्ति-वारणेषु" अलति **अलसः**, "तप्यणि—" [हैमोणादिसू० ५६९] इत्यसः; न लसति वा । "वज गतौ" वजति **वञ्जुलः**, "कुमुल-तुमुल—" [हैमोणादिसू० ४८७] इत्युले निपातनाद् वजेः स्वरान्नोऽन्तः" । मदनः— कन्दर्प आवसत्यस्मिन्निति **मदनावासः**; मदनस्य आवासः— निवसनस्थानमिति वा । स्त्रियाः पादः—चरणः स्त्रीपादस्तेन आहतिः—आहननं सैव दोहदो यस्येति **स्त्रीपादाहतिदोहदः** । कमनीय-

कामिनीभुजलतावगूहन-पार्ष्णिप्रहार-कटाक्षविक्षेपादिभ्यः प्रसून-पल्लवादिप्रसवदर्शनादेतस्य मैथुनसंज्ञेति **जैनाः** ॥३॥

हेमवर्णानि पुष्पाण्यस्य **हेमपुष्पः** । कर्णौ पूरयति **कर्णपूरः** । कं—उदकं केलति—गच्छति **कङ्केल्लिः**, स्त्रीलिङ्गः । **यदमरशेषः**— "स्त्रियां त्वशोके कङ्केल्लिः" [ ] पृषोदरादित्वात् साधुः । मधुं—वसन्तं मण्डयति **मधुमण्डनः** । पिण्डाकाराणि पुष्पाण्यस्य **पिण्डपुष्पः** । लताकारो वृक्षो **लतावृक्षः**; लता चासौ वृक्षश्चेति वा **लतावृक्षः** । पौलोम्याः रोहिण्याश्च द्रुमः **पौलोमीद्रुमः रोहिणीद्रुमः** । आह च—

अशोकः शोकनाशश्च विचित्रः कर्णपूरकः ।
विशोको रक्तको रागी चित्रः स्तबकमञ्जरी ॥
कङ्केल्लिर्हेमपुष्पश्च पिण्डपुष्पो लतातरुः ।
[ ] इति ।

एतस्य लोके 'अशोक' इति प्रसिद्धिः ॥४॥

बकुले मदिरागन्धः कृष्णत्वग् मद्यदोहदः ।
द्राक्षाफलो गूढपुष्पः केसरः सिंहकेसरः ॥५॥
विशारदो गुडपुष्पः

"वकुङ् कौटिल्ये" वङ्क्यते पुष्पैर्**वकुलः**, "स्था-वङ्कि—" [हैमोणादिसू० ४८६] इति उलो न लुक् च ; "उच्यते वकुलः" इति **क्षीरस्वामी**, पृषोदरादित्वात् साधुः, "कुमुल-तुमुल-" [हैमोणादिसू० ४८७] इत्युले वा निपात्यते, तत्र । मदिरावद् गन्धोऽस्य **मदिरागन्धः** । कृष्णा त्वक्—छल्ली यस्य स **कृष्णत्वक्** । मद्यस्य दोहदोऽस्य **मद्यदोहदः** । द्राक्षाकाराणि द्राक्षावन्मृष्टानि वा फलान्यस्य **द्राक्षाफलः** । गूढानि—गुप्तानि पुष्पाण्यस्य **गूढपुष्पः** । केसराः सन्त्यस्य **केसरः**, अभ्रादित्वादः । "के—जले सरति **केसरः**" इत्यपरे । सिंहस्य केसरा इव केसरा अस्य **सिंहकेसरः**, "उष्ट्रमुखादयः" [सिद्ध० ३.१.२३] इत्यनेन समासः ॥५॥

विशेषेण शरदि भवो **विशारदः**, "भर्तु-सन्ध्यादेरण्" [सिद्ध० ६.३.८९] इत्यण् । गुडवद् मृष्टानि पुष्पाण्यस्य **गुडपुष्पः** । आह च—

बकुलः शीधुगन्धश्च मद्यगन्धो विशारदः ।
मधुगन्धो गूढपुष्पः शिवकेसरकस्तथा ॥ [ ] इति ।

---

१. शिवाके° पु१॥

एतस्य लोके 'बैउल' इति प्रसिद्धिः ।

फलमस्य तु पर्पटम् ।

'तुः' पुनरर्थे । 'अस्य' बकुलस्य फलं पृणाति **पर्पटम्**, "कपट-कीकटादयः" [हैमोणादिसू० १४४] इत्यटे साधुः ।

तिलके पूर्णकश्छन्नकुसुमो मुखमण्डनः ॥ ६ ॥
चित्रकः क्षुरको रेची स्त्रीनिरीक्षणदोहदः ।

तिलति– स्निह्यति **तिलकः**, "ध्रु-धून्दि-" [हैमोणादिसू० २९] इति किदकः ; "तिलाभपुष्पस्तिलकः" इति **क्षीरस्वामी**, तत्र । पूर्यते स्म पूर्णः, स्वार्थिके के **पूर्णकः** । छन्नानि–गुप्तानि कुसुमान्यस्य **छन्नकुसुमः** । मुखं मण्डयति **मुखमण्डनः**, नन्द्यादित्वादनः ॥६॥

"चिंगट् चयने" चीयते चित्रः, "चि-मिदि-शंसिभ्यः कित्" [हैमोणादिसू० ४५४] इति कित् त्रः प्रत्ययः, चित्र एव **चित्रकः**, स्वार्थिकः कः । क्षुरति–विलिखति **क्षुरकः** ; क्षुरस्य तुल्यः **क्षुरक** इति वा परुषत्वात्, "तस्य तुल्ये कः संज्ञा-प्रतिकृत्योः" [सिद्ध० ७.१.१०८] इति कः । "रिचण् विरेचने च" चकारात् सम्पर्चने, रेचयत्यवश्यं **रेची**, "आवश्यके णिन्" ("णिन् चाऽऽवश्यका-ऽऽधमर्ण्ये" सिद्ध० ५.४.३६) इति णिन् । स्त्रीनिरीक्षणे दोहदोऽस्य **स्त्रीनिरीक्षणदोहदः** । आह च—

तिलकः पूर्णकः श्रीमान् क्षुरकः शतपुष्पकः ।
मुखमण्डनको रेची विटश्चित्रो विशेषकः ॥
[ ] इति ।

तिलकः परुषः श्रीमान् क्षुरकश्छन्नपुष्पकः ।
[ ] इत्यपरः ।

एतस्य लोके 'तिलकु' इति प्रसिद्धिः ।

कोविदारे भद्रदारुः काञ्चनारो युगच्छदः ॥७॥
ताम्रपुष्पश्चमरिकः कुद्दालः कुण्डली कुली ।
काञ्चनो मालुकापर्णः कुदारः स्वल्पकेसरः ॥८॥

---

१. "बकुल" पु२॥ २. °न्नपत्रकः पु२ ॥

कनति—दीप्यते **कोविदारः**, "कनेः कोविद-" [हैमोणादिसू० ४१०] इत्यारः प्रत्ययो धातोश्च कोविदेत्यादेशः ; कुं—भूमिं विदारयतीति वा, पृषोदरादित्वात् , तत्र । भद्रं दारु अस्य **भद्रदारुः** । "कनै दीप्ति-कान्ति-गतिषु" कनति **काञ्चनारः**, "कनेः कोविद-कर्बुद-काञ्चनादयश्च" [हैमोणादिसू० ४१०] इति आरः प्रत्ययो धातोश्च काञ्चनेत्यादेशः । युगरूपं छदं—पत्रमस्य **युगच्छदः** ॥७॥

ताम्राणि पुष्पाण्यस्य **ताम्रपुष्पः** । चमरोऽस्यास्ति **चमरिकः**, "अतोऽनेकस्वरात्" [सिद्ध० ७.२.६] इति कः । कुं—भूमिं दालयति **कुद्दालः**, पृषोदरादित्वात् । कुण्डलमस्त्यस्य **कुण्डली**, "शिखादिभ्य इन्" [सिद्ध० ७.२.४] इतीन् । कुलमस्त्यास्तीति **कुली** । काम्यते **काञ्चनः**, "विदन-गगन-" [हैमोणादिसू० २७५] इत्यने निपात्यते । मालुका—वनस्पतिविशेषस्तस्या इव पर्णान्यस्य **मालुकापर्णः** । कुं—पृथ्वीं दारयति **कुदारः** । स्वल्पाः केसरा अस्य **स्वल्पकेसरः** । आह च—

कोविदारे च कुद्दालः कुदारः कुण्डली कुली ।
ताम्रपुष्पश्चमरिको महायमलपत्रकः ॥
[ ] इति ।

यमलपत्रकः पर्यायेणोक्तः । एतस्य 'कांचणयरु' इति लोकप्रसिद्धिः ॥८॥

चम्पके काञ्चनो हेमपुष्पकः षट्पदातिथिः ।
कुसुमेन्द्रो वरलब्धः कुमारीवल्लभश्चलः ॥९॥
चाम्पेयः कुसुमारोग्यः कलिकागन्धफल्यपि ।

चम्यते—अद्यते भृङ्गैश्च**म्पकः**, "कीचक-" [हैमोणादिसू० ३३] इत्यके निपात्यते, **चाम्पको**ऽपि, तत्र । काम्यते **काञ्चनः**, "विदन-गगन-" [हैमोणादिसू० २७५] इत्यने निपात्यते, पुल्लिङ्गः । हेमवर्णं पुष्पमस्य हेमपुष्पः, स्वार्थिके के **हेमपुष्पकः** । षट्पदाः—भ्रमरा एव अतिथयोऽस्य **षट्पदातिथिः**; षट्पदानामतिथिरिव वा । कुसुमेषु—पुष्पेषु इन्द्र इव इन्द्रः **कुसुमेन्द्रः** । वरैः—श्रेष्ठैर्लब्धः—प्राप्तो **वरलब्धः** । कुमारीणां वल्लभः **कुमारीवल्लभः** । चलति **चलः** ॥९॥

चम्पादेशे भवश्चा**म्पेयः**, "भवे" [सिद्ध० ६.३.१२३] इत्येयण् प्रत्ययः; "चप् सान्त्वने" चप्यते इति वा, "गय-हृदयादयः" [हैमोणादिसू० ३७०] इत्यये निपात्यते । कुसुमेषु आरोग्यमस्य **कुसुमारोग्यः** । कलिकागन्धानि फलान्यस्य(? नि सन्त्य)स्य **कलिकागन्धफली** । आह च—

चम्पकः सुकुमारश्च सुरभिः शीतलश्चलः ।
चाम्पेयो हेमपुष्पश्च काञ्चनः षट्पदातिथिः ॥

[ ] इति ।

एतस्य लोके 'चांपउ' इति प्रसिद्धिः ।

स्यान्नागकेसरे नागः केसरो हेमकेसरः ॥१०॥
दर्वीसहो दुष्प्ररोहश्चाम्पेयः स्कन्धभूषणः ।
नागपुष्पः कुम्भफलो हेम-सर्प-द्विपाह्वयः ॥११॥

नागप्रियाणि केसरवन्ति पुष्पाण्यस्य **नागकेसरः**, तत्र । न अगो **नागः** । यद् **विश्वः**—

नागः पन्नग-मातङ्ग-क्रूर-वारिषु तोयदे ।
नागकेसर-पुन्नाग-नागदन्तक-मुस्तके ॥

[ ] इति ।

के—जले सरति **केसरः**, सप्तम्यलुक्; केसराः सन्त्यस्य वा, अभ्रादित्वादः प्रत्ययः; "कि ज्ञाने" चिकेति **केसर** इति वा, "मी-ज्यजि-" [हैमोणादिसू० ४३९] इति सरः, बाहुलकान्न षत्वम् । हेमवर्णाः केसरा अस्य **हेमकेसरः** ॥१०॥

दर्वीं—फणां सहति **दर्वीसहः** । दुष्टः प्ररोहोऽस्य **दुष्प्ररोहः** । चम्पादेशे भवश्चाम्पेयः । स्कन्धं भूषयति **स्कन्धभूषणः** । नागप्रियाणि पुष्पाण्यस्य **नागपुष्पः** । कुम्भाकाराणि फलान्यस्य **कुम्भफलः** । हेम-सर्प-द्विपेभ्यः आह्वय इति योज्यते, ततो हेम्नः—स्वर्णस्य सर्पस्य द्विपस्य च आह्वयो यस्येति **हेमाह्वयः सर्पाह्वयः द्विपाह्वयः** । आह च—

नागपुष्पो मतो नागः केसरो नागकेसरः ।
चाम्पेयो नागकिञ्जल्कः कनकं हेम काञ्चनम् ॥

[ ] इति ।

एतस्य लोके 'नागकेसर' इति प्रसिद्धिः ॥११॥

तत्पुष्पचूर्णे तु करिकुसुमः पुष्परोचनः ।

'तत्पुष्पचूर्णे' नागकेसरपुष्पचूर्णे 'तुः' पुनरर्थे करिणः—हस्तिनः कुसुमः—पुष्पं **करिकुसुमः** । कुसुमशब्दः पुं-क्लीबलिङ्गः । पुष्पस्य रोचनः—दीपकः **पुष्परोचनः** ।

कदम्बे स्यात् पीतदारुः प्रावृषेण्यो हलिप्रियः ॥१२॥
हारिद्रकः कादम्बर्यः पुलकी पर्वताह्वयः ।

"कद वैक्लव्ये " सौत्रः, कद्यते **कदम्बः**, "कदेर्णिद्वा"[हैमोणादिसू० ३२२] इत्यम्बः; "अबुङ् शब्दे " कुत्सितमम्बते वा **कदम्बः**, तत्र । पीतवर्णो दारुरस्य **पीतदारुः**, पुं-क्लीबलिङ्गः । प्रावृषि भवः **प्रावृषेण्यः**, "प्रावृष एण्यः" [सिद्ध० ६.३.९२] इति एण्यः । हलिनः प्रियो **हलिप्रियः**, सुराधिवासनात् ॥१२॥

हरिद्राया अयं हारिद्रः, "तस्येदम्" [सिद्ध० ६.३.१६०] इत्यण्, स्वार्थिके के **हारिद्रकः** । कादम्बर्यां—मदिरायां साधुः **कादम्बर्यः**, "तत्र साधौ" [सिद्ध०७.१.१५] इति यः; कादम्बर्यै हितो वा, "तस्मै हिते" [सिद्ध०७.१.३५] इति हितेऽर्थे यः । पुलकः—रोमाञ्चोऽस्त्यस्य **पुलकी** । पर्वतस्य आह्वयोऽस्य **पर्वताह्वयः** । एतस्य लोके 'कयंब' इति प्रसिद्धिः[1] । अथास्य विशेषाः—

धूलीकदम्बे त्वम्बष्ठः सुवासो वृत्तपुष्पकः ॥१३॥

धूल्याः कदम्बः **धूलीकदम्बः**, तत्र । 'तुः' इति अत्र विशेषद्योतकः । "अम गतौ भजने शब्दे च" अमति **अम्बष्ठः**, "षष्ठैधिठादयः" [हैमोणादिसू० १६६] इति ठे निपात्यते ; अम्बायां तिष्ठतीति वा, "स्था-पा-स्ना-त्रः कः" [सिद्ध०५.१.१४२] इति कः, "गो-ऽम्बा-ऽऽम्ब-" [सिद्ध०२.३.३०] इति स्थशब्दसम्बन्धिनः सकारस्य षत्वम्, "ङ्यापो बहुलं नाम्नि" [सिद्ध०२.४.९९] इति ह्रस्वश्च । शोभनो वासः—प्रतिवासोऽस्य **सुवासः**। वृत्तं—वर्तुलं पुष्पमस्य **वृत्तपुष्पः**, स्वार्थिके के **वृत्तपुष्पकः** । यदाह—

धूलीकदम्बोऽन्यः सुवासो वृत्तपुष्पकः ।
[ ] इति ॥१३॥

धाराकदम्बे त्वरणिर्विश्वरूप-महौजसौ ।

[धारोपलक्षितः—मेघधारोपलक्षितः कदम्बः **धाराकदम्बः**, तत्र ।] "ऋंक् गतौ " इयर्त्ति **अरणिः**, "ऋ-हृ-सृ-" [हैमोणादिसू० ६३८] इत्यादिना अणिः प्रत्ययः । विश्वे—जगति रूपमस्य **विश्वरूपः** । महद् ओजः—बलमस्य अस्माद् वा **महौजाः** ।

नीपे तु दीपनो धूर्तो नर्त्तो धूवारकः शिवः ॥१४॥
महाकदम्बः प्रियको घण्टापुष्प-सुपुष्पकौ ।

---

१. प्रसिद्धः पुर ॥

नयति सुखं **नीपः**, "नियो वा" [हैमोणादिसू० ३०२] इति कित् पः प्रत्ययः, तत्र । 'तुः' अत्र विशेषे । दीपयति **दीपनः** । "धुर्वै हिंसायां" **धूर्वति** विषं **धूर्तः**, "शी-री-" [हैमोणादिसू० २०१] इति कित् तः । नर्तयतीव **नर्तः** । शीतलत्वाद् धुनोति शोफरोगं **धूवारकः**, "मवाक-श्यामाक-" [हैमोणादिसू० ३७] इत्याके निपात्यते । **शिवः** उपद्रवापहारित्वात्; शेते अस्मिन् अनेन वा **शिवः**, "शीङापो ह्रस्वश्च वा" [हैमोणादिसू० ५०६] इति वः ॥१४॥

महांश्चासौ कदम्बश्च **महाकदम्बः** । प्रीणाति **प्रियकः**, "कीचक-पेचक-" [हैमोणादिसू० ३३] इत्यके निपात्यते । घण्टाकाराणि पुष्पाण्यस्य **घण्टापुष्पः** । शोभनानि पुष्पाण्यस्य सुपुष्पः, स्वार्थिके के **सुपुष्पकः** । सामान्यतो विशेषतश्च सर्वाण्येतानि कदम्बनामानि । लोके तु 'कयंब' इति प्रसिद्धिः[1] ।

कुटजे कोटजः कोही वत्सको गिरिमल्लिका ॥१५॥
वृक्षको मल्लिकापुष्पः कलिङ्गः पाण्डुरद्रुमः ।
इन्द्रवृक्षो यवफलो दीसभद्रोडुमल्लिका ॥१६॥

"कुटत् कौटिल्ये" कुटति **कुटजः**, "कुटेरजः" [हैमोणादिसू० १३०] इत्यजः, कुटादित्वाद् गुणाभावः, तत्र । बाहुलकाद् गुणे च **कोटजः** । "कुहि विस्मापने" कोहते अवश्यं **कोही**, "णिन् चावश्यका-" [सिद्ध० ५.४.३६] इति णिन् । "वस्ते त्वचं **वत्सकः**" इति **क्षीरस्वामी**, "कीचक-पेचक-" [हैमोणादिसू० ३३] इत्यके निपात्यते । गिरिणा मल्ल्यते—धार्यते **गिरिमल्लिका**; गिरौ मल्लिकेव वा ॥१५॥

वृक्षते—वृणोति **वृक्षकः**, "णक-तृचौ" [सिद्ध० ५.१.४८] इति णकः; वृश्च्यते—छिद्यते वृक्षः, "ऋजि-रिषि-" [हैमोणादिसू० ५६७] इति कित् सः, स्वार्थिके के **वृक्षकः** इति वा । मल्लिकाया इव पुष्पाण्यस्य **मल्लिकापुष्पः** । कलिङ्गायति **कलिङ्गः**, पृषोदरादित्वात् साधुः; "कलि शब्द-संख्यानयोः" **कल्यते कलिङ्ग** इति वा, "स्फुलि-कलि-पल्याद्वच इङ्गक्" [हैमोणादिसू० १०२] इतीङ्गक्; **कलिङ्ग**देशजो वा [**कालिङ्गः**], अत एव **कालिङ्गं कालिङ्गी** च । पाण्डुरो द्रुमः **पाण्डुरद्रुमः** । इन्द्रस्य वृक्षः **इन्द्रवृक्षः**, अत एव **शक्र** इत्यस्याऽऽख्या । **यदमरः**—

अथ कुटजः शक्रो वत्सको गिरिमल्लिका ।
[का०२ वर्ग ४ श्लोक ६६] इति ।

---

१. प्रसिद्धः पु२ ॥

यव इव फलमस्य **यवफलः** । दीप्तं भद्रमस्या **दीप्तभद्रा** । उड्डूनां मल्लिकेव **उडुमल्लिका** । आह च—

कुटजः कोटजः कोही वत्सको गिरिमल्लिका ।
कलिङ्गो मल्लिकापुष्प इन्द्रवृक्षोऽथ वृक्षकः ॥
[ ] इति ।

एतस्य लोके 'कुडउ' इति प्रसिद्धिः ॥१६॥

फलं तु तस्येन्द्रयवं, बीजं भद्रयवाह्वयम् ।

'तस्य' कुटजस्य फलं इन्द्रस्य यवम् **इन्द्रयवम्** । भद्रं यवं भद्रा यवा **यस्य तदिति** वा **भद्रयवं** बीजं कथ्यते । इन्द्रयवं कुटजफलम्, भद्रयवं तु कुटजबीजमित्यर्थः । यदाह—

फलानि तस्येन्द्रयवाः, बीजं भद्रयवास्तथा ।
[ ] इति ।

तथा—

फलानि तस्येन्द्रयवाः शक्राह्वाः शक्रलिङ्गकाः ।
अथ वत्सकबीजानि प्रोक्ता भद्रयवास्तथा ॥
[ ] इति ।

एतयोर्लोके 'इन्द्रयव, कुटजबीज' इति प्रसिद्धिः ।

शिरीषे विषहा भण्डी भण्डीरः शङ्खिनीफलः ॥१७॥
मृदुपुष्पः शुकपुष्पः शुकवृक्षः शुकप्रियः ।
कपीतनः कर्णपूरो भण्डिलः श्यामवल्कलः ॥१८॥

शिरसि इष्यते **शिरीषः**, पृषोदरादित्वात् साधुः; "शॄ हिंसायाम्" शीर्यते वा सौकुमार्यात् **शिरीषः**, "ऋ-जि-शॄ-पॄभ्यः कित्" [हैमोणादिसू० ५५४] इति किदीषः, तत्र । विषं हन्ति **विषहा**, किप् । "भडुङ् परिभाषणे, भण्डते **भण्डी**' इत्येके पेटुः" इति **क्षीरस्वामी** । भण्डयते **भण्डीरः**, "जम्बीरा-ऽऽभीर-" [हैमोणादिसू० ४२२] इति ईरे निपात्यते । शङ्खिन्याः फलमिव फलमस्य **शङ्खिनीफलः**, "उष्ट्रमुखादयः" [सिद्ध० ३.१.२३] इति समासः ॥१७॥

मृदूनि पुष्पाण्यस्य **मृदुपुष्पः** । शुकस्य पुष्पः **शुकपुष्पः** । पुष्पशब्दः पुं-क्लीबलिङ्गः । यदुवाच **वाचस्पतिः**— "पुष्पोऽस्त्री" [ ] इति ।

शुकस्य वृक्षः **शुकवृक्षः** । शुकस्य प्रियः **शुकप्रियः** । कपीं तनोति **कपीतनः**, कपिप्रियत्वात्, लिहादित्वादच्; कम्पते वा "विदन-गगन-" [हैमोणादिसू०२७५] इत्यने निपात्यते । कर्णौ पूरयति **कर्णपूरः** । भण्डयते **भण्डिलः**, "भण्डेर्न लुक् च वा" [हैमोणादिसू० ४८२] इति इलः प्रत्ययः । श्यामं वल्कलं—तरुत्वग् यस्येति **श्यामवल्कलः** । आह च— 5

शिरीषो मृदुपुष्पश्च भण्डीरः शङ्खिनीफलः ।
कपीतनः शुकतरुः श्यामवल्कः शुकप्रियः ॥

[ ] इति ।

एतस्य लोके 'सिरीसु' इति प्रसिद्धिः ॥१८॥

पाटल्यां पाटला स्थाल्यमोघा तोयाधिवासिनी । 10
वसन्त-कामयोर्दूती कुम्भिका कालवृन्तिका ॥१९॥

"पट गतौ" ण्यन्तः, पाटयति [दौर्गन्ध्यं] **पाटलिः**, "पाटचञ्जिभ्यामलिः" [हैमोणादिसू० ७०२] इत्यलिः, पुं-स्त्रीलिङ्गः, तस्याम् । "मृदि-कन्दि-" [हैमोणादिसू० ४६५] इत्यले **पाटला**, ताम्रपुष्पत्वाद्वा । स्थालीव **स्थाली**, रसाधारत्वात्; "ष्ठल स्थाने" स्थलति वा **स्थाली**, "वा ज्वलादि-" [सिद्ध०५.१.६२] इति णः । **काचस्थालीत्येके**[2] । 15
न मोघा **अमोघा**, बहुफलत्वात् । तोये अधिवसत्यवश्यं **तोयाधिवासिनी**, "णिन् चाऽऽवश्यका-" [सिद्ध०५.४.३६] इति णिन् । वसन्त-कामशब्दयोर्दूतीति योज्यते, ततो वसन्तस्य कामस्य च दूतीव **वसन्तदूती कामदूती** । कुम्भ्याः—स्थाल्याः प्रतिकृतिः **कुम्भीका**, रसाधारत्वादिति; कायति **कुम्भी**, "का-कुसिभ्यां कुम्भः" [हैमोणादिसू० ३३७] इति किदुम्भः, गौरादित्वाद् ङीः, स्वार्थिके के "ङ्यादीदूतः के" [सिद्ध० २.४.१०४] इति ह्रस्वे च **कुम्भिके**ति भवति । कालं वृन्तमस्याः **कालवृन्ता**, स्वार्थिके के **कालवृन्तिका**, अत एव **कालेत्यस्या** आख्या । यदाह— 20

अथ द्वयोः ।

पाटलिः पाटलाऽमोघा काला स्थाली फलेरुहा ॥
कृष्णवृन्ता कुबेराक्षी [अमर०का०२ वर्ग४ श्लो०५४.५५] इति । 25

१ स्थाली मोघा नि० । "मोघा स्त्री पाटलाऽक्षे, मोघं त्रिषु निरर्थके ॥ इति रुद्राद् मोघाऽपि" इति अमरकोशव्याख्यासुधायां का०२ वर्ग ४ श्लो०५४ ॥ २ 'एके' इति व्याख्यासुधाकारादयः ॥

आह च—

पाटलोक्ता तु कुम्भीका ताम्रपुष्पाऽम्बुवासिनी ।
स्थाली वसन्तदूती स्यादमोघा कालवृन्तिका ॥
[ ] इति ।

एतस्या लोके 'पाडला' इति प्रसिद्धिः ॥१९॥

अन्यस्यां तत्र तु श्वेतपाटला काष्ठपाटला ।
शीतला श्वेतकुम्भीका कुबेराक्षी फलेरुहा ॥२०॥

'तुः' अत्र विशेषे । श्वेता पाटला **श्वेतपाटला** । काष्ठोपलक्षिता पाटला **काष्ठपाटला** । शीतमस्त्यस्याः **शीतला,** सिध्मादित्वाद् लः; शेते वा "शीङस्तलक्—" [हैमोणादिसू० ५०१] इति तलक् प्रत्ययः । श्वेता चासौ कुम्भीका च **श्वेतकुम्भीका** । **कुबेराक्षी** यक्षाक्षितुल्यफलत्वात् । फले रोहति **फलेरुहा,** साङ्कुरफलत्वात्, "नाम्युपान्त्य-" [सिद्ध० ५.१.५४] इति कः सप्तम्यलोपश्च । यदाह—

द्वितीया पाटला श्वेता निर्दिष्टा काष्ठपाटला ।
सा चैव श्वेतकुम्भी स्यात् कुबेराक्षी फलेरुहा ॥
पाटली कृष्णवृन्ता [ ] इति ।

श्वेतपाटलानामानि ॥२०॥

अगरावगुरुर्लोहं वंशिका विश्वरूपकम् ।
कृमिजं प्रवरं राजार्हं जौङ्गकमनार्यजम् ॥२१॥

"अग कुटिलायां गतौ" अगत्यनेन **अगरुः,** "कटि-कुटचर्ते-"[हैमोणादिसू० ८१२] इत्युपलक्षणादरुः प्रत्ययः; अगं रुणद्धीति वा पृषोदरादित्वात् साधुः, पुं-क्लीबलिङ्गः, तत्र । न गुरुः **अगुरुः,** पुं-क्लीबलिङ्गः । "रुहं जन्मनि" रोहति **लोहम्,** र-लयोरैक्याल्लत्वम्, पुं-नपुंसकः । वंशोऽस्या अस्ति **वंशिका,** "अतोऽनेकस्वरात्" [सिद्ध०७.२.६] इति कः, स्त्री-क्लीबलिङ्गः । "वंशाभं **वंशकम्**" **इत्यमरटीका,** "तस्य तुल्ये कः संज्ञा-प्रतिकृत्योः" [सिद्ध०७.१.१०८] इति कः । विश्वं रूपयति **विश्वरूपकम्,** पुं-क्लीबलिङ्गः । कृमिभिर्जन्यते **कृमिजम्,** "क्वचित्" [सिद्ध०५.१.१७१] इति डः । **कृमिजग्ध**मित्यपि । प्रव्रियते **प्रवरम्,** "युवर्ण-" [सिद्ध०५.३.२८] इत्यल्प्रत्ययः । राज्ञोऽर्हं **राजार्हम् । जोङ्गके** गिरौ भवं **जौङ्गकम्,** "भवे" [सिद्ध०६.३.१२३] इत्यण्प्रत्ययः । अनार्यदेशे जात**मनार्यजम्,** "क्वचित्" [सिद्ध० ५.१.१७१] इति डः । आह च—

अगरुः प्रवरं लोहं कृमिजग्धमनार्यजम् ।
कृष्णागरुः स्यादगुरुर्जौङ्गकं विश्वरूपकम् ॥
[ ] इति ।

एतस्य लोके 'अगर' इति प्रसिद्धिः ॥२१॥

मल्लिगन्धेऽत्र मङ्गल्या

मल्ल्याः—मल्लिकाकुसुमस्य गन्धो यत्र तद् मल्लिगन्धम्, तत्र **मल्लिगन्धे** 'अत्र' इति अगरौ मङ्गले साधुर्**मङ्गल्या**, "तत्र साधौ" [सिद्ध०७.१.१५] इति यः, मल्लिकापुष्पगन्धि अगुरु **मङ्गल्या**ख्यमाख्यायत इत्यर्थः । **यदमरः**—

[कालागुर्व]गुरु स्यात् तु मङ्गल्या मल्लिगन्धि यत् ।
[का० २ वर्ग ६ श्लो० १२७] इति ।

कृष्णे तु काकतुण्डकः ।

'तुः' पुनरर्थे । कृष्णे अगरौ काकस्य तुण्ड इव **काकतुण्डः**, कृष्णत्वात्, स्वार्थिके के **काकतुण्डकः** । एतस्य लोके 'कृष्णागरु' इति प्रसिद्धिः ।

श्रीखण्डे स्यान्मलयजं चन्दनं श्वेतचन्दनम् ॥२२॥
गोशीर्षकं गन्धसारं भद्रश्रीस्तैलपर्णिकम् ।
फलकी सुरभिः सारं महार्हं रोहणोद्भवम् ॥२३॥

श्रिया—सौगन्ध्यलक्षणया खण्डयत्यन्यगन्धमिति **श्रीखण्डम्**, तत्र । **मलयाद्रेर्जातं मलयजम्**, " क्वचित् " [सिद्ध०५.१.१७१] इति डः, पुं-क्लीबलिङ्गः । **चन्द्यते**—ह्लाद्यते अनेन **चन्दनम्**, "ग्वसि-रसि–" [हैमोणादिसू० २६९] इत्यनः; चन्दति—आह्लादयति दीप्यते वा **चन्दनम्**, रम्यादित्वादनट्, पुं-क्लीबलिङ्गः । श्वेतं च तत् चन्दनं च **श्वेतचन्दनम्** ॥२२॥

" **गोशीर्षो** गिरिराकरोऽस्यस्य **गोशीर्षम्**, अभ्रादित्वादः, **गोशीर्षगिरि**भवत्वात्, स्वार्थिके के **गोशीर्षकम्**" [ ] इति **क्षीरस्वामी** । **गोशीर्षे** गिरौ भवं **गौशीर्षम्**, " भवे " [सिद्ध०६.३.१२३] इत्यण्, क्लीबलिङ्गः । यद् **गौडः**—"गौशीर्षं तैलपर्णिकम् " [ ] इति क्लीबमाह । **अमरस्तु** " तैलपर्णिक-गौशीर्षौ " [का० २ वर्ग ६ श्लो०१३१] इति पुंस्याह । अण्प्रत्यये वृद्धिः मत्वर्थीये अप्रत्यये वृद्धेरभावः, एवं शब्दभेदो ज्ञेयः । गन्धेन

१ "तैलपर्णिक-गोशीर्षे" इति क्लीबलिङ्गद्योतकोऽपि पाठो मुद्रितेऽमरकोशे दृश्यते ॥

सारं **गन्धसारम्**, पुं-क्लीबलिङ्गः । भद्रा श्रीरस्य **भद्रश्रीः** । **तैलपर्णिको** गिरिः आकरोऽस्त्यस्य **तैलपर्णिकम्**, पुं-क्लीबलिङ्गः । फलकम्—इष्टसिद्धिरावरणं वा, तदस्यास्तीति **फलकी**, "प्रेक्षादेरिन्" [सिद्ध० ६.२.८०] इतीन् । **सुरभिः** गन्धाह्वत्वात्; 'रभुङ् शब्दे" सुष्ठु रम्भते **सुरभि**रिति वा, "पदि—पठि-" [हैमोणादिसू० ६०७] इति बहुवचनादिः, "आगमशासनमनित्यम्" इति ["रभोऽपरोक्षा-शवि" सिद्ध० ४. ४. १०२ इति] नागमाभावः । **सारं** गन्धसारत्वात्, पदैकदेशे पदसमुदायोपचारात्, यथा—"सेनो भीमसेनः, भामा सत्यभामा" इति **न्यायात्** । महच्च तदर्हं च **महार्हम्** । **रोहणाचले** उद्भवः—उत्पत्तिर्यस्य तदिति **रोहणोद्भवम्**, अत एव **रोहणद्रुमः** । आह च—

चन्दनं गन्धसारं च महार्हं श्वेतचन्दनम् ।
भद्रश्रीकं मलयजं गौशीर्षं तैलपर्णिकम् ॥

[ ] इति ।

एतस्य लोके 'चन्दन' इति प्रसिद्धिः ॥२३॥

अथ बर्बरके श्वेतं निर्गन्धं बर्बरोद्भवम् ।

"बर्ब गतौ" बर्बति **बर्बरम्**, "ऋच्छि-चटि-" [हैमोणादिसू० ३९७] इत्यरः, **बर्बर**देशोत्पन्नत्वाद्वा, स्वार्थिके के **बर्बरकम्**, तत्र । **श्वेतं** धवलत्वात् । निर्गतो गन्धोऽस्मात् तदिति **निर्गन्धम्** । **बर्बरदेशे** उद्भवः—उत्पत्तिर्यस्य तद् **बर्बरोद्भवम्**, चन्दनविशेषोऽयम् । लोके तु एतस्य 'बाबरउ' इति प्रसिद्धिः ।

स्याद् रक्तचन्दने क्षुद्रचन्दनं भास्करप्रियम् ॥२४॥
ताम्रसारं रक्तसारं लोहितं हरिचन्दनम् ।

रक्तं च तच्चन्दनं च **रक्तचन्दनम्**, तत्र । क्षुद्रं च तत् चन्दनं च **क्षुद्रचन्दनम्** । भास्करस्य प्रियं **भास्करप्रियम्** ॥२४॥

ताम्रेषु—अरुणेषु सारं **ताम्रसारम्** । रक्तेषु सारं **रक्तसारम्** । 'रुहं जन्मनि" लत्वे **रोहति लोहितम्**, "हृ-श्या-रुहि-" [हैमोणादिसू० २१०] इतीतः, रक्तत्वाद्वा । हरेः—इन्द्रस्य चन्दनं **हरिचन्दनम्**, पुं-क्लीबलिङ्गः; हरि—कपिलं वा, तच्चातिशीतं पीतं चाहुः । आह च—

रक्तचन्दनमप्यन्यल्लोहितं हरिचन्दनम् ।
रक्तसारं ताम्रसारं निर्दिशेत् क्षुद्रचन्दनम् ॥

[ ] इति ।

एतस्य लोके 'रतांजणी' इति प्रसिद्धिः ।

कुचन्दने तु पत्राङ्गं पतङ्गं पट्टरञ्जनम् ॥ २५ ॥
सुरङ्गकं रक्तकाष्ठं पत्तूरं तिलपर्णिका ।

कौ चन्दनं **कुचन्दनम्**, तत्र । पत्रेष्वङ्गति **पत्राङ्गम्** । पतति-याति रङ्गोऽस्य **पतङ्गः**, "पति-तमि-" [हैमोणादिसू० ९८] इत्यङ्गः । "अपभ्रंशोऽयम्" इत्येके । पट्टस्य रञ्जनं **पट्टरञ्जनम्** ॥२५॥

शोभनो रङ्गोऽस्येति **सुरङ्गम्**, के **सुरङ्गकम्** । **सुरक्तक**मित्यपि । रक्तं च तत् काष्ठं च **रक्तकाष्ठम्** । "पल्ट गतौ" पत्यते **पत्तुरम्**, "सिन्दूर-कर्चूर-पत्तूर-धत्तूरादयः" [हैमोणादिसू० ४३०] इत्यूरे निपात्यते । तिलस्येव पर्णान्यस्या**स्तिलपर्णी**, सैव **तिलपर्णिका** । "**तिलपर्णी** नदी आकरो अस्या अस्ति" **इत्यपरे** ऊचिरे । आह च—

कुचन्दनं पतङ्गं च रक्तकाष्ठं सुरक्तकम् ।
पत्तूरं पट्टरागं च पट्टरञ्जनमेव च ॥
[ ] इति ।

अमरोऽप्याह —

तिलपर्णी तु पत्राङ्गं रञ्जनं रक्तचन्दनम् ।
कुचन्दनं च [का० २ वर्ग ६ श्लो० १३२] इति ।
पत्राङ्गनामानि । लोके तु 'पतंग' इति प्रसिद्धिः । सर्वे एते चन्दनविशेषाः ।

यदवादि —

सर्वाण्येतानि तुल्यानि रसतो वीर्यतोऽपि च ।
गन्धेन च विशेषः स्यात् पूर्वं श्रेष्ठतमं गुणैः ॥
[ ] इति ।

अथ द्रुमोत्पले व्याधः परिव्याधः सुगन्धिकः ॥ २६ ॥

द्रुमजानि उत्पलानीव पुष्पाण्यस्य **द्रुमोत्पलः**, तत्र । "व्यधंच् ताडने" विध्यते अम्भसा **व्याधः**, परिविध्यते **परिव्याधः** । उभयत्र "तन्-व्यधी—" [सिद्ध० ५.१.६४] इति णः । शोभनो गन्धोऽस्त्यस्य **सुगन्धिकः**, "अतोऽनेकस्वरात्" [सिद्ध० ७.२.६] इति कः । एतस्य लोके 'कणयर' इति प्रसिद्धिः ॥२६॥

निर्गन्धेऽस्मिन् कर्णिकारो निषीधः पीतपुष्पकः ।

अस्मिन् निर्गन्धे द्रुमोत्पले कर्णिकामियर्त्ति **कर्णिकारः** । निषिध्यते अम्भसेति **निषीधः**, पृषोदरादित्वात् । पीतानि पुष्पाण्यस्य **पीतपुष्पः**, स्वार्थिके के **पीतपुष्पकः** । गन्धरहितकणयरनामानि ॥

पुन्नागे तु महानागः केसरो रक्तकेसरः ॥ २७ ॥
देववल्लभ-कुम्भीकौ तुङ्गः पुरुषनामकः ।

पूजितः पुमान् **पुन्नागः**, स इव प्राधान्यात्, [तत्र] । महानाग इव **महानागः**, स इव प्राधान्यात्; महांश्चासौ नागश्चेति वा । प्रशस्ताः केसराः सन्त्यस्य **केसरः**, अभ्रादित्वादः । रक्ताः केसरा अस्य **रक्तकेसरः** ॥२७॥

देवानां वल्लभो **देववल्लभः**, **कुम्भीको** रसाधारत्वात्, अनयोर्द्वन्द्वः । **तुङ्गः** उच्चैस्तरत्वात्; "तमूच् काङ्क्षायाम्" ताम्यते वा **तुङ्गः**, "कमितमि-शमिभ्यो डित्" [हैमोणादिसू० १०७] इति डिदुङ्गः । **पुरुषनामकः** पुरुषाख्यत्वात् । यदवादीन्दुना—

तुङ्गः पुष्पकसंज्ञः स्यात् पुन्नागो रक्तकेसरः ।
पुन्नागः पुरुषाह्वश्च केषाञ्चित् पद्मकेसरः ॥
[ ] इति ।

अमरेणापि—

पुन्नागे पुरुषस्तुङ्गः केसरो देववल्लभः ॥ [का० २ वर्ग ४ श्लो० २५] इति । एतस्य लोके 'पुन्नाग' इति प्रसिद्धिः ।

अगस्त्ये तु बहुसेनः शुकनाशो मुनिद्रुमः ॥ २८ ॥

अगं स्तम्नाति **अगस्त्यः**, "अग-पुलाभ्यां स्तम्भेर्डित्" [हैमोणादिसू० ३६३] इति डिद् यः, [तत्र] । बह्व्यः सेना अस्य **बहुसेनः** । शुकं नाशयति **शुकनाशः**; शुकस्य नाशोऽस्मादिति वा । मुनीनां द्रुमो **मुनिद्रुमः** । आह च —

अगस्त्याह्वो बङ्ग(?बहु)सेनो मधु शिग्रुर्मुनिद्रुमः ।
[ ] इति ।

एतस्य लोके 'अगथियउ' इति प्रसिद्धिः ॥ २८ ॥

करवीरे कणवीरः श्वेतपुष्पोऽश्वमारकः ।
प्रतिहासः शतप्रासोऽश्वरोहः कुमुदोद्भवः ॥ २९ ॥

---

१ अथागस्त्ये बङ्गसेनः नि० ॥ २ °रोधः कु नि० ॥

किरति–क्षिपति **करवीरः**, "जम्बीरा-ऽऽभीर-" [हैमोणादिसू० ४२२] इतीरे निपात्यते; कृणोति–हिनस्ति **करः**, स वीर इव मारकत्वाद्वा **करवीरः**; कराः–कर्तारो वीरा अत्रेति वा, तत्र । कणा वीरा इव अस्य **कणवीरः**; "कणृ आर्तस्वरे" इति **बोपदेवधातुपाठोक्तेः** कणन्ति कणाः, कणाः वीरा अस्मादिति वा । श्वेतानि पुष्पाण्यस्य **श्वेतपुष्पः** । अश्वान् उपभुक्तो मारयति **अश्वमारकः** । प्रतीपः–अश्वघ्नत्वाद् हासः–विकासोऽस्य **प्रतिहासः** । शतं–बहूनि प्रासाः–कुन्ता इव पुष्पाण्यस्य **शतप्रासः** । अश्वं रोहति **अश्वरोहः** । कुमुदमिव उद्भवोऽस्य **कुमुदोद्भवः** । आह च–

शतकुन्तः श्वेतपुष्पः प्रतिहासोऽश्वरोहकः ।
[ ] इति ।

अश्वहा अश्वघ्नः श्वेतकुन्दश्च श्वेतकणवीरनामानि ॥ २९ ॥

रक्तपुष्पेऽत्र लगुडश्चण्डातश्चण्ड-गुल्मकौ ।

'अत्र' इति रक्तपुष्पे कणवीरे "लगे सङ्गे" लगति **लगुडः**, "लगेरुडः" [हैमोणादिसू० १७७] इत्युडः प्रत्ययः । चण्डमतति तीक्ष्णत्वात् **चण्डातः** । **चण्डातकोऽपि** । चण्ड इव **चण्डः** तैक्ष्ण्यात् । गुल्मं किरति–क्षिपति **गुल्मकः**, "क्वचित्" [सिद्ध० ५.१.१७१] इति डः । यदाह–

द्वितीयो रक्तपुष्पस्तु चण्डातो लगुडस्तथा ।
चण्डातको गुल्मकश्च प्रचण्डः करवीरकः ॥
गुल्महरोऽपि [ ] इति ।

रक्तकणवीरनामानि ।

तमाले तु कालस्कन्धस्तापिच्छो रञ्जनो वसुः ॥ ३० ॥

"तमूच् काङ्क्षायाम्" ताम्यति **तमालः**, "ऋ-कृ-मृ-" [हैमोणादिसू० ४७५] इत्यालः, पुं-क्लीबलिङ्गः, तत्र । कालः स्कन्धोऽस्य **कालस्कन्धः** । तापिनश्छादयति **तापिच्छः**, "क्वचित्" [सिद्ध०५.१.१७१] इति डः । पृषोदरादित्वाच्चानुस्वारागमे **तापिञ्छोऽपि** । रञ्जयति **रञ्जनः** । वसति श्यामवर्णोऽत्र **वसुः**, "भृ-मृ-तृ-त्सरि-"[हैमोणादिसू० ७१६] इत्युः । एतस्य लोके 'तमाल' इति प्रसिद्धिः ॥ ३० ॥

तमालपत्रे वैस्वाख्यं रोमसं तामसं दलम् ।

१. कालस्कन्धस्तमाले स्यात् तापि° नि० ॥ २. वस्त्राख्यं नि० ॥

तमालस्य पत्रं **तमालपत्रम्**, तत्र । **वस्वाख्यं** वसुनामत्वात् । रोमाणि स्यति **रोमसम्** । तमोऽस्त्यस्य **तामसम्**, श्यामत्वात्, ज्योत्स्नादित्वादण् । **दलम्** पत्राख्यत्वात् । यदाह—

तमालपत्रं पत्रं स्यात् पलाशं च दलं छदम् ।

[ ] इति ।

तमालपत्रनामानि ॥

सूक्ष्मैलायां चन्द्रबाला द्राविणी निष्कुटिस्त्रुटिः ॥ ३१ ॥
कपोतवर्णिका तुच्छा कोरङ्गी बहुला तुला ।

एलयति-मुखदौर्गन्ध्यं प्रेरयति **एला**, सूक्ष्मा चासौ एला च **सूक्ष्मैला**, तस्याम् । चन्द्रस्य—कर्पूरस्य बाला—पुत्रीव चमत्कारादिति **चन्द्रबाला** । द्रावयति—मुखदौर्गन्ध्यमवश्यमिति **द्राविणी**, आवश्यके णिन्निति णिन् । निष्क्रान्ता कुटेः—कोशाद् **निष्कुटिः** । "तुटत् कलहे" तुटति **त्रुटिः**, "नाम्युपान्त्य—" [सिद्ध०५.१.५४] इति किदिः, स्त्रीलिङ्गः । "त्रुटत् छेदने" रोपान्त्योऽयम्, "नाम्युपान्त्य—" [सिद्ध०५.१.५४] इति किदिप्रत्यये **त्रुटि**रित्यपि ॥ ३१ ॥

कपोतस्येव वर्णोऽस्याः **कपोतवर्णा**, स्वार्थिके के **कपोतवर्णिका** । **तुच्छा** लघीयसीत्वात् । कुरति—शब्दायते **कोरङ्गी**, "शृङ्ग-शार्ङ्गादयः" [हैमोणादिसू० ९६] इति गे निपात्यते, गौरादित्वाद् ङीः । बंहते **बहुला**, "स्था-वङ्कि-वंहि-" [हैमोणादिसू० ४८६] इति उलो न लोपश्च; बहूनि पर्णानि लाति वा । तोल्यते **तुला**, भिदादित्वात् साधुः । आह च —

सूक्ष्मैला द्राविडी तुच्छा कोरङ्गी बहुला त्रुटिः ।
एला कपोतवर्णा च चन्द्रबाला च निष्कुटिः ॥

[ ] इति ।

सूक्ष्मैलानामानि । लोके 'एलची' इति प्रसिद्धिः ।

स्थूलैलायां बृहदेला पत्रैला त्वक्सुगन्धिका ॥ ३२ ॥
त्रिदिवोद्भवा पृथ्वीका कर्णिका त्रिपुटा पुटा ।

१. द्राविडी नि०॥ २ भद्रैला नि० ॥

स्थूला चासौ एला च **स्थूलैला** तस्याम् । बृहती चासौ एला च **बृहदेला** । पत्रोपलक्षिता एला **पत्रैला** । त्वचा सुगन्धिका **त्वक्सुगन्धिका** ॥ ३२ ॥

त्रिदिवे–स्वर्गे उद्भवः–उत्पत्तिर्यस्याः सा **त्रिदिवोद्भवा** । पृथ्वी प्रतिकृतिः **पृथ्वीका** बहुपर्णत्वात्, "तस्य तुल्ये कः संज्ञा-प्रतिकृत्योः" [सिद्ध०७.१.१०८] इति कः । कर्णायति **कर्णिका,** णके आप् । त्रीणि पुटान्यस्याः **त्रिपुटा** त्र्यस्रिः । पुटानि सन्ति अस्याः **पुटा,** अभ्रादित्वादः । आह च — 5

भद्रैला बृहदेला च त्रिदिवा त्रिपुटोद्भवा ।
स्थूलैला त्वक्सुगन्धा च पृथ्वीका धान्यका पुटा ॥

[ ] इति ।

बृहदेलानामानि । लोके तु 'कङ्कोली एला' इति प्रसिद्धिः । 10

कर्पूरे स्याद् घनसारो हिमाह्वो हिमवालुका ॥ ३३ ॥
सिताभ्रः शीतलरजः स्फटिकश्चन्द्रनामकः ।

कल्पते **कर्पूरः**, पुं-क्लीबलिङ्गः, "मी-मसि-" [हैमोणादि सू०४२७] इत्युरः, [तत्र] । घनस्येव सारोऽस्य **घनसारः** । हिमस्याऽऽह्वाऽस्य **हिमाह्वः**, शीतलत्वात् । हिमा–शीता चासौ वालुका च **हिमवालुका** ॥ ३३ ॥ 15

सिताभ्रसदृशत्वात् **सिताभ्रः**, दन्त्यादिः । शीतलं रजोऽस्य **शीतलरजः** । स्फटिक इव **स्फटिकः**, निर्मलत्वात् । चन्द्रस्य नाम अस्य **चन्द्रनामा**, स्वार्थिके के **चन्द्रनामकः**, आह्लादकत्वात् । [चन्द्रपर्याया अपि] । आह च –

कर्पूरः शीतलरजः सिताभ्रः स्फटिको हिमः ।
चन्द्रस्तुषारस्तुहिनः शशीन्दु-हिमवालुकाः ॥ 20

[ ] इति ।

कर्पूरनामानि । लोके 'कपूर' इति प्रसिद्धिः ।

कक्कोलके कटुफलं कौलकं माधवोषितम् ॥ ३४ ॥
कोलं कोशफलं कोरं मारीचं द्वीपमित्यपि ।

कचते–दीप्यते **कक्कोलम्**, "पिञ्छोल-कल्लोल-" [हैमोणादि सू०४९५] इत्योले 25 निपात्यते; "ककि लौल्ये, कुकतेऽत्र कं कोलति–संस्त्यायति वा" इति **क्षीरस्वामी;**

---

१ कर्पूरे घनसारः स्याद् हिमा° नि० ॥ २ कोमकं मागधोत्थितम् नि० ॥

स्वार्थिके के **कक्कोलकम्**, तत्र । कटु-क्षारं फलमस्य **कटुफलम्** । कोलति-संस्त्यायति **कोलम्**, स्वार्थिके के **कोलकम्** । माधवे उष्यते स्म **माधवोषितम्** ॥३४॥

कोलति **कोलम्**, अच् । कोशे फलान्यस्य **कोशफलम्** । कोलशब्दस्य र-लयोरैक्ये **कोरम्** । "मृंत् प्राणत्यागे" म्रियते अनेन **मारीचम्**, "म्रियतेरीचण्" [हैमोणादिसू० ११८] इतीचण्, पुं-क्लीबलिङ्गः । द्वीपमिव **द्वीपम्** । आह च—

कक्कोलकं कृतफलं कोलकं कटुकाफलम् ।
तैलं कटुफलं द्वीपं मारीचं माधवोषितम् ॥

[ ] इति ।

एतस्य लोके 'कङ्कोल' इति प्रसिद्धिः ।

लवङ्गे शिखरं दिव्यं भृङ्गारं वारिजं लवम् ॥ ३५ ॥
श्रीपुष्पं श्रयाह्वयं देवपुष्पं चन्दनपुष्पकम् ।

"लूगृश् छेदने" लूयते **लवङ्गम्**, "पति-तमि-" [हैमोणादिसू० ९८] इत्यङ्गः, तत्र । "शाखृ व्याप्तौ" शाखति **शिखरम्**, "शाखेरिदेतौ चातः" [हैमोणादि सू० ४००] इत्यरः, धातोराकारस्य चेकारः; शिखराकारत्वाद्वा । दिवि भवं **दिव्यम्**, "द्युप्रागपागुदक्प्रतीचो यः" [सिद्ध०६.३.८] इति यः । भ्रियते **भृङ्गारम्**, "द्वार-शृङ्गार-" [हैमोणादिसू०४११] इत्यारे निपात्यते। वारिणि-जले जातं **वारिजम्**, "क्वचित्" [सिद्ध०५.१.१७१] इति डः । लूयते **लवम्** ॥ ३५ ॥

श्रियाः पुष्पं **श्रीपुष्पम्** । श्रिया आह्वयो यस्य तत् **श्रयाह्वयम्** । देवं-द्युतिमद् देवानां वा पुष्पं **देवपुष्पम्** । चन्दनस्य पुष्पम् **चन्दनपुष्पम्**, स्वार्थिके के **चन्दनपुष्पकम्** । आह च—

लवङ्गं देवकुसुमं भृङ्गारं शिखरं लवम् ।
दिव्यं चन्दनपुष्पं च श्रीपुष्पं वारिसम्भवम् ॥

[ ] इति ।

एतस्य लोके 'लवङ्ग' इति प्रसिद्धिः ।

नलिकायां कपोतांह्रिर्निर्मध्या शुषिरा नटी ॥ ३६ ॥
अञ्जनकेशी धमनी शून्या विद्रुमवल्ल्यपि ।

---

१ धमन्यञ्जनकेशी च शू० नि० ॥

"णल गन्धे" नलति **नली**, स्वार्थिके के **नलिका**, तस्याम् । कपोतांहूरिव **कपोतांहूः**, नलिकत्वात् । निर्गतं मध्यमस्या **निर्मध्या** । शुषिः—छिद्रमस्या अस्ति **शुषिरा**, "मध्वादिभ्यो रः" [सिद्ध० ७.२.२६] इति रः । नटति—नृत्यति वायुना **नटी**, नर्तकीत्वात्, अच्, गौरादित्वाद् ङीः ॥ ३६ ॥

अञ्जनाभाः केशा अस्याः **अञ्जनकेशी** । धमनीव **धमनी**, शौषिर्यात् । शुने हिता **शून्या**, "शुनो वश्चोदूत्" [सिद्ध० ७.१.३३] इति यः । विद्रुमवल्लीव **विद्रुमवल्ली** नखीयम् । आह च—

नलिका विद्रुमलता कपोतचरणा नली ।
शुषिरा धमनी शून्या निर्मध्या नर्तकी नटी ॥

[ ] इति ।

नलिकानामानि ।

अतिमुक्ते मण्डकः स्यात् पुण्ड्रको भ्रमरोत्सवः ॥ ३७ ॥
पराश्रयः सुवसन्तः कामुको माधवी लता ।

अतिक्रान्तो मुक्तान्—विरक्तान् **अतिमुक्तः**, तत्र । मण्डयति **मण्डकः**, णकः । **पुण्ड्रदेशोद्भवत्वात् पुण्ड्रः**, स्वार्थिके के **पुण्ड्रकः** । भ्रमराणामुत्सवोऽस्मादिति **भ्रमरोत्सवः** ॥३७॥

परः—श्रेष्ठः आश्रयोऽस्य **पराश्रयः**; परैराश्रीयते वा । शोभनो वसन्तोऽस्मादिति **सुवसन्तः**[1] । कमनशीलः **कामुकः**, "शृ-कम—" [सिद्ध० ५.२.४०] इत्युकण् । मधौ—वसन्ते भवा **माधवी**, "भर्तु-सन्ध्यादेरण्" [सिद्ध० ६.३.८९] इत्यण् । लाति लता, "पृषि-रञ्जि-" [हैमोणादिसू० २०८] इति किदतः । आह च—

अतिमुक्तः पुण्ड्रकः स्याद् वासन्ती माधवी लता ।
[अमर० का०२ वर्ग४ श्लो०७२] इति ।

अन्योऽप्याह—

अतिमुक्तो माधवी च सुवसन्तः पराश्रयः ।
अतिमुक्तः कामुकश्च मण्डको भ्रमरोत्सवः ॥

[ ] इति ।

---

१ सुवासन्ती का° नि० ॥

अतिमुक्तनामानि । लोके 'अमीतउ' इति प्रसिद्धः ।

पिप्पले बोधिरश्वत्थः श्रीवृक्षश्चलपत्रकः ॥ ३८ ॥
मङ्गल्यः केशवावासः श्यामलो द्विरदाशनः ।

"पल गतौ" पलति **पिप्पलः**, "पॄ-पलिभ्यां टित् पिप् च पूर्वस्य" [हैमो-णादिसू० ११] इति अः प्रत्ययः पिप् च पूर्वस्य; पिप्पलानि—**देश्यां** पत्राणि, तानि सन्त्यस्य वा, अभ्रादित्वादः । "अपि प्लवते" इति **नैरुक्ताः** । "एवमाद्याः प्राकृता अपि" इति **धन्वन्तरिः** । यदाह—

प्रायो जनाः सन्ति वनेचराद्या गोपादयः प्राकृतनामतज्ज्ञाः ।
प्रयोजनार्था वचनप्रवृत्तिर्यतस्ततः प्राकृत इत्यदोषः ॥
[ ] इति ।

किञ्च—

रस-वीर्य-विपाकेभ्यो मूलात् पुष्पात् फलाद् दलात् ।
आकाराद् देश-कालादेर्वनौषध्यर्थमुन्नयेत् ॥
[ ] इति ।

तत्र । बुध्यते **बोधिः**, "किलि-पिलि-" [हैमोणादि सू० ६०८] इति इः, बोधिसत्त्वाख्यः सर्वोपकारित्वात् तनुवृत्तत्वाद् गुरुपर्णत्वाच्च । अश्वेषु तिष्ठति **अश्वत्थः** अश्वाश्रयः, पृषोदरादित्वात् सस्य तत्वम् । श्रिया युक्तो वृक्षः **श्रीवृक्षः** । स्वल्पवातेऽपि चलानि पत्राण्यस्य **चलपत्रः**, स्वार्थिके के **चलपत्रकः** ॥३८॥

मङ्गले साधुर्**मङ्गल्यः**, "तत्र साधौ" [सिद्ध० ७.१.१५] इति यः । केशवस्य आवासः केशवः आवसत्यत्रेति वा **केशवावासः** । अत एव **कृष्णावासः** । श्यामो वर्णोऽस्त्यस्य **श्यामलः**, सिध्मादित्वाद् लः । द्विरदस्य अशनः— भक्तं **द्विरदाशनः**, पुं-क्लीबलिङ्गः । आह च—

पिप्पलः केशवावासश्चलपत्रः पवित्रकः ।
मङ्गल्यः श्यामलोऽश्वत्थो बोधिवृक्षो गजाशनः ॥
[ ] इति ।

एतस्य लोके 'पीपल' इति प्रसिद्धिः ।

गर्दभाण्डे कन्दरालश्छायावृक्षः कमण्डलुः ॥३९॥
प्लक्षो वटः प्लवः शुङ्गी सुपार्श्वश्चारुदर्शनः ।
कपीतनः कपीतः स्यात् पीतन-प्लवकावपि ॥४०॥

गर्दभ इवाण्डमस्य **गर्दभाण्डः**; गर्दं—सशब्दं भाण्डमस्येति वा, तत्र । कन्दरां लाति **कन्दरालः**, शोणादित्वात् कन्दराशब्दस्याबन्तत्वम् । छायायुक्तश्छायाया वा वृक्षः **छायावृक्षः** । कं—पानीयमनिति—प्राणित्यस्मिन्निति **कमण्डलुः**, "गूहलु-गुग्गुलु-कमण्डलवः" [हैमोणादिसू० ८२४] इति आलुप्रत्यये निपात्यते, निपातनाच्च कम्पूर्वादनितेर्डोऽन्तो ह्रस्वश्च प्रत्ययादेः, पुंल्लिङ्गः ॥३९॥

प्लक्षति—अधो गच्छति **प्लक्षः**; "प्लुष् दाहे" प्लोषत्यशिवमिति वा, "प्लुषेः प्लष् च" [हैमोणादिसू० ५६६] इति सः प्रत्ययो धातोश्च प्लष् इत्यादेशः । वटति—वेष्टयति मूलैर्**वटः**, अच् , त्रिलिङ्गः । ' प्लुङ् गतौ ' प्लवते अशिवमस्मादिति **प्लवः** । शाम्यति **शुङ्गी**, " कमि-तमि- " [हैमोणादिसू० १०७] इति डिदुङ्गः, गौरादित्वाद् ङीः । शोभनं पार्श्वमस्य **सुपार्श्वः** । चारु—मनोहरं दर्शनमस्य **चारुदर्शनः** । कं पीतयति **कपीतनः**; " इण्क् गतौ " कपीन् एति वा, पृषोदरादित्वात् । कं पीतयति **कपीतः**, अच् । कपीतनशब्दसम्बन्धिककारस्य पृषोदरादित्वाल्लोपे **पीतनः**; पीतयति वा **पीतनः** । प्लवते वातेन **प्लवकः** । आह च—

प्लक्षः कपीतनः शुङ्गी सुपार्श्वश्चारुदर्शनः ।
प्लवको गर्दभाण्डश्च कमण्डलुर्वटः प्लवः ॥

[ ] इति ।

अमरोऽपि—

गर्दभाण्डे कन्दराल-कपीतन-सुपार्श्वकाः ।

[का० २ वर्ग ४ श्लो० ४३] इति ।

गर्दभाण्डनामानि । लोके तु ' पींपरी ' इति प्रसिद्धिः ॥४०॥

पर्कटयां पर्कटी प्लक्षः सतीदो लक्षणो जटी ।

" पृचैप् सम्पर्के " पृच्यते **पर्कटी**, " कपट-कीकटादयः " [हैमोणादिसू० १४४] इत्यटे निपात्यते, गौरादित्वाद् ङीः । यत् **शाश्वतः**—

१ कर्पटी पर्कटी प्लक्षः सतीदो लक्षणे नटी नि०॥

विज्ञेया पर्कटी प्लक्षः प्लक्षः पिप्पलपादपः ।
[ ] इति ।

तस्याम् । पर्कटाख्यं फलमस्त्यस्य **पर्कटी**, इन्नन्तोऽयम् । यद् **वाचस्पतिः**—

"फलं त्वेतस्य पर्कटम्" [ ] इति ।

प्लक्षशब्दस्य साधना अत्र पूर्ववत् । सतीं दयते—पालयति **सतीदः** । लक्षयति **लक्षणः** । जटाः सन्त्यस्य **जटी**, शिखादित्वादिन् ।

वटे वैश्रवणावासो न्यग्रोधो बहुपाद् ध्रुवः ॥ ४१ ॥
स्कन्धजन्मा रक्तफलः क्षीरी शुङ्गी वनस्पतिः ।

वटति—वेष्टयति मूलैर्**वटः**, तत्र । वैश्रवणस्य—धनदस्य आवासो **वैश्रवणावासः** । न्यग् रोहति **न्यग्रोधः**, "वीरुन्न्यग्रोधौ" [सिद्ध० ४.१.१२१] इति धत्वे साधुः ; न्यक्—तिर्यग्मार्गं मूलै रुणद्धि वा । बहवः पादाः—मूलान्यस्य **बहुपाद्**, "सुसङ्ख्यात्" [सिद्ध० ७.३.१५०] इति पाद्भावः । "ध्रुंत् गति-स्थैर्ययोः" ध्रुवति **ध्रुवः**, "तुदादिभ्यि-" [हैमोणादिसू० ५] इति किदः प्रत्ययः ॥ ४१ ॥

स्कन्धात्—प्रकाण्डाद् जन्माऽस्य **स्कन्धजन्मा** । रक्तानि फलान्यस्य **रक्तफलः** । क्षीरमस्त्यस्य **क्षीरी** । शुङ्गीशब्दस्य साधना प्राग्वत् । वनस्य पतिः **वनस्पतिः**, वर्चस्कादित्वात् साधुः । आह च—

वटो रक्तफलः शुङ्गी न्यग्रोधः स्कन्धजो ध्रुवः ।
क्षीरी वैश्रवणावासो बहुपादो वनस्पतिः ॥
[ ] इति ।

न्यग्रोधनामानि । लोकेऽस्य 'वड्ड' इति प्रसिद्धिः ।

उदुम्बरे जन्तुफलो यज्ञाङ्गो हेमदुग्धकः ॥ ४२ ॥
सदाफलो वसुवृक्षः श्वेतवल्को मशक्यपि ।

"उन्दी (? उन्दैप्) क्लेदने" उनत्ति **उदुम्बरः**, "तीवर-धीवर-" [हैमोणादिसू० ४४४] इति वरटि निपात्यते, निपातनाद् उन्देर्धातोः किदुम् चान्तः ; उल्लङ्घितोऽम्बर इति वा, पृषोदरादित्वाद् उत्वम्, तत्र । मशकगर्भाणि फलान्यस्य **जन्तुफलः** । अत एव **कृमिफल** इति पर्यायेणोक्तः । यज्ञ एवाङ्गोऽस्य **यज्ञाङ्गः** । हेमवर्णं दुग्धमस्य **हेमदुग्धः**, के **हेमदुग्धकः** ॥ ४२ ॥

सदा फलति **सदाफलः** । वसोर्वृक्षो **वसुवृक्षः** । श्वेतो वल्कः—छल्लिरस्य **श्वेतवल्कः** । मशकाः सन्त्यस्य **मशकी** । आह च—

क्षीरवृक्षे हेमदुग्ध उदुम्बर-सदाफलौ ।
अपुष्प-फलसम्बद्धो यज्ञाङ्गः श्वेतवल्कलः ॥

[ ] इति । 5

इन्दुरपि जगाद—

उदुम्बरस्तु यज्ञाङ्गः सुचक्षुः श्वेतवल्कलः ।
हेमदुग्धः कृमिफलः क्षीरवृक्षः सकाञ्चनः ॥

[ ] इति ।

उदुम्बरनामानि । लोके 'उंबरा' इति प्रसिद्धिः । 10

काकोदुम्बरिकायां तु फाल्गुनी फल्गुवाटिका ॥ ४३ ॥
फल्गुराजी फलभारी मलयूर्जघनेफला ।

काकप्रिया उदुम्बरिका **काकोदुम्बरिका**, तस्याम् । फल्गुनस्येयं **फाल्गुनी**, "तस्येदम्" [सिद्ध० ६.३.१६०] इत्यण् । फल्गुश्चासौ वाटिका च **फल्गुवाटिका** ॥४३॥

फलति **फल्गुः**," फलि-वल्यमेर्गुः " [हैमोणादिसू० ७५८] इति गुः । अजति 15 **आजिः**,"पादाद्यात्यजिभ्याम्" [हैमोणादिसू० ६२०] इति णिदिः, "पदः पादस्याऽऽज्याति-गोपहते" [सिद्ध० ३.२.९५] इति निर्देशाद् ङीभावाभावः, ङ्यां **आजी** । फलानि बिभर्ति **फलभारी**, "कर्मणोऽण्" [सिद्ध० ५.३.१४] इत्यण्, गौरादित्वाद् ङीः । "युणि जुगुप्सायाम्" मलं—श्वित्रं यावयते **मलयूः**, पृषोदरादित्वात् । जघने—बुध्ने फलान्यस्याः **जघनेफला**, सप्तम्यलुक् । एते स्त्रीलिङ्गाः । आह च— 20

काकोदुम्बरिका फल्गुराजी [च] फल्गुवाटिका ।
फाल्गुनी फलभारी च मलयूः श्वित्रभेषजम् ॥

[ ] इति ।

काकोदुम्बरिकानामानि । लोके 'कालुम्बरी' इति प्रसिद्धिः ।

राजादने तु राजन्या क्षीरिका प्रियदर्शनः ॥४४॥ 25
कपिप्रियो दृढस्कन्धो मधु-रौलफलो नृपः ।

---

१ फलाराजी फलभारी फलयु° नि० ॥ २ °राजफलो नि० ॥

राज्ञाम् अदनं मृष्टत्वाद् **राजादनम्**, पुं-क्लीबलिङ्गः, तत्र । राज्ञे हिता **राजन्या**, "तस्मै हिते" [सिद्ध० ७.१.३५] इति हितेऽर्थे यः । क्षीरमस्त्यस्याः **क्षीरिका**, क्षीरस्वादुत्वात्, "अतोऽनेकस्वरात्" [सिद्ध० ७.२.६] इतीकः । प्रियं दर्शनमस्य **प्रियदर्शनः** ॥४४॥

कपेः प्रियः **कपिप्रियः** । दृढः स्कन्धः—प्रकाण्डोऽस्य **दृढस्कन्धः** । ['मधुरालफलः'] मधुरालाभ्यां फलमिति योज्यते, ततः मधु—मृष्टं फलमस्य **मधुफलः**, रालवर्गे फलमस्य **रालफलः** । नृपप्रियत्वाद् **नृपः** । आह च —

क्षीरिकोक्ता च राजन्या क्षीरभृद् रूपको नृपः ।
राजादनो दृढस्कन्धः कपीष्टः प्रियदर्शनः ॥
[ ] इति ।

राजादननामानि । लोके तु 'रायणी' इति प्रसिद्धिः ।

पियाले तु राजवृक्षो बहुवल्को धनुष्पटः ॥ ४५ ॥
सन्नकद्रुः खरस्कन्धश्चारस्तापसवल्लभः ।

"पां पाने" पीयते **पियालः**, "कुलि-पिलि-विशि-विडि-मृणि-कुणि-पी-प्रीभ्यः कित्" [हैमोणादिसू० ४७६] इत्यालः प्रत्ययः, तत्र । राज्ञां वृक्षो **राजवृक्षः** । बहवो वल्का अस्य **बहुवल्कः** । धनुष इव पटः—विस्तारोऽस्य **धनुष्पटः** ॥४५॥

सन्नकः—खरो द्रुः—स्कन्धोऽस्य **सन्नकद्रुः** । खरः—कठोरः स्कन्धोऽस्य **खरस्कन्धः** । "चर भक्षणे च" चर्यते—अद्यते **चरः**, चर एव **चारः**, प्रज्ञादित्वादण् । तापसानां वल्लभः **तापसवल्लभः** । आह च—

पियालोऽथ खरस्कन्धश्चारो बहुलवल्कलः ।
सन्नकद्रुश्चापपटो ललनस्तापसप्रियः ॥
[ ] इति ।

चापपट इति पर्यायेणोक्तः । पियालनामानि । लोके 'चारु' इति प्रसिद्धिः ।

आम्रातके वर्षपाकी कपिचूतः कपिप्रियः ॥ ४६ ॥
कपीतनः पीतनकस्तनुक्षीरोऽम्लपाटकः ।
शुङ्गी कपिरसाढ्यश्च दूष्यफलो बिभीषणः ॥ ४७ ॥

"अम शब्द-भक्त्योः" अमति **आम्रातकः**, "श्लेष्मातका-ऽऽम्रातक-" [हैमोणादिसू० ८३] इति निपात्यते; आम्रमतति कपिचूतत्वादिति वा, तत्र । वर्षेण पाकोऽस्त्यस्य **वर्षपाकी** । कपेश्चूतः—आम्रः **कपिचूतः** । कपेः प्रियः **कपिप्रियः** ॥ ४६ ॥

कपीस्तनोति **कपीतनः**। पीतीक्रियते अनेन पीतयति वा **पीतनः**, स्वार्थिके के **पीतनकः**। "कपीतनशब्दस्य **पीतनो**ऽपभ्रंशे" इत्येके। तनु—तुच्छं क्षीरमस्य **तनुक्षीरः**। अम्लं पाटयति **अम्लपाटकः**। पटधातुर्भासार्थश्चौरादिकः। शाम्यति **शुङ्गी**, "कमि-तमि-" [हैमोणादिसू० १०७] इति डिदुङ्गः, गौरादित्वाद् ङीः। **यन्महेश्वरः**—

शुङ्गी वटा-ऽऽम्रातकयोः कर्कव्यामपि विश्रुता।
[ ] इति।

कपिरसेन आढ्यः **कपिरसाढ्यः**। दूष्यं फलमस्य **दूष्यफलः**। भीषि बिभीषयते **बिभीषणः**, "नन्द्यादिभ्योऽनः" [सिद्ध० ५. १. ५२] इत्यनः। आह च—

आम्रातकः पीतनकः कपिचूतोऽम्लपाटकः।
शुङ्गी कपिरसाढ्यश्च तनुक्षीरः कपिप्रियः॥
[ ] इति।

आम्रातकनामानि। लोके 'अम्बाडओ' इति प्रसिद्धिः॥ ४७॥

अर्के विकीरणोऽर्काह्वो जम्भला-ऽऽस्फोट-विष्किराः। क्षीरा-ऽर्कपर्णः

अर्क्यते—स्तूयतेऽर्कः। यदाह **श्रीधरः**—

"अर्कः सूर्येऽर्कपर्णे च" [ ] इति।

महेश्वरोऽपि—

"अर्कोऽर्कपर्णे स्फटिके" [ ] इति।

तत्र। विकिरति पुष्पाणि **विकीरणः**, पृषोदरादित्वात् साधुः। अर्कः—सूर्यस्तस्य आह्वा—नाम अस्य **अर्काह्वः**। तेन **भास्करः रवि**रित्यादयोऽप्यवसेयाः। जम्भं लाति **जम्भलः**। "स्फुटत् विकसने" आस्फुटति पुष्पैः **आस्फोटः**, ञ्णिति गुणः, अच् (? घञ्) प्रत्ययः। विकिरति **विष्किरः**, "वौ विष्किरो वा" [सिद्ध० ४. ४. ९६] इति सडागमः। उपलक्षणोऽयम्, तेनान्यत्रापि। 'क्षीरा-ऽर्कपर्णः' इति क्षीरा-ऽर्कयोः पर्ण इति सम्बध्यते, तेन क्षीरं पर्णेऽस्य **क्षीरपर्णः**, अर्कभानि पर्णान्यस्य **अर्कपर्णः**। आह च—

अर्कः सूर्याह्वयः पुष्पी विष्किरोऽथ विकीरणः।
जम्भलः क्षीरपर्णः स्यादास्फोटो भास्करो रविः॥
[ ] इति।

एतस्य लोके 'आकु' इति प्रसिद्धिः। तन्नामानि—

राजार्कै त्वलर्को गणरूपकः ॥ ४८ ॥
एकाष्ठीलः सदापुष्पी मन्दारश्च प्रतापसः ।

राजा चासौ अर्कश्च **राजार्कः**, श्वेतोऽयम् , तत्र । शुक्लोऽर्कः **अलर्कः**, पृषोदरादित्वात् साधुः; अलति–भूषयतीति वा, "निष्क-तुरुष्क-" [हैमोणादिसू० २६] इति के निपात्यते । यत् **श्रीधरः**—

"अलर्को धवलार्के स्यात्" [ ] इति ।

गणाः–बहवो रूपाण्यस्य **गणरूपः**, स्वार्थिके के **गणरूपकः** ॥ ४८ ॥

एकोऽष्ठीलः–मज्जाऽस्य **एकाष्ठीलः** । सदा पुष्पाणि सन्त्यस्य **सदापुष्पी** । मन्दान् इयर्ति **मन्दारः**; मन्दा आरा अस्य वा । प्रतापं स्यति **प्रतापसः**, "षोंच् अन्तकर्मणि" इत्यस्माद् डप्रत्ययः । आह च—

राजार्को वसुकोऽन्योऽर्को मन्दारो गणरूपकः ।
एकाष्ठीलः सदापुष्पी सुधा-ऽलर्कः प्रतापसः ॥
[ ] इति ।

एतस्य लोके 'आकुमन्दारु' इति प्रसिद्धिः । **यदमरः**—

अर्काह्व-वसुका-ऽऽस्फोट-गणरूप-विकीरणाः ॥
मन्दारश्चार्कपर्णेऽत्र शुक्लेऽलर्क-प्रतापसौ ।
[का० २ वर्ग ४ श्लो० ८०–८१] इति ।

स्नुँह्यां वज्रो महावृक्षोऽसिपत्रः स्नुँक् सुधा गुडा ॥४९॥
समन्तदुग्धा सीहुँण्डो गण्डीरो वज्रकण्टकः ।

"ष्णुहौच् उद्गिरणे" स्नुह्यति [क्षीरं] **स्नुहिः**, "नाम्युपान्त्य-" [हैमोणादिसू० ६०९] इति किदिः; स्नुहेति वैद्याः, तस्याम् । वज्र इव **वज्रः**, भेदकत्वात् । महाँश्चासौ वृक्षश्च **महावृक्षः** । असिः–खड्गस्तदाभानि पत्राण्यस्य **असिपत्रः** । "स्नुक् प्रस्नवने" स्नौति क्षीरं **स्नुक्** स्नुकौ स्नुकः, "द्रागादयः" [हैमोणादिसू० ८७०] इति किक्प्रत्ययान्तो निपात्यते । सुष्ठु दधाति धयन्ति एनां वा **सुधा** । "गुङ् शब्दे" गवते गूयते वा **गुडा**, "कु-गु-हु-नी-" [हैमोणादिसू० १७०] इति कित् डः; गुडति–रक्षति वा, "नाम्युपान्त्य-" [सिद्ध० ५.१. ५४] इति कः । **यच्छाश्वतः**—

---

१ °पुष्पो म° नि० ॥ २°ऽज्योऽर्को पु १ ॥ ३ त्रुट्यां वज्रो नि० ॥ ४ स्नुक् नि० ॥ ५ सेहुण्डः शण्डेरी चक्रकण्टकः नि० ॥

गुडौ गोलेक्षु-विकृती स्नुही-गुलिकयोर्गुडा ।
[ ] इति ॥ ४९ ॥

समन्ततो दुग्धमस्याः **समन्तदुग्धा**, पृषोदरादित्वात् तकारलोपः । "हुडुङ् सङ्घाते" सीति हुण्डते **सीहुण्डः, सिंहतुण्डा**पभ्रंशः । यद् **मेखला**—

"कुलिशतरुः सीहुण्डः" [ ] इति ।

गुडति **गण्डीरः**, "जम्बीरा-ऽऽभीर-" [हैमोणादिसू० ४२२] इति ईरे निपात्यते; गण्डीन् —ग्रन्थीन् ईरयति वा । वज्रवद् भेदकानि कण्टकान्यस्य **वज्रकण्टकः**। आह च—

स्नुक् सुधा च महावृक्षो गुडा निस्त्रिंशपत्रकः ।
समन्तदुग्धा गण्डीरः सीहुण्डो वज्रकण्टकः ॥
[ ] इति ।

एतस्या लोके 'थोहरी' इति प्रसिद्धिः ।

करमर्दे करमन्दः[1] कराम्लक-सुषेणकौ ॥ ५० ॥
स्थूलपर्कट[2] आविग्नः कृष्णपाकफलोऽपि च ।

करेण मृद्यते **करमर्दः**, तत्र । करेण मन्दः **करमन्दः** । करे अम्ल इव **कराम्लः**, स्वार्थिके के **कराम्लकः** । शोभना सेनाऽस्य **सुषेणः** कपिमुखाभः, "एत्यकः" [सिद्ध० २. ३. २६] इति षत्वम्, स्वार्थिके के **सुषेणकः** ॥५०॥

स्थूलं पर्कटं—फलमस्य **स्थूलपर्कटः** "ओविजैति भय-चलनयोः" उद्विजतेऽस्माद् **आविग्नः**, "दिन-नग्न-" [हैमोणादिसू० २६८] इति ने निपात्यते । कृष्णं पाके फलमस्य **कृष्णपाकफलः** । आह च—

करमर्दकमाविग्नं सुषेणं पाणिमर्दकम् ।
कराम्लं करमन्दं च कृष्णपाकफलं मतम् ॥
[ ] इति ।

सर्वेऽप्येते पुं-क्लीबलिङ्गाः । करमर्दकनामानि । लोके 'करमदा' इति प्रसिद्धिः ।

जम्बीरे जम्भलो जम्भो जम्भीरो[3] दन्तहर्षणः ॥ ५१ ॥
दन्तशठो वक्त्रशोधी गम्भीरो रोचनोऽपि च ।

"जमू अदने" जम्यते **जम्बीरः**, "जम्बीरा-ऽऽभीर-" [हैमोणादिसू० ४२२] इति ईरे निपात्यते, तत्र । "जभुङ् गात्रविनामे" जम्भते **जम्भलः**, "मुरलोरल-" [हैमोणादिसू०

---

१ °मदः कराम्रक नि० ॥ २ स्थलपर्केट नि० ॥ ३ जम्भीलो नि० ॥

४७४] इत्यले निपात्यते; जम्भान्—दन्तान् लात्यम्लत्वाद्वा । जम्भते **जम्भः**, अच्, [पुंक्लीबलिङ्गः] "कृ-शृ-पृ-पूग-मञ्जि-" [हैमोणादिसू० ४१८] इति बहुवचनादीरे **जम्भीरः**, "जम्भेर्मोहनार्थस्यैतानि रूपाणि" इति **क्षीरस्वामी** । दन्तान् हर्षयति **दन्तहर्षणः** ॥ ५१ ॥

दन्ताः शठाः अस्मादिति **दन्तशठः** । वक्त्रं शोधयत्यवश्यं **वक्त्रशोधी**, "णिन् चाऽऽवश्यका-" [सिद्ध० ५. ४. ३६] इति णिन्; वक्त्रस्य शोधो **वक्त्रशोधः** स विद्यते अस्य वा । गच्छति **गम्भीरः** "जम्बीरा-ऽऽभीर-" [हैमोणादिसू० ४२२] इतीरे निपात्यते । रोचते **रोचनः**, "इङितो व्यञ्जनाद्यन्तात्" [सिद्ध० ५.२.४४] इत्यनः । आह च—

जम्भीरो जम्भलो जम्भः प्रोक्तो दन्तशठस्तथा ।
जम्बीरो वक्त्रशोधी च रोचनो दन्तहर्षणः ॥
[ ] इति ।

एतस्य लोके 'जम्बीर' इति प्रसिद्धिः ।

करुणे तु छागलाख्यो मल्लिकाकुसुमः प्रियः ॥५२॥

"कृत् विक्षेपे" कीर्यते **करुणः**, "ऋ-कृ-वृ-धृ-दारिभ्य उणः" [हैमोणादिसू० १९६] इत्युणः, तत्र । छागलस्याख्या अस्य **छागलाख्यः** । मल्लिकाया इव कुसुममस्य **मल्लिकाकुसुमः** । **मल्लिकापुष्पो**ऽपि । प्रीणाति हृदयं **प्रियः**, "नाम्युपान्त्य-" [सिद्ध० ५.१.५४] इति कः । एतस्य लोके 'करणा' इति प्रसिद्धिः ॥५२॥

बीजपूरे बीजपूर्णः पूरकः फलपूरकः ।
सुपूरको मातुलुङ्गः केसराम्लोऽम्लकेसरः ॥५३॥
वराम्लो बीजको लुङ्गो रुचको मध्यकेसरः ।
कृमिघ्नो गन्धकुसुमः केसरी शैीधुपादपः[1] ॥५४॥

बीजैः पूर्यते **बीजपूरः**, तत्र । बीजैः पूर्णो **बीजपूर्णः** । पूरयति **पूरकः** । फलानि पूरयति **फलपूरकः** । सुतरां पूरयति **सुपूरकः** । मा तोल्यते **मातुलुङ्गः**, "माङस्तुलेरुङ्गक् च" [हैमोणादिसू० १०६] इति उङ्गक् प्रत्ययः । केसरा अम्लाः अस्य **केसराम्लः**; केसरश्चासौ अम्लश्चेति वा । अम्लाः केसराः अस्य **अम्लकेसरः** ॥५३॥

वरश्चासौ अम्लश्च **वराम्लः** । बीजाः सन्त्यस्य **बीजः**, अभ्रादित्वादः, स्वार्थिके के **बीजकः** । मातुलुङ्गशब्दस्य पृषोदरादित्वाद् मातुइत्येतस्य लोपे **लुङ्गः** ।

---

१ साधुपादपः नि० ॥

रोचयति **रुचकः**, "धु-धून्दि-रुचि-" [हैमोणादिसू० २९] इति किदकः । मध्ये केसरा अस्य **मध्यकेसरः** । कृमीन् हन्ति **कृमिघ्नः** । गन्धाः—गन्धवन्तः कुसुमा अस्य **गन्धकुसुमः** । केसराः सन्त्यस्य **केसरी** । शीधुनः पादपः **शीधुपादपः** । आह च—

फलपूरो बीजपूरः केसरी बीजपूरकः ।
बीजकः केसराम्लश्च मातुलुङ्गस्तु पूरकः ॥ 5

[ ] इति ।

एतस्य लोके 'बीजउरउ' इति प्रसिद्धिः ॥५४॥

मातुलुङ्गयां वर्धमाना मधुरा मधुकर्कटी ।
मधुवल्ली पीतपुष्पी देवदूती महाफला ॥५५॥

'**मातुलुङ्गयां**' बीजपूरविशेषे । वर्धते फलैर्**वर्धमाना** । मधु विद्यते अस्या **मधुरा**, 10
"मध्वादिभ्यो रः" [सिद्ध० ७.२.२६] इति रः; माद्यत्यनया वा **मधुरा**, "श्वशुर-कुकुन्दुर-" [हैमोणादिसू० ४२६] इत्युरे निपात्यते । **यन्महेश्वरः**—

मधुरा शतपुष्पायां मिश्रेया-नागरीभिदोः ।
मधुकर्कटिका-मेदा-मधूली-यष्टिकासु च ॥

[ ] इति । 15

मधुनः कर्कटी इव **मधुकर्कटी** । मधुनो वल्ली **मधुवल्ली** । पीतानि पुष्पाण्यस्याः **पीतपुष्पी**, "असत्काण्ड-प्रान्त-शतैकाच्चः पुष्पात्" [सिद्ध० २.४.५६] इति ङीः । देवानां दूतीव **देवदूती** । महान्ति फलान्यस्या **महाफला** । आह च—

बीजपूर्णोऽपरः प्रोक्तो मधुरा मधुकर्कटी ।
मधुवल्ली मधुपर्णी वर्धमाना महाफला ॥ 20

[ ] इति ॥५५॥

अम्लीकायां चुक्रिकाऽम्ला शुक्तिकाँ चाम्लिकाऽम्लिका ।
चुक्रा चिञ्चा तिन्तिडीका तिन्तिलीं गुडपुष्पिका ॥५६॥

अम्ल्येव **अम्लीका**, तस्याम् । चुक्रैव **चुक्रिका** । "चुक्रन्ते—व्यथन्तेऽस्याः **चुक्रिका** इति क्षीरस्वामी । अमति **अम्ला**, "शा-मा-स्या-शक्यम्व्यमिभ्यो लः" [हैमो- 25

१ पूतिपुष्पा नि० ॥ २ महाबला नि० ॥ ३ अम्लिकायां नि० ॥ ४°काम्ली विकाम्लिका नि० ॥ ५ °डी गुरुपु° नि० ॥

णादिसू० ४६२] इति लः; अम्लत्वाद्वा **अम्ला**। शुक्तम्—अम्लविशेषः तान्तोऽयम्, स विद्यतेऽस्याः **शुक्तिका**, "अतोऽनेकस्वरात्" [सिद्ध० ७.२.६] इति कः। अम्लैव **अम्लिका**। अम्ब्ला एव **अम्ब्लिका**। "चकि तृप्ति-प्रतीघातयोः" चकते अनया **चुक्रा**, "चकि-रमि-विकसेरुच्चास्य" [हैमोणादिसू० ३९३] इति रः प्रत्ययोऽकारस्य चोकारः; चुक्रः—अम्लो रसः, स विद्यतेऽस्या वा, अभ्रादित्वादः। चिञ्चिमायते अम्लत्वान्मुखं ययाऽसौ **चिञ्चा**, पृषोदरादित्वात् साधुः। "तिम तीम ष्टिम ष्टीमच् आर्द्रभावे" तिम्यति **तिन्तिडीका**, "सृणीका-ऽस्तीक-प्रतीक-" [हैमोणादिसू० ५०] इतीके निपातनात् तिमेर्धातोस्तिड् अन्तो भवति। **केचित्** पूर्वस्य इत्वं नेच्छन्ति तन्मते **तिन्तडीका**। तिम्यति तिन्तिंडा, "विहड-कहोड-" [हैमोणादिसू० १७२] इति अडे निपात्यते, ऋफिडादित्वाल्लत्वे **तिन्तिला**। गुड इव पुष्पाण्यस्या **गुडपुष्पिका**। आह च—

अम्लीका चुक्रिका चुक्रा साऽम्ला शुक्ताऽथ शुक्तिका।
अम्लिका चाम्लिका चिञ्चा तिन्तिडीका च तिन्तिला॥

[ ] इति।

एतस्या लोके 'आंबिली' इति प्रसिद्धिः॥५६॥

वृक्षाम्ले स्यादम्लवृक्षस्तिन्तिडीको महीरुहः।
शाकाम्लमम्लशाकं चाम्लपूरो रक्तपूरकः॥५७॥

वृक्षश्चासौ अम्लश्च **वृक्षाम्लः**, तत्र। अम्लश्चासौ वृक्षश्च **अम्लवृक्षः**। **तिन्तिडीक**-शब्दस्य साधना पूर्ववत्। मह्यां रोहति **महीरुहः**। शाकं च तद् अम्लं च **शाकाम्लम्**। अम्लं च तत् शाकं च **अम्लशाकम्**। अम्लस्य पूरो अस्य **अम्ल-पूरः**। रक्तं पूरयति **रक्तपूरकः**। आह च—

वृक्षाम्लं तिन्तिडीकं च शाकाम्लं रक्तपूरकम्।
अम्लवृक्षोऽम्लशाकं तदम्लपूरो महीरुहः॥

[ ] इति।

वृक्षाम्लनामानि। लोके 'तिन्तिडीक' इति प्रसिद्धिः॥५७॥

अथाम्लवेतसे भीमो भेदनो रक्तपूरकः।
रुधिरस्रावकश्चुक्रं मांसारिर्वातिकप्रियः॥५८॥

---

१ अभिधानचिन्तामणौ अमरकोशे च 'तिन्तिडी' इति दृश्यते॥

शाखाम्लो वेतसाम्लोऽम्लस्तिन्तिडीको रसाम्लकः ।

अम्लश्चासौ वेतसश्च [1]**अम्लवेतसः**, तत्र । बिभ्यति अस्मादिति **भीमः**, "भियः षोऽन्तश्च वा" [हैमोणादिसू० ३४४] इति किन्मः । भेदयति **भेदनः** । रक्तं पूरयति **रक्तपूरकः** । रुधिरं स्रावयति **रुधिरस्रावकः** । चक्यते–तृप्यतेऽनेन **चुक्रम्** पुं-क्लीबलिङ्गः, "चकि-रमि-"[हैमोणादिसू० ३९३] इति रः, अकारस्य च उकारः । मांसस्य अरिः **मांसारिः** । वातिकानां प्रियो **वातिकप्रियः** ॥५८॥

शाखा अम्लाऽस्य **शाखाम्लः** । वेतसश्चासौ अम्लश्च **वेतसाम्लः** । अमति **अम्लः**, "शा-मा-श्या-शक्यम्ब्यबिभ्यो लः" [हैमोणादिसू० ४६२] इति लः । **तिन्तिडीक**शब्दः प्राग्वत् । रसोऽम्लोऽस्य **रसाम्लः**, स्वार्थिके के **रसाम्लकः** । आह च—

अम्लोऽम्लवेतसो भीमो रसाम्लो बिल्ववेतसः ।
रक्तस्रावो वेतसाम्लः शतवेधी च वेधकः ॥
[ ] इति ।

एतस्य लोके 'आम्लवेतस' इति प्रसिद्धिः ।

स शङ्खद्रावको हीनो [2]बालद्रावक उत्तमः ॥५९॥

'सः' अम्लवेतसः शङ्खान् द्रावयति **शङ्खद्रावकः** हीनः । बालं द्रावयति **बालद्रावकः** उत्तमः, कथ्यते इति शेषः ॥५९॥

तावेव तु शतवेधि-सहस्रवेधिनौ क्रमात् ।

'तुः' पुनरर्थे । 'तावेव' शङ्खद्रावक-बालद्रावकावेव शतं—बहून् विध्यत्यवश्यं **शतवेधी**, सहस्रं विध्यत्यवश्यं **सहस्रवेधी**, उभयत्र "णिन् चाऽऽवश्यका-" [सिद्ध० ५. ४. ३६] इति णिन् । 'क्रमाद्' अनुक्रमेण । आह च—

सहस्रवेधी चुक्रोऽम्लवेतसः शतवेध्यपि ।
[अमर० का० २ वर्ग ४ श्लोक १४१] इति ।

कपित्थे वानरावासो गन्धपत्रः कपिप्रियः ॥६०॥

पुष्पफलो दधिफलो दधित्थ-ग्राहि-मन्मथाः ।
अक्षिस्पन्दो दन्तशठो राजाम्रश्चिरपाक्यपि ॥६१॥

---

१ "अम्लवेतसवृक्षनिर्यासोऽम्लवेतसः ।" इति अभिधानचिन्तामणिस्वोपज्ञवृत्तौ ॥

२ लोहद्रावक नि० ॥

कपयोऽस्मिन् तिष्ठन्ति **कपित्थः** कपिप्रियत्वात् ; कपिरिव तिष्ठतीति वा, पृषोदरादित्वात् साधुः, तत्र । वानराणामावासो **वानरावासः** । गन्धयुक्तानि पत्राण्यस्य **गन्धपत्रः** । कपीना प्रियः **कपिप्रियः** ॥६०॥

पुष्पाण्येव फलमस्य **पुष्पफलः** । दधिवदम्लमधुरं फलमस्य **दधिफलः** । दध्नि तिष्ठति **दधित्थः**, पृषोदरादित्वात् । गृह्णातीति **ग्राही**, स्तम्भकारित्वात्, ग्रहादित्वाद् णिन् । मनो मथ्नाति **मन्मथः**, पृषोदरादित्वात् साधुः; मथति चित्तमिति वा "क्रमि-मथिभ्यां चन्मनौ च" [हैमोणादिसू० १२] इत्यः प्रत्ययः मन् इत्यादेशश्चास्य । अक्षि स्पन्दते अस्मादिति **अक्षिस्पन्दः** । दन्तेषु शठः अम्लत्वादिति **दन्तशठः** । राजा चासौ आम्रश्च **राजाम्रः** । चिरेण पाकोऽस्य **चिरपाकी** । आह च—

कपित्थोऽथ दधित्थश्च ग्राही फलसुगन्धिकः ।
अक्षिस्पन्दो दधिफलश्चिरपाकी कपिप्रियः ॥
[ ] इति ।

कपित्थनामानि । लोके तु 'कउठी' इति प्रसिद्धिः ॥६१॥

अश्मन्तके सूक्ष्मपत्रः[1] पाषाणान्तक इन्द्रकः ।
अम्लपत्रस्ताम्रपुष्पः[2] कुशली यमलच्छदः ॥६२॥

अश्नुते **अश्मन्तम्**, "सीमन्त-हेमन्त-" [हैमोणादिसू० २२२] इत्यन्ते निपात्यते, स्वार्थिके के **अश्मन्तकम्**, तत्र । सूक्ष्माणि पत्राण्यस्य **सूक्ष्मपत्रः** । पाषाणमन्तयति **पाषाणान्तकः** । इन्दति **इन्द्रः**, "भी-वृधि-" [हैमोणादिसू० ३८७] इति रः, स्वार्थिके के **इन्द्रकः** । अम्लानि पत्राण्यस्य **अम्लपत्रः** । ताम्राणि रक्तत्वात् पुष्पाण्यस्य **ताम्रपुष्पः** । कुशलमस्यस्य **कुशली** । यमलरूपं छदमस्य **यमलच्छदः** । आह च—

अश्मन्तक इन्द्रकस्तु कुशली चाऽम्लपत्रकः ।
श्लक्ष्णत्वग् मालुकापर्णः स्मृतो यमलपत्रकः ॥
[ ] इति ।

अश्मन्तकनामानि । लोके तु 'आसद्रा' इति प्रसिद्धिः ॥६२॥

नारङ्गे[3] नागरङ्गः स्यात् त्वक्सुगन्धो मुखप्रियः ।
ऐरावतो योगसारो योषिद्वक्त्राधिवासनः[4] ॥६३॥

---

१ श्लक्ष्णपत्रः नि० ॥ २ °म्रपत्रः कु° नि० ॥ ३ नारङ्गे स्यान्नागरङ्गस्त्वक्सु° नि० ॥ ४ योगी तक्राधि° नि० ॥

नृणाति **नारङ्गः**, "सृ-वृ-नृभ्यो णित्" [हैमोणादिसू० ९९] इत्यङ्गः; न आगच्छति सहजो रङ्गोऽस्य वा, तत्र । नागस्य—सिन्दूरस्येव रङ्गः—रागोऽस्य **नागरङ्गः** । त्वचा सुगन्धः **त्वक्सुगन्धः** । मुखस्य प्रियो **मुखप्रियः** । इरावत्याः—विद्युत इवायं रक्तत्वाद् **ऐरावतः**, "तस्येदम्" [सिद्ध०६.३.१६०] इत्यण् । योगेन सारो **योगसारः** । योषिद्वक्त्रमधिवासयति **योषिद्वक्त्राधिवासनः** । आह च — 5

नारङ्गस्त्वक्सुगन्धः स्यान्नागरङ्गो मुखप्रियः ।
स चैरावतकः प्रोक्तो योषिद्वक्त्राधिवासनः ॥

[ ] इति ।

नारङ्गः मुखवास इति । नारङ्गनामानि । लोके तु "नारिंगु' इति प्रसिद्धिः ॥६३॥

खदिरे स्याद् रक्तसारः कण्टकी दन्तधावनः । 10
गायत्री बालपत्रश्च जिह्मशल्यः क्षितिद्रुमः ॥६४॥

"खद हिंसायां च" चकारात् स्थैर्ये, खदति **खदिरः**, "मदि-मन्दि-" [हैमोणादिसू०४१२] इति इरः, तत्र । रक्तश्चासौ सारश्च **रक्तसारः** । कण्टकाः सन्त्यस्य **कण्टकी** । दन्तस्य धावनो **दन्तधावनः** । गायते—विप्रान् त्रायतेऽवश्यं **गायत्री** । बालवत् पत्राण्यस्य **बालपत्रः**, सूक्ष्मपर्णो ह्यसौ । जिह्मं—वक्रं शल्यमस्य 15
जिह्मशल्यः । क्षितौ द्रुमः **क्षितिद्रुमः** । आह च —

खदिरो रक्तसारश्च गायत्री दन्तधावनः ।
कण्टकी बालपत्रश्च जिह्मशल्यः क्षितिद्रुमः ॥६४॥

[ ] इति ।

खदिरनामानि । 20

सिते तु तत्र कदरः कामुकः कुब्जकण्टकः ।
सोमवल्को नेमिवृक्षः श्यामसारः पथिद्रुमः ॥६५॥

'तुः' पुनरर्थे । 'सिते' धवले 'तत्र' इति खदिरे कं दृणाति कफघ्नत्वात् **कदरः** । कमनशीलः **कामुकः**, "शृ-कम-" [सिद्ध०५.२.४०] इत्युकण् । कुब्जाः कण्टका अस्य **कुब्जकण्टकः** । सोमस्येव—चन्द्रस्येव वल्कमस्य **सोमवल्कः**, कण्टकित्वात् ; 25

---

१ चलपत्रश्च बहुशल्यः क्षितिक्षमः नि० ॥ २ कार्मकः नि० ॥ ३ श्वेतसारः नि० ॥

"शुक्लत्वग् वा" इति **क्षीरस्वामी** । नेमिश्चासौ वृक्षश्च **नेमिवृक्षः** । श्यामः सारोऽस्य **श्यामसारः** । **पथिद्रुमः** सप्तम्यलुक् । आह च ·—

खदिरः श्वेतसारोऽन्यः सोमवल्कः पथिद्रुमः ।
श्यामसारो नेमिवृक्षः कामुकः कुब्जकण्टकः ॥

[ ] इति ।

श्वेतखदिरनामानि ॥६५॥

विट्खदिरे त्वरिमेदो गोधास्कन्धोऽरिमेदकः ।
अहिमारोऽरिमः पूत्यरिमेदो मुखशोधनः ॥६६॥

विट्—विष्ठा तद्गन्धः खदिरः **विट्खदिरः पूतिखदिराख्यः**, तत्र । अरिः—दुस्सहो मेदः—स्रावोऽस्य **अरिमेदः** । गोधेव स्कन्धोऽस्य **गोधास्कन्धः** । अरिमेद एव **अरिमेदकः**, स्वार्थिकः कः प्रत्ययः । अहीन् मारयति **अहिमारः** । अरिरिव मध्नाति गन्धेन नक्रमिति **अरिमः**, "क्वचित्" [सिद्ध० ५. १. १७१] इति डः । पूतिश्चासौ अरिमेदश्च **पूत्यरिमेदः** । मुखस्य शोधनो **मुखशोधनः** । आह च—

अरिमेदोऽरिमेधश्च गोधास्कन्धोऽरिमेदकः ।
अहिमेदोऽहिमारश्चारिमः पूत्यरिमेदकः ॥

[ ] इति ।

एतस्य लोके 'अरंजु' इति प्रसिद्धिः ॥६६॥

शाल्मलौ तूलिनी मोचा पिच्छिला चिरजीविता ।
कुक्कुटी पूरणी रक्तकुसुमा घुणवल्लभा ॥६७॥
कण्टकाढ्या नलफली

"शाडृङ् श्लाघायाम्" ऋफिडादित्वाद् डस्य लत्वे शालते दैर्घ्यात् **शाल्मलिः**;"शल गतौ" ण्यन्तः, शालयति वा, "मा-शालिभ्यामोकुलि-मली" [हैमोणादिसू० ७०३] इति मलिः प्रत्ययः, पुं-स्त्रीलिङ्गः, तस्याम् । तूलमस्त्यस्याः **तूलिनी** । मुञ्चति रसं **मोचा**, लिहादित्वादच् । पिच्छा अस्त्यस्याः **पिच्छिला**, "लोम-पिच्छादेः शेलम्" [सिद्ध० ७. २. २८] इतीलः । चिरं जिवितमस्याश्चिरजीविता, अत एव **स्थिरायुः स्थिरजीविका** च । "कुकि वृकि आदाने" कुक्यते **कुक्कुटी** "नर्कुट-कुक्कुट-" [हैमो-

१ त्विरिमिदो नि० ॥ २ विरजाविता नि० ॥

णादिसू० १५५] इत्युटे निपात्यते; कुक्कुटीव वा । पूरयति **पूरणी** । रक्तानि कुसुमान्यस्याः **रक्तकुसुमा** । घुणानां—जन्तुविशेषाणां वल्लभा **घुणवल्लभा** ॥६७॥

कण्टकैराढ्या **कण्टकाढ्या** । नलवत् फलान्यस्याः **नलफली** । आह च—

शाल्मली रक्तपुष्पा च कुक्कुटी स्थिरजिविका ।
पिच्छिला तूलिनी मोचा कण्टकाढ्या च पूरणी ॥ 5
मोचनीति च [ ] इति ।

शाल्मलिनामानि । लोके तु 'सींबली' इति प्रसिद्धिः ॥

पिच्छा तु तस्य वेष्टकः ।

'तस्य' शाल्मलेः । पिच्छेव **पिच्छा,** आचामवदङ्गुलिषङ्गित्वात्; पीयते वा **पिच्छा,** "पी-पूङो ह्रस्वश्च" [हैमोणादिसू० १२५] इति छक् प्रत्ययो दीर्घस्य 10
ह्रस्वश्च । **वेष्टकः** निर्यासः, कथ्यते इति शेषः । आह च—

शाल्मली वेष्टकः पिच्छा निर्यासः स च शाल्मलः ।
मोचस्रावो मोचरसो मोचनिर्यासकस्तथा ॥
[ ] इति ।

कुशाल्मलौ शाल्मलिको रोचनः कूटशाल्मलिः ॥६८॥ 15

कुत्सितः शाल्मलिः **कुशाल्मलिः,** तत्र । कुत्सितः शाल्मलिः **शाल्मलिकः** । "शाल्मलिप्रकारः **शाल्मलिकः**" इत्यपरे । रोचते **रोचनः** । कूटः शाल्मलिः **कूटशाल्मलिः,** इह कूटशब्देन कुत्सितत्वं द्योत्यते, दुर्गादेर्हि परसैन्यदलनार्थं सा क्षिप्यते । शाल्मलिविशेषोऽयम् ॥६८॥

शिंशपायां महाश्यामा पिच्छिला पाण्डुरच्छदा । 20
कृष्णसाराऽङ्गारवर्णा

शंस्यते **शिंशपा,** "शंसेः श इच्चातः" [हैमोणादिसू० ३०६] इत्यनेन "शंसू स्तुतौ च इत्यस्मादपः प्रत्ययस्तालव्यः शकारोऽन्तादेशोऽकारस्य च इकारो भवति" तस्याम् । महती चासौ श्यामा च **महाश्यामा** । पिच्छा विद्यतेऽस्याः **पिच्छिला,** "लोमपिच्छादेः शेलम्" [सिद्ध० ७. २. २८] इतीलः । पाण्डुराणि 25

---

१ कुत्सिते शाल्मलौ प्रोक्तो रोचनः नि० ॥ २ शिंशिपा ° नि० ॥

छदान्यस्याः **पाण्डुरच्छदा** । कृष्णः सारोऽस्याः **कृष्णसारा** । **अङ्गारवर्णा** अङ्गाराकृतिः । शिंशपानामानि । लोके 'सीसम' इति प्रसिद्धिः ।

अगुरुरन्या तु शिंशपा ॥६९॥

'तुः' पुनरर्थे । 'अन्या' अपरा शिंशपा न गुरुः **अगुरुः**, पुं-क्लीबलिङ्गः, उच्यते इति शेषः । **यन्महेश्वरः** —

अगुरुः स्याच्छिंशपायां जोङ्गके लघुनि त्रिषु ।

[ ] इति ।

तथा च —

शिंशपा तु महाश्यामा कृष्णसारः स्मृतोऽगुरुः ।

[ ] इति ॥६९॥

कुशिंशपा भस्मगर्भा कपिला भस्मपिङ्गला ।

कुत्सिता शिंशपा **कुशिंशपा** । भस्म गर्भेऽस्याः **भस्मगर्भा** । **कपिला** कपिलवर्णत्वात् । "कबृङ् वर्णे" कब्यते कबते वा कपिला, "स्थण्डिल-कपिल-" [हैमोणादिसू० ४८४] इति साधुः । भस्म चासौ पिङ्गला च **भस्मपिङ्गला** । आह च—

कुशिंशपाऽन्या कपिला भस्मगर्भा वसादनी ।

[ ] इति ।

शिंशपाविशेषोऽयम् ।

बदर्यां कुवली कोलिः कर्कन्धुः फलितच्छदा ॥७०॥
राष्ट्रवृद्धिकरी कोली सौवीरी वज्रशल्यिका ।
घुट्टा घोण्टा गोपघोण्टा व्याघ्र-गृध्रनखीत्यपि ॥७१॥

"बद स्थैर्ये" बदति **बदरी**, "ऋच्छि-चटि-"[हैमोणादिसू० ३९७] इत्यरः, तस्याम् कौति **कुवली**, "कोर्वा" [हैमोणादिसू० ४६९] इति किदलः; कौ—भूमौ वलतीति वा,

---

१ ° रल्पा तु शिंशिपा नि० ॥ २ ° शिंशिपा नि० ॥ ३ कुवलिः नि० ॥ ४ फेनिलच्छदा नि० ॥ ५. वज्रशिल्पिका नि० ॥ ६ घुटा घोण्टा कुहा घोट्टा नि० ॥

त्रिलिङ्गः। कोलति–संस्त्यायति **कोलिः**, "किलि-पिलि-" [हैमोणादिसू० ६०८] इत्यादिशब्दाद् इः प्रत्ययः; स्त्रीलिङ्गः। कर्कस्य अन्धुरिव **कर्कन्धुः**; कर्कः–लोहितोऽन्धुरिति वा **कर्कन्धुः** पुं-स्त्रीलिङ्गः। फलितं छदमस्याः **फलितच्छदा** ॥७०॥

राष्ट्रस्य वृद्धिकरी **राष्ट्रवृद्धिकरी**। इकारान्तात् कोलिशब्दाद् ङ्यां **कोली**। **सुवीर**देशे भवा **सौवीरी**, "भवे" [सिद्ध० ६,३.१२३] इत्यण्, "अण-ञे-ये-" [सिद्ध०२.४.२०] इति ङीः। वज्र इव शल्यं–कण्टकमस्या **वज्रशल्यिका**। घुणति–वृत्तत्वाद् भ्रमति **घुट्टा घोण्टा** च, उभावपि "घटा-घाटा-घण्टादयः" [हैमोणादिसू० १४१] इति टे निपात्येते। गोपानां घोण्टा **गोपघोण्टा**। 'व्याघ्र-गृध्रनखी' इति व्याघ्र-गृध्रशब्दाभ्यां परो नखशब्दः सम्बध्यते, तेन व्याघ्रस्येव नखा अस्याः **व्याघ्रनखी**। एवं **गृध्रनखी**, कण्टकानां प्राचुर्यात्। यदुवाच **चन्द्रः** —

बदरी गोपघण्टा च घुट्टा घोण्टा च कोकिला।
स्निग्धच्छदा कोलफला राष्ट्रवृद्धिकरी तथा ॥

[ ] इति।

इन्दुरप्याह —

बदरी स्निग्धपत्रा च राष्ट्रवृद्धिकरी तथा।
फलं तस्याः स्मृतं कोलं कोकिलं फेनिलं कुहम् ॥

लोलं सूक्ष्मफलं तत्तु ज्ञेयं कर्कन्धु कण्टुकम्।
स्वादुः कन्दुः सिञ्चतिका तच्च कोलफलं मतम् ॥

[ ] इति।

एतस्या लोके 'बोरि' इति प्रसिद्धिः ॥७१॥

शम्यां सक्तुफला लक्ष्मीः शिम्बा[1] तुङ्गाऽग्निपादपः।
अजप्रिया भस्मकाष्ठा शङ्करः शिवकीलिका ॥७२॥
शिवा[2]ऽलोमाऽऽयतफला लोम-पामविनाशिनी।
मङ्गल्या शुचिपत्रा च

१ शिवा नि० ॥ २ शिवलोमा° नि० ॥

शाम्यत्यस्यां सस्यं **शमी**; "शमयति दोषान्" इति **क्षीरस्वामी**, शिवात्वात्, गौरादित्वाद् ङीः, तस्याम् । सक्तवः फलान्यस्याः **सक्तुफला** । लक्ष्मीरिव **लक्ष्मीः**; लक्ष्यते वा "लक्षेर्मोऽन्तश्च" [हैमोणादिसू० ७१५] इति ईः । "शृधूङ् शब्दकुत्सायाम्" शर्धते अनया **शिम्बा**, "डी-नी-बन्धि-शृधि-" [हैमोणादिसू० ३२५] इति डिदिम्बः । **तुङ्गा** उच्चैस्तरत्वात्[1] । अग्नेः पादपोऽग्निपादपः । अजस्य-छागस्य प्रिया **अजप्रिया** । भस्मसमानं काष्ठमस्याः **भस्मकाष्ठा** । शं करोति **शङ्करः** । शिवस्य कीलिकेव **शिवकीलिका** ॥७२॥

शिवहेतुत्वात् **शिवा**; शेरते इव दोषा अनेनेति वा, "शीङापो ह्रस्वश्च वा" [हैमोणादिसू० ५०६] इति वः दीर्घस्य ह्रस्वश्च । न विद्यन्ते लोमान्यस्या **अलोमा**, केशहर्तृफलत्वात् । आयतानि फलान्यस्या **आयतफला** । 'लोम-पामविनाशिनी' इति लोम-पामशब्दाभ्यां विनाशिनीति योज्यते, लोम्नां विनाशिनी **लोमविनाशिनी**, पाम्नो विनाशिनी **पामविनाशिनी** । मङ्गले साधुर्**मङ्गल्या**, "तत्र साधौ" [सिद्ध० ७.१.१५] इति यः । शुचीनि पत्राण्यस्याः **शुचिपत्रा** । आह च—

शमी सक्तुफला तुङ्गा केशहर्तृफला शिवा ।
[ ] इति ।

एतस्या लोके 'खेजडी' इति प्रसिद्धिः ।

फले तस्यास्तु सङ्गरम्[2] **॥७३॥**

'तस्याः' शम्याः फले सम्यग् गरोऽस्य **सङ्गरम् सङ्गरणं** वा । एतस्य लोके 'सांगरी' इति प्रसिद्धिः ॥७३॥

इङ्गुद्यां तापसतरुर्मार्जारः कण्टकीलकः[3] **।**
बिन्दुकस्तिक्तमज्जा च पूतिपुष्प-फलोऽपि च ॥७४॥

"इगु गतौ" इङ्गति **इङ्गुदी**, "इङ्गचर्बिभ्यामुदः" [हैमोणादिसू० २४२] इत्युदः त्रिलिङ्गः, तस्याम् । तापसानां तरुस्**तापसतरुः**, तापसा हि अरण्येऽस्यास्तैलमुपयुञ्जते । मार्ष्टि **मार्जारः**, "अग्यङ्गि-" [हैमोणादिसू० ४०५] इत्यारः । कटमत्यर्थं कीलयति **कटकीलकः** । बिन्दुप्रतिकृतिर्**बिन्दुकः**, "तस्य तुल्ये कः संज्ञाप्रतिकृत्योः" [सिद्ध०७.१.१०८] इति कः । तिक्ता मज्जाऽस्याः **तिक्तमज्जा** ।

---

१ उच्चैस्त्वात् पु २ ॥ २ साङ्गरः नि० ॥ ३ कण्टकीटकः नि० ॥

'पूतिपुष्प-फलः' इति पूतिशब्दात् पुष्प-फलशब्दौ योज्येते, पूतीनि पुष्पाणि फलानि चास्य **पूतिपुष्पः पूतिफलः** । आह च—

इङ्गुदो भल्लकी वृक्षः कण्टकस्तापसद्रुमः ।
[ ] इति ।

एतस्य लोके 'हिंगोट्ट' इति प्रसिद्धिः ॥७४॥

गुग्गुलौ तु पुरो दुर्गो महिषाख्यः पलङ्कषः ।
जटायुः कालनिर्यासो वासवोलूकनामकः ॥७५॥
नक्तञ्चरः शिवधूपः कुम्भोलूखलकं शिवः ।

"गुङ् शब्दे" गूयते **गुग्गुलुः** 'गूहलु-गुग्गुलु—" [हैमोणादिसू० ८२४] इति आलुप्रत्ययान्तो निपात्यते, पुंल्लिङ्गः, तत्र । "पुरत् अग्रे" पुरति **पुरः**, "नाम्युपान्त्य—" [सिद्ध० ५.१.५४] इति कः । "पिपर्त्ति पुरः" इति **क्षीरस्वामी**, "ऋगुपधा-" [?] इति कः, "उदोष्ठ्यपूर्वस्य" [पाणिनि० ७.१.१०२] इति उद् । दुःखेन गम्यते **दुर्गः**, "सुग-दुर्गमाधारे" [सिद्ध०५.१.१३२] इति साधुः, उग्रगन्धत्वात् । महिषस्य आख्या अस्य **महिषाख्यः** । पलं—मांसं कषति **पलङ्कषः**, पृषोदरादित्वान्मोऽन्तः । जटामेति **जटायुः**, "कृ-वा-पा-जि-" [हैमोणादिसू० १] इत्युण् । कालो निर्यासोऽस्य **कालनिर्यासः** । वासवोलूकनामकः' इति वासवोलूकशब्दाभ्यां परो नामशब्दः सम्बध्यते, वासवस्य नामास्य **वासवनामकः**, उलूकस्य नामाऽस्य **उलूकनामकः** ॥७५॥

अत एव नक्तं चरति **नक्तञ्चरः**। शिवस्य धूपः **शिवधूपः** । "कुम्भोलूखलाकाराद् वृक्षगुल्माद् निर्यातीति **कुम्भोलूखलकम्**" इति **क्षीरस्वामी**, क्लीबलिङ्गोऽयम् ।

यदमरः—

कुम्भोलूखलकं क्लीबे कौशिको गुग्गुलुः पुरः ।
[का०२ वर्ग ४ श्लोक ३४] इति ।

शेते **शिवः**, "शीङ्यपो ह्रस्वश्च वा" [हैमोणादिसू० ५०६] इति वः । आह च—

गुग्गुलुः कालनिर्यासो जटायुः कौशिकः पुरः ।
नक्तञ्चरः शिवो दुर्गो महिषाख्यः पलङ्कषः ॥
[ ] इति ।

---

१ °षाक्षः प° नि० ॥ २ °लकः शिवः नि० ॥

एतस्य लोके 'गूगलु' इति प्रसिद्धिः ।

पारिभद्रे निम्बतरुर्मन्दारः पारिजातकः ॥७६॥

पारि–प्राप्तपारं भद्रमस्य **पारिभद्रः**, तत्र । **निम्बतरुः** निम्बोत्थः । मन्द्यते–स्तूयते देवैर्**मन्दारः**, "अग्यङ्गि-" [हैमोणादिसू० ४०५] इत्यारः; [मन्दमियर्तीति वा]। पारि–निष्ठां प्राप्तं जातमस्य **पारिजातकः** । यदाहुः—

पारिभद्रे निम्बतरुर्मन्दारः पारिजातकः ।

[अमर० का०२ वर्ग ४ श्लो० २६] इति ।

तथा च—

निम्बोत्थः सर्वतोभद्रः प्रभद्रः पारिभद्रकः ।

[ ] इति ।

पारिभद्रनामानि ॥७६॥

करीरे स्यात् तीक्ष्णसारः शाकपुष्पो मृदूफलः ।
मरुजन्मा गूढपत्रो ग्रन्थिल-क्रकरावपि ॥७७॥

किरति–क्षिपति वायुं **करीरः**, "कृ-शॄ-पॄ-पूगॄ-मञ्जि-" [हैमोणादिसू० ४२८] इति ईरः; करिण ईरयति कण्टकैर्वा, [पुं-क्लीबलिङ्गः], तत्र । तीक्ष्णः सारोऽस्य **तीक्ष्णसारः** । शाकं पुष्पाणामस्य **शाकपुष्पः** । मृदूनि फलानि अस्य **मृदूफलः**, पृषोदरादित्वाद् दीर्घः । **मरौ** जन्माऽस्य **मरुजन्मा** । गूढानि–गुप्तानि पत्राण्यस्य **गूढपत्रः** । ग्रन्थयः सन्त्यस्य **ग्रन्थिलः**, सिध्मादित्वाल्लः; ग्रन्थीन् लाति वा । 'क्र' इति करोति **क्रकरः**, तीक्ष्णत्वात् ; क्रम्यते वा, "जठर-क्रकर-" [हैमोणादिसू० ४०३] इत्यरे निपात्यते । आह च—

करीरं गूढपत्रं च शाकपुष्पं मृदूफलम् ।
ग्रन्थिलं तीक्ष्णसारं च क्रकरं तीक्ष्णकण्टकः ॥

[ ] इति ।

एतस्य लोके 'कैर' इति प्रसिद्धिः ॥७७॥

विकङ्कते स्रुवावृक्षो ग्रन्थिलः स्वादुकण्टकः ।
किङ्किणिः काकपादश्च व्याघ्रपाद् गोपकण्टकः ॥७८॥

---

१ °न्मा तथा पत्रो नि० ॥ २ 'कयर' पु २ ॥ ३ केकणिः नि० ॥ ४ °पादोपक° नि० ॥

विकङ्कते--प्रसरति **विकङ्कतः** ककिर्गत्यर्थः, "सीमन्त-हेमन्त-" [हैमोणादिसू० २२२] इत्यन्ते निपात्यते, तत्र । "स्रुवा—स्रुक्. सा हि वैकङ्कती आम्नाता. तस्या वृक्षः **स्रुवावृक्षः**" इति **क्षीरस्वामी** । ग्रन्थयः सन्त्यस्य **ग्रन्थिलः**, सिध्मादित्वाल्लः । ग्रन्थीन् लाति वा, "क्वचित्" [सिद्ध० ५. १. १७१] इति डः । स्वादवः-मृष्टाः कण्टका अस्य **स्वादुकण्टकः** । कङ्कते—प्रसरति **किङ्कणिः** "कङ्केरिच्चास्य वा" [हैमोणादिसू० ६३९] इति अणिः प्रत्ययः, धातोरकारस्य च विकल्पेन इकारः । काकपादाविव पादोऽस्य **काकपादः** । व्याघ्रपादाविव पादोऽस्य **व्याघ्रपात्**, "उष्ट्र-मुखादयः" [सिद्ध० ३.१.२३] इति समासः । गोपानां कण्टको **गोपकण्टकः** । आह च—

विकङ्कतः पृथुफलो ग्रन्थिलः स्वादुकण्टकः ।
गोपकण्टः काकपादो व्याघ्रपादोऽथ किङ्कणी ॥

[ ] इति ।

विकङ्कतनामानि । लोके 'कांक' इति प्रसिद्धिः ॥७८॥

बिल्वे महाफलः श्रयाह्वः शलाटुः पूतिमारुतः ।
महाकच्छः [च] शाण्डिल्यः शैलूषो नीलमल्लिका ॥७९॥
श्रीवासः श्रीफलो ह्यगन्धो मालूर-कर्कटौ ।

बिलति—भिनत्ति **बिल्वः**, "निघृषी-" [हैमोणादिसू० ५११] इति किद् वः, तत्र । महान्ति फलान्यस्य **महाफलः** । श्रिया आह्वा अस्य **श्रयाह्वः** । "शल गतौ" शलति **शलाटुः**, "शलेराटुः" [हैमोणादिसू० ७६३] इत्याटुः प्रत्ययः । पूतिर्मारुतोऽस्य **पूतिमारुतः** । महांश्चासौ कच्छश्च **महाकच्छः** । शण्डिलस्यापत्यं **शाण्डिल्यः** गर्गादित्वाद् यञ्, "शाण्डिल्यपौत्रः शिलूषजः" **इत्यागमात्**; शाण्डिल्य इव वा, ब्राह्मणमान्यत्वात् । शैलूष इव **शैलूषः**, नानारूपपरिवर्तनाद्वा । नीलमल्लिकेव **नीलमल्लिका** ॥ ७९ ॥

श्रिया वासः **श्रीवासः** । श्रीप्रदानि फलान्यस्य **श्रीफलः** । ह्यो गन्धोऽस्य **ह्यगन्धः** । मलते—दधाति मलान् **मालूरः**, "महि-कणि-चण्यणि-" [हैमोणादिसू०

१ 'कांकइ' इति पु २ ॥ २ महाकपित्थं शाण्डिल्यः नि० ॥

४२८] इति णिदूरः । कर्किः सौत्रो गत्यर्थः, कर्कति **कर्कटः**, "दिव्यवि-" [हैमोणादिसू० १४२] इत्यटः । आह च—

बिल्वः शलाटुः शाण्डिल्यो ह्यगन्धः सदाफलः ।
शैलूषः श्रीफलः श्र्याह्वः कर्कटः पूतिमारुतः ॥
लक्ष्मीफलो गन्धगर्भः सत्यकर्मा वरारुहा ।
वातसारो ह्रषीकश्च कण्टकाढ्यः सितानन: ॥
[.] इति ।

बिल्वनामानि । लोके 'बीली' इति प्रसिद्धिः ।

हरीतक्यां जया पथ्या हैमवत्यभयाऽमृता ॥ ८० ॥
कायस्था पूतना चेतक्यव्यथा श्रेयसी शिवा ।

हरति रोगान् **हरीतकी**, "ह्व-रुहि-पिण्डिभ्य ईतकः" [हैमोणादिसू० ७९] इतीतकः, स्त्रीलिङ्गः ।

हरस्य भु(ं भ)वने जाता हरिता च स्वभावतः ।
सर्वरोगांश्च हरते तेनाऽऽख्याता हरीतकी ॥
[ ] इति,

तस्याम् । जयति रोगान् **जया** । पथि साधुः **पथ्या**, हितेत्यर्थः, " तत्र साधौ " [सिद्ध० ७. १. १५] इति यः । हिमवत इयं **हैमवती**, " तस्येदम् " [सिद्ध० ६. ३. १६०] इत्यण् । नास्ति भयमस्या **अभया** । यदाह—

अम्लभावाज्जयेद् वातं पित्तं मधुर-तिक्ततः ।
कफं रूक्ष-कषायत्वात् त्रिदोषघ्नी ततोऽभया ॥
[ ] इति ।

अत एव नास्ति मृतमस्या अस्यां वा **अमृता** ॥ ८० ॥

काये तिष्ठति—निष्फला न भवति **कायस्था**, " स्था-पा-स्ना-त्रः कः" [सिद्ध० ५. १. १४२] इति कः । **वयःस्थेत्येके** । पूतं करोति **पूतना**, विरेचनीत्वात् । **पूतनेत्येके** । " चितिण् संवेदने " चेतयते स्रोतःशुद्धेः **चेतकी**, " कीचक-पेचक-" [हैमोणादिसू० ३३] इत्यके साधुः । न व्यथयति **अव्यथा** । अतिशयेन प्रशस्या **श्रेयसी**, " गुणाङ्गाद्वेष्ठेयसू " [सिद्ध० ७. ३. ९] इति ईयसौ " प्रशस्यस्य श्रः " [सिद्ध० ७. ४ ३४] इति श्रादेशः । शेरते रोगा अनया **शिवा**, "शीङापो ह्रस्वश्च वा " [हैमोणादिसू० ५०६] इति वः दीर्घस्य ह्रस्वश्च । आह च —

हरीतक्यभया पथ्या प्रपथ्या पूतनाऽमृता ।
जयाऽव्यथा हैमवती कायस्था चेतकीति च ॥

[ ] इति ।

एतस्या लोके 'हरडइ' इति प्रसिद्धिः ।

बिभीतके भूतवासो वासन्तोऽक्षो बहेटकः॥८१॥
संवर्तकः कर्षफलः कल्को हार्यः कलिद्रुमः ।
कर्षो दैन्यो मधुबीजो धर्मद्वेषी बिभेदकः ॥८२॥

बिभेति अस्माद् **बिभीतकः**, "भियो द्वे च" [हैमोणादिसू० ७८] इति तकक्, त्रिलिङ्गः, तत्र । भूतानां वासो **भूतवासः** । वसन्ते भवो **वासन्तः**, "भर्तु-सन्ध्यादेरण्" [सिद्ध० ६.३.८९] इत्यण् । अक्ष्णोति—व्याप्नोति **अक्षः**, अच् ; अश्नुते वा "मा-वा-वद्यमि—" [हैमोणादिसू० ५६४] इति सः । 'वहीं प्रापणे" वहते **बहेटः**, 'कपट-कीकटादयः" [हैमोणादिसू० १४४] इत्यटे निपात्यते, स्वार्थिके के **बहेटकः** ॥८१॥

संवृत्यते अनेन **संवर्त्तः**, स्वार्थिके के **संवर्तकः** । कर्ष इव फलान्यस्य **कर्षफलः** । अक्षसामान्याद् **अक्षकर्षो**ऽपि बिभीतके पलचतुर्थभागे च वर्तते । "कलि शब्द-संख्यानयोः" कल्यते **कल्कः**, "भीण्-शलि-" [हैमोणादिसू० २१] इति कः । ह्रियते **हार्यः** । कलेराश्रयो द्रुमः **कलिद्रुमः** । कर्षते कृषति वा **कर्षः**, अक्षसाम्याद्वा । दैन्यहेतुत्वाद् **दैन्यः** । मधु—मृष्टं बीजमस्य **मधुबीजः** । धर्मस्य द्वेषी **धर्मद्वेषी** । बिभेति अस्माद् **बिभेदकः**, "कीचक-पेचक-" [हैमोणादिसू० ३२] इत्यके निपात्यते । आह च—

बिभीतकः कर्षफलो वासन्तोऽक्षः कलिद्रुमः ।
संवर्तको भूतवासः कर्षो हार्यो बिभेदकः ॥

[ ] इति ।

इन्दु[1]**च**—

अहार्यं बहुवीर्यं च तुमूलं च बिभेदकम् ।

[ ] इति ।

एतस्य लोके 'बहेडा' इति प्रसिद्धिः ॥८२॥

---

१ कलिबासः कलि° नि० ॥ २ कर्षौ दोत्यो मधु° नि० ॥

आमलक्यां शिवा धात्री वयःस्था षड्रसाऽमृता ।
पर्वकीटा तिष्यफला माकन्दी श्रीफला च सा ॥८३॥

आ—समन्ताद् मलते—धारयति गुणान् **आमलकी**, "कीचक-पेचक-" [हैमोणादिसू० ३३] इत्यके निपात्यते, त्रिलिङ्गोऽयम्, तस्याम् । शेरते गुणा अस्यां **शिवा**, "शीङापो ह्रस्वश्च वा" [हैमोणादिसू० ५०६] इति वः । दधाति गुणान् **धात्री**, तृजन्ताद् ङीः । **वयःस्था** रसायनत्वात् । षड् रसाः सन्ति अत्र **षड्रसा** । नास्ति मृतमस्या **अमृता** । पर्वणि कीटाः अस्याः **पर्वकीटा** । तिष्यं—मङ्गल्यं फलमस्त्यस्याः **तिष्यफला**, "नित्यमामलके लक्ष्मीः" इति । माकन्द्याः फलं **माकन्दी**, अभेदोपचारात्, "दोरप्राणिनः" [सिद्ध० ६.२.४९] इति मयट्. "फले" [सिद्ध० ६.२.५८] इति तस्य लुप्, हरीतक्यादित्वात् स्त्रीत्वम्, गौरादित्वाद् ङीः । श्रीप्रदं फलमस्याः **श्रीफला** । आह च—

वयःस्थाऽऽमलकं तिष्यं जातीरसफलं शिवम् ।
धात्रीफलं श्रीफलं च तच्चामृतफलं स्मृतम् ॥

[ ] इति ।

एतस्य लोके 'आमला' इति प्रसिद्धिः ॥८३॥

अरणावग्निमन्थः स्यात् तर्कारी वैजयन्तिका ।
जया जयन्ती[1] श्रीपर्णी कणिका गणकारिका ॥८४॥
तेजोमन्थो हविर्मन्थो नादेयी वह्निशोधनः ।

इयर्ति वह्निरस्मिन् **अरणिः**, "ऋ-ह-सृ-" [हैमोणादिसू० ६३८] इत्यणिः, पुं-स्त्रीलिङ्गः. तत्र । अग्निं मथ्नाति दीपनत्वाद् **अग्निमन्थः** । तर्कमियर्ति **तर्कारी**, केतुत्वात् । विजयते विजयन्तः, तृ-जि-भू-वदि-" [हैमोणादिसू० २२१] इति अन्तः, तस्येयं वैजयन्ती, "तस्येदम्" [सिद्ध० ६.३.१६०] इत्यण्, "अणञेये-" [सिद्ध० २.४.२०] इति ङीः, स्वार्थिके के **वैजयन्तिका** । जयतीति **जया**, अच्, "तृ-जि-भू-वदि-" [हैमोणादिसू० २२१] इत्यन्ते **जयन्ती**, टित्त्वाद् ङीः । श्रीः पर्णे यस्याः सा **श्रीपर्णी**, क्लीबेऽयमित्यन्ये । यदमरः—

श्रीपर्णमग्निमन्थः स्यात् । [का० २ वर्ग ४ श्लो० ६६] इति ।

कणाः सन्त्यस्याः **कणिका**, "अतोऽनेकस्वरात्" [सिद्ध० ७.२.६] इतीकः ।

---

१ पर्वकाढ्या तिष्य° नि० ॥ २ °न्ती नादेयी श्रीपर्णी गणिका° नि० ॥

गणकं–समूहमियर्ति गणकारी, स्वार्थिके के **गणकारिका**; "गणं–तर्कं करोति वा" **इत्यन्ये** ॥८४॥

तेजो मथ्नाति **तेजोमन्थः** । हविर्मथ्नाति **हविर्मन्थः** । नद्यां भवा **नादेयी**, 'नद्यादेरेयण्' [सिद्ध० ६.३.२] इत्येयण् । वह्निं शोधयति **वह्निशोधनः**, दीपनत्वात् ।

लिङ्गसाङ्कर्याद् 'जया' इत्यर्द्धेन **जयन्तं** 'श्रीपर्णम्' इति चार्द्धेन **जयपर्णमाहुः**, तन्न, वनौषधिवर्गे तस्याऽनादृतत्वात् । आह च **इन्दुः**–

अग्निमन्थोऽग्निमथनस्तर्कार्यरणिको जयः ।
अरणिः कणिका सैव तपनो वैजयन्तिकः ॥
[ ] इति ।

चन्द्रनन्दनस्त्वाह—

अग्निमन्थोऽग्निमथनस्तर्कारी वैजयन्तिका ।
वह्निमन्थोऽरणिः केतुर्[1]जयः पावकमन्थनः ॥
तर्कार्या वैजयन्ती च वह्निनिर्मथनी जया ।
अरणिका जयन्ती च विजया च जयावहा ॥
[ ] इति ।

एतस्या लोके 'अरणी' इति प्रसिद्धिः ।

अ[2]रलौ दुण्टुको दीर्घवृन्तो नटः कुटन्नटः ॥८५॥
स्यो[3]नाकः शोनको जम्बूः शुकनाशः कटम्भरः ।
मयूरजङ्घः कट्वङ्गः सल्लकः प्रियजीवकः ॥८६॥
मण्डूकपर्णः पत्रोर्णो गोपवृक्षो मुनिद्रुमः ।

'ऋंक् गतौ" इयर्ति **अरलुः**, 'गृहल-गुग्गुल-" [हैमोणादिसू० ८२४] इति आलु-प्रत्यये निपात्यते, तत्र । टुण्टुभिः–शिम्बिभिः कायति **टुण्टुकः**, "क्वचित्" [सिद्ध० ५. १. १७१.] इति डः । दीर्घं वृन्तमस्य **दीर्घवृन्तः** । नटति–नृत्यति वातेन **नटः**, अच् । कुटन्–वक्रीभवन् नटति–स्पन्दते **कुटन्नटः** ॥८५॥

स्योनं–सुखम् अकति **स्योनाकः** । "शुं गतौ" शवति **शोनकः**, "कीचक-पेचक-" [हैमोणादिसू० ३३] इत्यकान्तो निपात्यते । **गौडाः** "**शोणकम्**" आहुः,

१ केतुर्जयः पु २ ॥ २ अरलौ दुन्दको दीर्घवृन्तश्चाथ कुट० नि० ॥ ३ श्योनाकः शीषणो जम्बुः शुकनासः नि० ॥

"शोगृ वर्णे" इत्यस्माद् णकः । जायतेऽस्यां **जम्बूः** 'कमि-जनिभ्यां बूः" [हैमोणादिसू० ८४७] इति **जम्बूः**, स्त्रीलिङ्गः । शुकस्य नाशोऽस्मात् **शुकनाशः**। कटं बिभर्ति **कटम्भरः**, "भृ-वृ-जि-" [सिद्ध० ५.१.११२] इत्यादिना खः । मयूरस्य जङ्घेव जङ्घाऽस्य **मयूरजङ्घः** । कटून्यङ्गान्यस्य रौक्ष्यात् **कटूवङ्गः** । सल्लिः सौत्रो गत्यर्थः, सेल्लति **सल्लकः**, "दृ-कृ-नृ-"[हैमोणादिसू० २७] इत्यकः । प्रियो जीवोऽस्य प्रियजीवः, स्वार्थिके के **प्रियजीवकः** ॥८६॥

मण्डूक इव पर्णान्यस्य **मण्डूकपर्णः** । पत्रेषु ऊर्णाऽस्य **पत्रोर्णः** । गोपानां वृक्षो **गोपवृक्षः** । मुनीनां द्रुमः **मुनिद्रुमः** । आह च—

स्योनाकः शुकनाशश्च कटूवङ्गोऽथ कटम्भरः ।
मयूरजङ्घोऽरलुकः प्रियजीवः कुटन्नटः ॥
स प्रोक्तः पृथुशिम्बिश्च टुण्टुको दीर्घवृन्तकः ।
भाल्लकः सल्लकः फल्गुवृन्तको जम्बुको नटः ॥
[ ] इति।

एतस्य लोके 'अरल्ल' इति प्रसिद्धिः । एतद्भेदस्य 'टींटू' इति प्रसिद्धिः ।

शिग्रौ शोभाञ्जनस्तीक्ष्णगर्भो[1] मूलकपल्लवः ॥८७॥
विद्रध्यरातिकोऽक्षीवो[2] मुखभञ्जः सुभञ्जनः ।
दंशोऽक्षीवः[3] सुभङ्गी च मोचको मधुगृञ्जनः ॥८८॥

"शिंगट् निशातने" शिनोति तैक्ष्ण्यात् **शिग्रुः**, "शिग्रु-गेरु-नमेर्वादयः" [हैमोणादिसू० ८११] इति रुप्रत्यये निपात्यते, पुं-क्लीबलिङ्गः, तत्र । शोभामनक्ति **शोभाञ्जनः**; सुष्ठु भनक्ति मुखमिति वा, पृषोदरादित्वात् । तीक्ष्णो गर्भोऽस्य **तीक्ष्णगर्भः**। मूलक इव पल्लवा अस्य **मूलकपल्लवः** ॥८७॥

विद्रधेररातिर्विद्रध्यरातिः स्वार्थिके के **विद्रध्यरातिकः** । "ष्ठिवू क्षिवू निरसने" न क्षीवन्ते अनेन अदप्यत्वाद् **अक्षीवः** । मुखं भनक्ति **मुखभञ्जनः** । शोभनं भञ्जनमस्य **सुभञ्जनः** । दशति **दंशः**, अच् । "क्षीबृङ् मदे" न क्षीबते **अक्षीबः** । शोभनो भङ्गोऽस्त्यस्य **सुभङ्गी** । मुञ्चति गन्धं **मोचकः**, णकः प्रत्ययः । मधुप्रधानो गृञ्जनो **मधुगृञ्जनः** । आहुश्च—

---

१ °गन्धो मू° नि० ॥ २ विद्रध्यरातिः काक्षीवो मुख° नि० ॥ ३ दशोऽक्षीवः सुरङ्गी च नि० ॥

शिग्रुः स्याच्छ्वेतमरिचं मुखभञ्जोऽतितीक्ष्णकः ।
शोभाञ्जनस्तीक्ष्णगन्धः सुतीक्ष्णो ध(?घ)नपल्लवः ॥

शिग्रुर्हरितशाकोऽन्यो मतो मूलकपल्लवः ।
घनच्छदस्तीक्ष्णग[न्धः] सुभङ्गी दशनक्षमः ॥
तृतीयो मधुशिग्रुः स्यात् [ ] इति । 5

शिग्रुनामानि । लोके 'शिरघू' इति प्रसिद्धिः ॥८८॥

श्वेतेऽत्र श्वेतमरिचः

'अत्र' श्वेते शिग्रौ श्वेतं मरिचमस्य **श्वेतमरिचः** ।

रक्ते तु मधुशिग्रुकः ।

'तुः' पुनरर्थे । रक्ते शिग्रौ मधुप्रधानः शिग्रुः मधुशिग्रुः, स्वार्थिके के **मधु-** 10
शिग्रुकः ।

तिनिशे चित्रकृद् नेमिर्वञ्जुलो रथसाधकः ॥८९॥

दीर्घवृक्षश्चक्रकारो रथनामाऽतिमुक्तकः ।
अश्मगर्भः सर्वसारः क्रमसन्धारणोऽपि च ॥९०॥

तनोति रथादीन् **तिनिशः**, "तिनिश-"[हैमोणादिसू० ५३७] इति इशे निपात्यते; 15
"अतिक्रान्तो निशाः **तिनिशः**, चिरकालिकत्वात्" इति **क्षीरस्वामी**, तत्र । चित्रं करोति **चित्रकृत्**, लघुत्वेऽपि दाढर्च्य-दैर्घ्याभ्यामाश्चर्यकारी । नीयते **नेमिः**, "नी-सा-वृ-यु-शृ-बलि-दलिभ्यो मिः" [हैमोणादिसू० ६८७] इति मिः । "रथचक्रान्ते नमति **नेमिः**" इति **क्षीरस्वामी** । वन्यते—अर्थ्यते **वञ्जुलः**, "कुमुल-तुमुल-निचुल-"[हैमोणादिसू० ४८७] इत्युले निपात्यते । रथं साधयति **रथसाधकः** ॥८९॥ 20

दीर्घश्चासौ वृक्षश्च **दीर्घवृक्षः** । चक्रं करोति **चक्रकारः**, कर्मण्यण् । रथस्य नामाऽस्य **रथनामा** । अतिमुच्यते स्म अतिमुक्तः, विस्तीर्णत्वात्, [स्वार्थिके के **अतिमुक्तकः**] । अश्म गर्भेऽस्य **अश्मगर्भः** । सर्वश्चासौ सारश्च **सर्वसारः** । क्रमं सन्धारयति **क्रमसन्धारणः** । आह च—

---

१ "अत्र' शिग्रौ श्वेते श्वेतानि मरिचतुल्यानि फलान्यस्य श्वेतमरिचः" इति **स्वोपज्ञाभिधान-चिन्तामणिवृत्तौ** ॥ २ तिनिशे रथकृन्नेमि° नि० ॥ ३ °श्च कवरो नि० ॥

तिनिशश्चित्रकृद् नेमिः स्यन्दनो रथसाधकः ।
तथाऽरण्यो रथद्रुश्चाप्यतिमुक्तः
[ ] इति ।

तिनिशनामानि ॥९०॥

पलाशो किंशुकः पर्णः खरपर्णस्त्रिपत्रकः ।
त्रिवृन्तास्यो रक्तपुष्पः क्षीरश्रेष्ठः समिद्वरः ॥९१॥
बीजस्नेहो वातपोषो यज्ञियो ब्रह्मपादपः ।

प्रशस्तानि पलाशानि सन्त्यस्य **पलाशः**, अभ्रादित्वादः, पलं-मांसमश्नुते रक्तपुष्पत्वादिति वा, तत्र । किञ्चित् शुकः—नीलः **किंशुकः** । पर्णानि सन्त्यस्य **पर्णः**, अभ्रादित्वादः । खराणि पर्णान्यस्य **खरपर्णः** । [त्रीणि पत्राण्यस्य **त्रिपत्रकः**] । त्रीणि वृन्तानि आस्यमिवास्येति **त्रिवृन्तास्यः** । रक्तानि पुष्पाण्यस्य **रक्तपुष्पः** । क्षीरेण श्रेष्ठः **क्षीरश्रेष्ठः** । समिधं धरति **समिद्वरः** ॥९१॥

बीजेषु स्नेहोऽस्य **बीजस्नेहः** । वातं पोषयति **वातपोषः**, अच् । यज्ञमर्हति **यज्ञियः**, "यज्ञादियः" [सिद्ध० ६.४.१७९] इति इयः । ब्रह्मणः पादपो **ब्रह्मपादपः** । आह च—

किंशुको वीतशोकश्च रक्तपुष्पोऽथ याज्ञिकः ।
क्षीरश्रेष्ठः पलाशश्च बीजस्नेहः समिद्वरः ॥
त्रिवृन्तास्यो ब्रह्मवृक्षः खरपर्णस्त्रिपत्रकः ।
[ ] इति

चन्द्रोऽपि—

पलाशः किंशुकः [पर्णः] यज्ञियो रक्तपुष्पकः ।
क्षीरश्रेष्ठो वातपोषो ब्रह्मवृक्षः समिद्वरः ॥
[ ] इति ।

पलाशनामानि ।

धवे भारोद्वहो गौरः शकटाख्यो[1] धुरन्धरः ॥९२॥
कुलावो नन्दितश्चापि, सितः कृष्णश्च स द्विधा ।

---

१ त्रिवृन्ताख्यो रक्तपुष्पो बीजस्नेहः समिद्वरः ॥९१॥ क्षारश्रेष्ठो वातपोथो यज्ञिको ब्रह्म° नि० ॥
२ सकटाक्षो धुर ° नि० ॥

धुनोति **धवः**, अच्, तत्र । भारमुद्वहति **भारोद्वहः** । **गौरः** श्वेतवर्णत्वात् ; गूयते वा, "खुर-क्षुर-" [हैमोणादिसू० ३९६] इति रे निपात्यते । शकटस्य आख्याऽस्य **शकटाख्यः** । अत एव धुरं धारयति **धुरन्धरः**, "धारेर्धर्च" [सिद्ध० ५. १. ११३] इति खः प्रत्ययो धर् इत्ययमादेशश्च ॥९२॥

कुलमवति **कुलावः** । नन्दो जातोऽस्येति **नन्दितः**, तारकादित्वादितः । श्वेतः कालश्चायं 'द्विधा' द्विप्रकारः । आह च—

धवो नन्दितरुर्गौरः शकटाख्यो धुरन्धरः ।
[ ] इति ।

एतस्य लोके 'धव' इति प्रसिद्धिः ।

श्रीपर्ण्यां काश्मरी कृष्णवृन्तिका मधुपर्णिका ॥९३॥
गम्भारी सर्वतोभद्रा कञ्जला भद्रपर्णिका ।
विहारी कुमुदा हीरा महाकुम्भी च कश्मरी ॥९४॥
नित्यभद्रा महाभद्रा काश्मर्यो मधुमत्यपि ।

श्रीयुक्तानि पर्णान्यस्याः **श्रीपर्णी**, "पाक-कर्ण-पर्ण-वालान्तात्" [सिद्ध०२. ४.५५] इति ङीः, तस्याम् । "काशृङ् दीप्तौ" तालव्यान्तः, काशते **काश्मरी**, कृश्यति— तनूकरोति वा, "जठर-" [हैमोणादिसू० ४०३] इत्यरे निपात्यते । कृष्णं वृन्तमस्याः **कृष्णवृन्तिका** । मधूनि—मृष्टानि पर्णान्यस्याः मधुपर्णी, "पाक-कर्ण-पर्ण-वालान्तात्" [सिद्ध० २.४.५५] इति ङीः, स्वार्थिके के **मधुपर्णिका** ॥९३॥

"गमेः—चरत्वाद् भारोऽस्य **गम्भारी**" इति **क्षीरस्वामी** । सर्वतो भद्राण्यस्याः **सर्वतोभद्रा** । **कञ्जला** श्यामवृन्तत्वात् । भद्राणि पर्णान्यस्याः भद्रपर्णी, स्वार्थिके के **भद्रपर्णिका**। विहरत्यवश्यं **विहारी**, "णिन् चावश्यका-" [सिद्ध० ५.४.३६] इति णिन्। कौ पृथिव्यां मोदते **कुमुदा**, मूलविभुजादित्वात् कः । [1]हिनोति **हीरा**, "खुर-क्षुर-" [हैमोणादिसू० ३९६] इति र निपात्यते । महाकुम्भीव **महाकुम्भी** । कशति—दीप्यते **कश्मरी**, "जठर-" [हैमोणादिसू० ४०३] इत्यरे निपात्यते ॥९४॥

---

१. "कं—जलं बिभर्ति 'डुभृञ् धारण-पोषणयोः' 'कर्मण्यण्' [पा०३. २. १] पृषोदरादित्वाद् गत्वम् । कम्भारी इत्यपि ।" इत्यमरकोशव्याख्यासुधाटीकायाम् ॥ २. कट्फला नि०॥ ३. विहीरा कुमुदा हारी महा० नि०॥ ४ °दा वीरा पु २ । पु २ आदर्शे एतत्पाठानुसारिण्येव व्याख्या वर्तते । दृश्यतां टिप्पणी ६ ॥ ५ मधुपर्ण्यपि नि० ॥ ६ "विशेषेण ईरयति वीरयते वा वीरा; अजति—क्षिपति वा "ऋज्यजि-" [हैमोणादिसू० ३८८] इति किति रे 'वी'भावः ।" इति पु २ आदर्शे व्याख्या ॥

नित्यं भद्रमस्याः **नित्यभद्रा** । महती चासौ भद्रा च **महाभद्रा** । काशते—दीप्यते **काश्मर्यः**; कृश्यति—तनूकरोति वा, "शिक्या-ऽऽस्या-ऽऽढ्य-" [हैमोणादिसू० ३६४] इति ये निपात्यते । मधु विद्यते पर्णेष्वस्याः **मधुमती** । आह च—

काश्मर्यः काश्मरी [1]हीरा कश्मरी मधुपर्ण्यपि ।
श्रीपर्णी सर्वतोभद्रा गम्भारी कृष्णवृन्तिका ॥
[ ] इति ।

श्रीपर्णीनामानि । लोके 'सिवनी' इति प्रसिद्धिः ।

सप्तच्छदे शुक्तिपर्णो [2]गुच्छपुष्पः सुपर्णकः ॥९५॥
स्थूलपर्णो दीर्घ[3]वृक्षः शारदी विषमच्छदः ।
मदगन्धिर्विशालत्वग् गजद्विट् शाल्मलीदलः ॥९६॥
शिरो[4]रुग् देवविटपी सुमनो ग्रहनाशनः ।

सप्त च्छदान्यस्य **सप्तच्छदः**, तत्र । शुक्त्याकाराणि पर्णान्यस्य **शुक्तिपर्णः** । गुच्छ इव पुष्पाण्यस्य **गुच्छपुष्पः** । शोभनानि पर्णान्यस्य सुपर्णः, स्वार्थिके के **सुपर्णकः** ॥९५॥

स्थूलानि पर्णान्यस्य **स्थूलपर्णः** । दीर्घश्चासौ वृक्षश्च **दीर्घवृक्षः** । शरदि—ऋतुविशेषे भवा **शारदी**, "भवे" [सिद्ध० ६.३.१२३] इत्यण् । यद् **मङ्कः**—

त्रिष्वधृष्टे नवे शुद्धे शारदोऽपि शरद्भवे ।
अस्त्री संवत्सरे सप्तपर्णे च शारदी पुनः ॥
लाङ्गली [ ]

इति स्त्रियामाह । **अमर**स्तु—

सप्तपर्णो विशालत्वक् शारदो विषमच्छदः ।
[का० २ वर्ग ४ श्लो० २३]

इति पुंस्याह । विषमाणि च्छदान्यस्य **विषमच्छदः** । मदस्येव गन्धोऽस्य **मदगन्धिः**, पृषोदरादित्वादित्वम् । विशाला त्वगस्य **विशालत्वक्** । गजं द्वेष्टि **गजद्विट्** । शाल्मल्या इव दलान्यस्य **शाल्मलीदलः** ॥९६॥

---

१ वीरा पु २ ॥ २ गन्धपुष्पः सवर्णकः नि० ॥ ३ दीपवृक्षः शारदो विष[2] नि० ॥ ४ °रुर्गेहविटपः नि० ॥

शिरो रुजति **शिरोरुक्** । देवानां विटपी **देवविटपी** । सुष्ठु मन्यते **सुमनः**, अच् । ग्रहान् नाशयति **ग्रहनाशनः** । आह च—

सप्तपर्णः शुक्तिपर्णश्छत्रपर्णः सुपर्णकः ।
सप्तच्छदो गुच्छपुष्पस्तथा शाल्मलिपर्णकः ॥
[ ] इति ।

पुनराहुः—

सप्तपर्णो बृहत्त्वक् च सप्ताह्वो मुष्कपुष्पकः ।
सप्तच्छदः सप्तपत्रो युग्मपत्रोऽबहुच्छदः ॥
[ ] इति ।

सप्तपर्णनामानि । लोके तु 'सातवनउ' इति प्रसिद्धिः ।

आरग्वधे कृतमालः कर्णिकारः सुपर्णकः ॥९७॥
पीतपुष्पो दीर्घफलः शाम्याकश्चतुरङ्गुलः ।
व्याधिहाऽऽरेवतश्चूली प्रग्रहो राजपादपः ॥९८॥
आरोग्यशिम्बिका कर्णी स्वर्णशेफालिकेत्यपि ।

आ—समन्ताद् रङ्गति—शङ्कते अस्माद् **आरग्वधः**, "आरगेर्वधः" [हैमोणादिसू० २५४] इति वधः प्रत्ययः; आरञ्जयन्ति आरजः—मलाः तेषां वधोऽत्रेति वा; "आ—समन्ताद् रुजां वधोऽत्र" इति **क्षीरस्वामी**, तत्र । कृतम्—अतीसारं मलते धारयति **कृतमालः**; कृता मालाऽस्येति वा । उत्तम्भित इव सकर्णिकत्वात् कर्णिकामियर्ति **कर्णिकारः** । शोभनानि पर्णान्यस्य सुपर्णः, के **सुपर्णकः** ॥९७॥

पीतानि पुष्पाण्यस्य **पीतपुष्पः** । दीर्घं फलमस्य **दीर्घफलः** । शमीं—शम्बिमकति **शम्याकः**; शाम्यत्यनेनेति वा, "मवाक-श्यामाक-" [हैमोणादिसू० ३७] इत्याके निपात्यते । चतस्रः अङ्गुलयोऽस्य **चतुरङ्गुलः**, "बहुव्रीहेः काष्ठे टः" [सिद्ध० ७.३.१२५] इति टः समासान्तः । व्याधिं हतवान् **व्याधिहा**, नान्तः, "क्विप्" [सिद्ध० ५.१.१४८] इति क्विप् । आरेवत्यां भवः **आरेवतः**, "भवे" [सिद्ध०६.३.१२३] इत्यण् । आरेवन्ते—यान्ति ज्वरा अनेनेति वा, "दृ-पृ-भृ-मृ-शी-" [हैमोणादिसू० २०७] इत्यादि बहुवचनादतः । चूला विद्यते अस्य **चूली** । प्रगृह्यतेऽसौ अनेन वा **प्रग्रहः** । राजा चासौ पादपश्च **राजपादपः** ॥९८॥

---

१ "सादडिउ सत्तालू" इति पु २ टिप्पणी ॥ २ सुवर्णकः नि० ॥ ३ शम्पाक ° नि० ॥ ४ °तः स्थूलः प्र° नि० ॥

आरोग्यकारिशिम्बिरस्या आरोग्यशिम्बिः, स्वार्थिके के **आरोग्यशिम्बिका** । कर्णावस्य स्तः **कर्णी** । सुवर्णशेफालिकेव **स्वर्णशेफालिका** । आह च—

कर्णिकारो राजवृक्षः प्रग्रहः कृतमालकः ।
आरोग्यशम्बी शम्याको व्याधिघातोपघातकः ॥

आरग्वधो दीर्घफलो व्याघातश्चतुरङ्गुलः ।
आरेवतस्तथा कर्णी कर्णीवान् स च रेवतः ॥

[ ] इति ।

कृतमालनामानि । लोके तु 'किरमालउ' इति प्रसिद्धिः ।

बीजके प्रियकः शौरिर्गौरो बन्धूकपुष्पकः ॥९९॥
कृष्णसर्जो मदासर्जः कल्याणः पीवरोऽसनः ।
महासालः पीतसालो जीवकः प्रियसालकः ॥१००॥
सुगन्धिर्नीलनिर्यासस्तिष्यः पुष्योऽलकप्रियः ।

"वींक् प्रजन-कान्त्यसन-खादनेषु च" वेति वीयते वा वीजः "वियो जक्" [हैमोणादिसू० २२७] इति जक्; "बीजाः सन्त्यस्य वा बीजः, स्वार्थिके के **बीजकः**" इति **निघण्टुः** । आह च—

संज्ञया बीजको ज्ञेयो बीजपूरस्तथाऽसनः ।

[ ] इति,

तत्र । काम्यत्वात् **प्रियकः**; प्रीणाति वा, "कीचक-पेचक-" [हैमोणादिसू० ३३] इत्यकान्तो निपात्यते । शृणाति शीर्यते वा **शारिः**, "कृ-शॄ-कुटि-" [हैमोणादिसू० ६१९] इति णिदिः । गूयते **गौरः**, "खुर-क्षुर-" [हैमोणादिसू० ३९६] इति रे निपात्यते । बन्धूकस्येव रक्तानि पुष्पाण्यस्य बन्धूकपुष्पः, स्वार्थिके के **बन्धूकपुष्पकः** ॥९९॥

कृष्णः सर्जोऽस्य **कृष्णसर्जः** । मदमासृजति **मदासर्जः** । कल्याणहेतुत्वात् **कल्याणः**; "कलि शब्द-संख्यानयोः" कल्यते वा "कल्याण-पर्याणादयः" [हैमोणादिसू० १९३] इति णे निपात्यते । "प्यैङ् वृद्धौ" प्यायते **पीवरः**; पीयते रसोऽस्य वा, "तीवर-धीवर-" [हैमोणादिसू० ४४४] इति वरटि निपात्यते । "असूच् क्षेपे" अस्यति **असनः**, "ष्वसि-रसि-रुचि-" [हैमोणादिसू० २६९] इति अनः, [पुं-क्लीब-

१. शौरि[2] नि० ॥ २ महासर्जः नि० ॥ ३ महाशालः पीतशालो जीवकः प्रियशालकः नि० ॥

लिङ्गः] । महांश्चासौ सालश्च **महासालः** । पीतवर्णः सालः **पतीसालः** । जीवयति **जीवकः**, णकः । प्रियश्चासौ सालश्च प्रियसालः, के **प्रियसालकः** ॥१००॥

शोभनो गन्धोऽस्य **सुगन्धिः**, "सु-पूत्युत्-सुरभेर्गन्धादिद् गुणे" [सिद्ध० ७. ३.१४४] इति समासान्त इत् । नीलो निर्यासोऽस्य **नीलनिर्यासः** । त्वेषन्ति पुष्यन्ति च कार्याणि अत्र **तिष्यः पुष्यः**, उभावपि "कुप्य-भिद्योध्य-सिध्य-तिष्य-पुष्य-" [सिद्ध० ५.१.३९] इति क्यबन्तौ निपात्येते । अलकानां प्रियः **अलकप्रियः** । आह च—

बीजकस्त्वसनः काम्यः शारिः कृष्णोऽलकप्रियः ।
तिष्यः पुष्यः पीतसालः प्रियकः प्रियसालकः ॥
सुगन्धिर्नीलनिर्यासस्तथा बन्धूकपुष्पकः ।
स स्यात् प्रियकसालश्च महासर्जश्च नामतः ॥

[ ] इति ।

बीजकनामानि । एतस्य लोके 'बीअउ' इति प्रसिद्धिः ।

स तु द्विधा शिखिग्रीवः श्रेष्ठो गोमूत्रकोऽधमः ॥१०१॥

'सः' बीजको 'द्विधा' द्विप्रकारः । शिखिग्रीव इव **शिखिग्रीवः** 'श्रेष्ठः' उत्तमः । गोमूत्रप्रतिकृतिर्**गोमूत्रकः**, "तस्य तुल्ये कः संज्ञा-प्रतिकृत्योः" [सिद्ध०७.१.१०८] इति कः, अधमः ॥१०१॥

अश्वकर्णे दीर्घपत्रः कषायी सस्यसंवरः ।
सज्जकः सर्जकः शूरः कार्शः शालो लतातरुः ॥१०२॥

अश्वस्य कर्ण इव कर्णः—पत्रं यस्य स **अश्वकर्णः**, तत्र, "उष्ट्रमुखादयः" [सिद्ध० ३.१.२३] इति समासः । दीर्घाणि पत्राण्यस्य **दीर्घपत्रः** । कषायोऽस्त्यस्य **कषायी** । सस्यं—फलं संवृणोति **सस्यसंवरः** । सज्जति—विसर्पति **सज्जकः**, णकः । सृजति—विसर्पति **सर्जकः**, णकः । "शूरि वीरणि विक्रान्तौ" शूरयते **शूरः**, अच्; "शुं गतौ" शवति वा, "चि-जि-शु-सि-" [हैमोणादिसू० ३९२] इति रः । "कृश्यते **कार्शः**" इति **क्षीरस्वामी** । श्यति **शालः**, "शा-मा-श्या-शक्यम्व्यमिभ्यो लः"[हैमोणादिसू० ४६२] इति लः, तालव्यादिरयम् । "सल गतौ" दन्त्यादिः, सल्यते **सालः** इत्यपि । लता चासौ तरुश्च **लतातरुः** । **यदमरः**—

१ ° त्रगन्धकः नि० ॥ २ कवायः नि० ॥ ३ कार्ष्यशालो नि० ॥

साले तु सर्ज-कार्शा-ऽश्वकर्णकाः सस्यसंवरः ।
[का० २ वर्ग ४ श्लो० ४४] इति ।

अन्योऽप्याह—

सर्जकश्चाश्वकर्णश्च कषायी दीर्घपत्रकः ।
सस्यसंवरणः शूरः सज्जकः शाल उच्यते ॥
[ ]इति ।

अश्वकर्णनामानि । लोके तु 'सागु' इति प्रसिद्धिः ॥१०२॥

देवसालः शक्रतरुर्नदीसर्जोऽर्जुनाह्वयः ।
अर्जुनः ककुभः सेव्यः सर्पणो धूर्तपादपः ॥१०३॥

देवानां सालो **देवसालः** । शक्रस्य तरुः **शक्रतरुः** । अत एव **इन्द्रद्रुः** । नद्याः सर्जो **नदीसर्जः** । अर्जुनस्य आह्वयोऽस्य **अर्जुनाह्वयः** । अर्ज्यते "यम्यजि-" [हैमोणादिसू० २८८] इत्यादिना ने **अर्जुनः**, शौक्ल्याद्वा । ककुभः सन्त्यस्य **ककुभः**, दिग्व्यापकत्वात्; "ककि लौल्ये" ककते वा "ककेरुभः" [हैमोणादिसू० ३३३] इत्युभः; कं स्कुभ्नातीति वा पृषोदरादित्वात् साधुः । "कं स्कुभ्नातीत्यहृद्या व्याख्या" इति **क्षीरस्वामी** । **सेव्यः** सेवनीयत्वात् । "सृपॄलृं गतौ" सर्पति **सर्पणः** । धूर्तश्चासौ पादपश्च **धूर्तपादपः** । यदमरः—

नदीसर्जो वीरतरुरिन्द्रद्रुः ककुभोऽर्जुनः ।
[का० २ वर्ग ४ श्लो० ४५] इति ।

इन्दुरपि—

ककुभस्त्वर्जुनः पार्थो नदीसर्जो धनञ्जयः ।
आशीफलश्चित्रयोगी वीतो वीरान्तकस्तथा ॥
[ ] इति ।

एतस्य लोके 'अर्जुन' इति प्रसिद्धिः ॥ १०३ ॥

शाके कोलफलो द्वारदारुर्योगी हलीमकः ।
गन्धसारः स्थिरसारः स्थिरको ध्रुवको ध्रुवः ॥ १०४ ॥
अभ्रंलिहो महापत्रो बलेसारो बलप्रदः ।

---

१ अर्जुने ककुभः सेव्यः सुवर्णो धूर्तपादपः । देवशाकः शक्रतरुर्नदीसर्जोऽर्जुनाभिधः ॥१०३॥ नि० ॥

२ ध्रुवसाधनः नि० ॥ ३ बलसारो नि० ॥

शक्यतेऽनेन **शाकः**, तत्र । कोलाकारं फलमस्य **कोलफलः** । द्वारस्य दारु-**द्वारदारुः** । युनक्तीत्येवंशीलो **योगी**, "युज-भुज-" [सिद्ध० ५.२.५०] **इति** घिनण् । "मकुङ् मण्डने" हलिनं मङ्कते **हलीमकः**, पृषोदरादित्वात् साधुः । **गन्धेन सारो गन्धसारः** । स्थिरः सारोऽस्य **स्थिरसारः** । तिष्ठति स्थिरः, "शुषीषि-" [हैमोणादिसू० ४१६] इति किदिरः, स्वार्थिके के **स्थिरकः** । "ध्रुंत् गति-स्थैर्ययोः" **ध्रुवति** **ध्रुवकः**, "ध्रु-धून्दि-" [हैमोणादिसू० २९] इति किदकः । ध्रुवति **ध्रुवः**, "तुदादि-विषि-" [हैमोणादिसू० ५] इति किदः ॥ १०४ ॥

अभ्रं लेढि **अभ्रंलिहः**, "वहा-ऽभ्राल्लिहः" [सिद्ध० ५.१.१२३] **इति** खश् । महान्ति पत्राण्यस्य **महापत्रः** । **बलेसारः** अत्र सप्तम्यलोपः । बलं प्रददाति **बलप्रदः**, "क्वचित्" [सिद्ध० ५.१.१७१] इति डः । शाकनामानि ।

धर्मणे तु धनुर्वृक्षो गोत्रपुष्पो[1] रुजासहः ॥१०५॥
महाबलो महावृक्षो राजाह्वो धन्वनः [2]फलः ।
स्वादुफलो मृत्युफलः सारवृक्षः सुतेजनः ॥१०६॥

"धृङ् विध्वंसे" इति **बोपदेवः**, धरते कफ-पित्तादीन् **धर्मणः**, "चिक्कण-कुक्कण-" [हैमोणादिसू० १९०] इत्यणे निपात्यते ।

धर्मणः सर्पभेदेऽपि धर्मणः पादपान्तरे ।

इति **विश्वलोचनः** । [त्रिस्वरकाण्ड श्लो० ५८] ।

तत्र । धनुराकारो धनुषो वा वृक्षो **धनुर्वृक्षः** । गोत्रं—भूरक्षकं पुष्पमस्य **गोत्र-पुष्पः** । रुजां सहति **रुजासहः** ॥१०५॥

महद् बलमस्य **महाबलः** । महांश्चासौ वृक्षश्च **महावृक्षः** । राज्ञः आह्वा अस्य **राजाह्वः** । 'धन्वनः फलः' इति धन्वशब्दात् फलमिति सम्बध्यते, तेन **धन्वाकारं** फलमस्य **धन्वफलः** । **धन्वनो**ऽपि । यदाह—

धन्वनो गोत्रविटपी धर्मणो गोत्रपुष्पकः ।

[ ] इति ।

स्वादूनि फलान्यस्य **स्वादुफलः** । मृत्युप्रदं फलमस्य **मृत्युफलः** । सारश्चासौ वृक्षश्च **सारवृक्षः** । "तिजण् निशाने" सुतरां तेजयति **सुतेजनः** । एतस्य लोके 'धमणउ' इति प्रसिद्धिः ॥१०६॥

---

१ गोत्रवृक्षो रुजा० नि० ॥ २ फलम् नि० ॥

सिल्हके तु सिद्धवृक्षः

"सिलत् उञ्छे" दन्त्यादिः, सिलति सिल्हः, "बहुलम्" [सिद्ध०५.१.२] इति हः; सिलं जहाति वा, "क्वचित्" [सिद्ध०५.१.१७१] इति डः, स्वार्थिके के **सिल्हकः**, तत्र । सिध्यति स्म **सिद्धः**, स चासौ वृक्षश्च **सिद्धवृक्षः** ; सिद्धानां वृक्षो वा । आह च—

सिल्हकः कपिजो धूम्रस्तुरुष्कः पिण्डितः कपिः ।

[ ] इति ।

सिल्हकनामानि ।

कोलिपत्रे तु जोरणः ।

कोलिः—बदरी, तत्पत्राणीव पत्राण्यस्य **कोलिपत्रः**, तत्र । "जॄष् झॄष्च् जरसि" जीर्यति **जोरणः**, "चिक्कण-कुक्कण-" [हैमोणादिसू० १९०] इत्यणे निपात्यते ।

महापत्रे त्विङ्गुदी स्याद् विषशङ्कुः पलाशकः ॥१०७॥

महान्ति पत्राण्यस्य **महापत्रः**, तत्र । "इगु गतौ" इङ्गति **इङ्गुदी**, "इङ्गच-बिंभ्यामुदः" [हैमोणादिसू० २४२] इत्युदः, [त्रिलिङ्गः] । विषस्य शङ्कुरिव **विषशङ्कुः** । "पल गतौ" पलति पलाशः, "पलेराशः" [हैमोणादिसू० ५३३] इत्याशः, स्वार्थिके के **पलाशकः** ॥१०७॥

सरले तु सिद्धदारुर्नमेरुः खलिपादपः ।

"सृ गतौ" सरति **सरलः**, "मृदि-कन्दि-" [हैमोणादिसू० ४६५] इत्यलः, तत्र । सिद्धानां दारुः **सिद्धदारुः**, पुं-क्लीबलिङ्गः । नमति **नमेरुः**, "मयि प्रति-दाने" न मयते वा **नमेरुः**, "शिग्रु-गेरु-नमेर्वादयः" [हैमोणादिसू० ८११] इति नमेर्नञ्पूर्वस्य मयतेर्वा एच्चान्तः, रुः प्रत्ययः । खलिनां पादपः खली चासौ पादपश्चेति वा **खलिपादपः** । आह च—

सरलः पूतिकाष्ठं च बीज-पीतद्रुरुच्छ्रितः ।
दीपवृक्षः स्निग्धदारुः प्रोक्तो मारीचपत्रकः ॥

[ ] इति ।

एतस्य लोके 'सैरलउ' इति प्रसिद्धिः ।

---

१. त्वगादी नि० ॥ २ 'कुंदुरु' इति पु २ टिप्पणी ॥

देवदारुणि देवाह्वं पवनारिः पलाशिकः ॥१०८॥
पारिभद्रो द्रुकिलिमं किलिमं देववल्लभः ।
दारु च स्नेहविद्धं च देवेन्द्र-स्वर्गतो द्रुमः ॥१०९॥
पीत-पूति-महा-देव-भद्रेन्द्रात् काष्ठ-दारुणी ।

देवानां दारु **देवदारु**, तत्र । देवानामाह्वा—नामाऽस्य **देवाह्वम्** । पवनस्य अरिः **पवनारिः** । पलाशानि—पत्राणि सन्त्यस्य **पलाशिकः**, "अतोऽनेकस्वरात्" [सिद्ध० ७. २. ६] इतीकः ॥१०८॥

पारि—निष्ठां प्राप्तं भद्रमस्य **पारिभद्रः** । द्रौ—स्कन्धे किलिमं—निर्यासोऽस्य **द्रुकिलिमम्** । किलिममस्त्यस्य **किलिमम्**, अभ्रादित्वादः; पदैकदेशत्वाद्वा भीमवत्; "किलत् श्वैत्य-क्रीडनयोः" किलत्यनेन वा "वयिम-खचिमादयः" [हैमोणादिसू० ३५०] इतीमे साधुः । उभावपि क्लीबलिङ्गौ । देवानां वल्लभो **देववल्लभः** । देवदार्वेकदेशे **दारु**, यथा भीमो भीमसेनः । स्नेहेन विद्धं **स्नेहविद्धम्** । 'देवेन्द्र-स्वर्गतो द्रुमः' इति देव-इन्द्र-स्वर्गेभ्यः प्रत्येकं द्रुमशब्दः सम्बध्यते, तेन **देवद्रुमः इन्द्रद्रुमः स्वर्गद्रुमश्च** ॥१०९॥

'पीत-पूति-महा-देव-भद्रेन्द्रात् काष्ठ-दारुणी' इति पीतादिभ्यः प्रत्येकं 'काष्ठ-दारुणी' इति शब्दौ सम्बध्येते, तेन **पीतकाष्ठं, पीतदारु**, पूति—उग्रगन्धं काष्ठमस्य **पूतिकाष्ठम्**, एवं **पूतिदारु, महाकाष्ठं महादारु, देवकाष्ठं देवदारु, भद्रकाष्ठं भद्रदारु, इन्द्रकाष्ठं इन्द्रदारु** । सर्वेऽप्येते पुं-क्लीबलिङ्गाः । यदाह—

देवदारु स्मृतं दारु सुराह्वं किलिमं च तत् ।
स्नेहविद्धं महादारु भद्रदार्विन्द्रदारु च ॥
देवकाष्ठं भद्रकाष्ठं पूतिकाष्ठं च दारु च ।
सुरदार्विन्द्रवृक्षश्च तथैवामरदारु च ॥
[ ] इति ।

अमरोऽपि—

शक्रपादपः पारिभद्रकः ।
भद्रदारु द्रुकिलिमं पूतिदारु च दारु च ॥
[का० २ वर्ग ४ श्लो० ५३] इति ।

देवदारुनामानि ।

मधूके मधुशाकः स्यान्माधवो मधुको मधुः ॥११०॥
मध्वष्ठीलो मधुष्ठीलो मधुकाष्ठो मधुस्रवः ।
रोध्र-कोष-मधु गुडात् पुष्पो गोलफलोऽपि च ॥१११॥

मदयति **मधूकः**, " शम्बूक-शाम्बूक-" [हैमोणादिसू० ६१] इत्यूके निपात्यते, तत्र । मधुप्रधानः शाकः **मधुशाकः** । मा—माधुर्यश्रीः तस्या धवो **माधवः**; मधुरेव वा, प्रज्ञादित्वादण् । मदयति **मधुकः**, " कञ्चुकांशुक-" [हैमोणादिसू० ५७] इत्युके निपात्यते; मधुप्रतिकृतिर्**मधुक** इति वा, " तस्य तुल्ये कः संज्ञा-प्रतिकृत्योः" [सिद्ध० ७. १. १०८] इति कः; मधुरेव वा स्वार्थिकः कः । मन्यते **मधुः**, " मनि-जनिभ्यां ध-तौ च " [हैमोणादिसू० ७२१] इत्युः, पुंल्लिङ्गः ॥११०॥

मधु—माधुर्यमष्ठीले—गर्भे अस्य **मध्वष्ठीलः** । पृषोदरादित्वादकारलोपे **मधुष्ठीलः**, " ष्ठिवू क्षिवू निरसने " "ष्ठिवू-क्लमु-" [सिद्ध० ४. २. ११०] इति दीर्घे; मधु ष्ठीवति इति वा, " भिल्ला-ऽच्छभल्ल-" [हैमोणादिसू० ४६४] इति ले निपात्यते । मधुप्रधानः काष्ठो **मधुकाष्ठः** । मधु स्रवति **मधुस्रवः** । ' रोध्र-कोष-मधु-गुडात् पुष्पः ' इति रोध्र-कोष-मधु-गुडाद् इत्यत्र समाहारद्वन्द्वः, रोध्रादिभ्यः पुष्पम् इति पुरो योज्यते, तेन **रोध्रपुष्पः**, कोषे पुष्पाण्यस्य **कोषपुष्पः**, **मधुपुष्पः**, गुडवन्मधुरं पुष्पमस्य **गुडपुष्पः** । गोलानि—वर्तुलानि फलान्यस्य **गोलफलः** । यदाह—

मधूको मधुवृक्षश्च मधुष्ठीलो मधुस्रवः ।
गुडपुष्पो रोध्रपुष्पो वनप्रस्थोऽथ माधवः ॥
[ ] इति ।

मधूकनामानि । लोके तु 'महूडउ' इति प्रसिद्धिः ॥ १११ ॥

जलजेऽस्मिन् मधूलः स्याद्[1] वारिजो दीर्घपत्रकः ।
नीरवृक्षो गैरिकाख्यो ह्रस्वपुष्प-फलोऽपि च ॥ ११२ ॥

अस्मिन् जलजे मधूके मधु लाति **मधूलः**, पृषोदरादित्वात् साधुः । वारितो जातो **वारिजः**। दीर्घाणि पत्राण्यस्य दीर्घपत्रः, के **दीर्घपत्रकः** । नीरस्य वृक्षो **नीरवृक्षः** । गैरिक इत्याख्या अस्य **गैरिकाख्यः** । 'ह्रस्वपुष्प-फलः' इति **ह्रस्वशब्दात्** पुष्प-फले

१ °द् गिरिजो दीर्घपत्रकः । तीरवृक्षो गौरशालो ह्रस्व° नि० ॥

इति योज्येते, तेन ह्रस्वाणि पुष्पाणि फलानि चास्य **ह्रस्वपुष्पः ह्रस्वफलः** । आह च—

मधूकोऽन्यो मधूलस्तु जलजो दीर्घपत्रकः ।
ह्रस्वपुष्प-फलः स्वादुर्गैरिकाख्यो मधूलकः ॥
[ ] इति ।

एतस्य लोके 'महाडोलु' इति प्रसिद्धिः ॥११२॥

तिन्दुके स्फूर्जनस्तुष्टः कालस्कन्धो विरूपकः ।
निःस्यन्दनः कालसारो रावणो[2] नीलसारकः ॥११३॥

तिम्यति आर्द्रीभवति **तिन्दुकः**, "कञ्चुकांशुक-"[हैमोणादिसू० ५७] इत्युके निपात्यते, तत्र । "ट्वोस्फूर्जा वज्रनिर्घोषे" स्फूर्जति **स्फूर्जनः**, नन्द्यादित्वादनः । तुष्यति स्म **तुष्टः** । कालः स्कन्धोऽस्य **कालस्कन्धः** । विरूपयति **विरूपकः** । निःस्यन्दते **निःस्यन्दनः** । कालः सारः—मज्जाऽस्य **कालसारः** । रावयति **रावणः** । नीलः सारः—मज्जाऽस्य नीलसारः, के **नीलसारकः** । [आह च—]

तिन्दुको नीलसारश्च कालस्कन्धः शिशूत्सकः ।
स्फूर्जकः स्फूर्जनस्तुष्टः स्यन्दनो रावणो रवः ॥
[ ] इति ।

तिन्दुकनामानि । लोके 'टींडू' इति प्रसिद्धिः ॥ ११३ ॥

द्वितीये तिन्दुके काकतिन्दुर्मर्कटतिन्दुकः[3] ।
काकेन्दुकः काकपीलुः कुपीलु कुलकावपि ॥ ११४ ॥

'द्वितीये' भिन्ने तिन्दुके काकवर्णस्तिन्दुः **काकतिन्दुः** । मर्कटवर्णस्तिन्दुकः **मर्कटतिन्दुकः** । काकवर्णस्तिन्दुः काकेन्दुः, पृषोदरादित्वात् साधुः, के **काकेन्दुकः** । एवं **काकपीलुः** । कुत्सितः पीलुः **कुपीलुः** । "लक आस्वादने" कुत्सितैर्लक्यते **कुलकः**; कोलति वा, "ध्रु-धून्दि-" [हैमोणादिसू० २९] इति किदकः । आह च—

तिन्दुकोऽन्यो द्वितीयस्तु स्फूर्जकः काकतिन्दुकः ।
काकेन्दुकश्च विख्यातः कुपीलुः काकपीलुकः ॥
[ ] इति ।

---

१ स्फूर्जकस्तु° नि० ॥ २ द्रावणो नि० ॥ ३ कालस्तिन्दु° नि० ॥

एतस्य लोके 'काकटींडू' इति प्रसिद्धिः ॥ ११४ ॥

रोध्रे लोध्रः

रुणद्धि व्रणं **रोध्रः**, "भी-वृधि-रुधि-" [हैमोणादिसू० ३८७] इति रः, तत्र। र-ल्योरैक्याद् **लोध्रः**, प्रतीतोऽयम् ।

सिते तत्र शाबरैः स्थूलवल्कलः ।
उत्सादनो महारोध्रस्तरुः शबरपादपः ॥ ११५ ॥

'तत्र' इति रोध्रे 'सिते' श्वेते शबराणामयं वृक्षः **शाबरः**, "तस्येदम्" [सिद्ध० ६. ३. १६०] इत्यण्। स्थूलो वल्कलोऽस्य **स्थूलवल्कलः**। उत्साद्यते **उत्सादनः**, उत्सादयति वा । महांश्चासौ रोध्रश्च **महारोध्रः** । तरति **तरुः**, "भृ-मृ-तृ-त्सरि-" [हैमोणादिसू० ७१६] इत्युः । शबराणां पादपः **शबरपादपः** । आह च—

रोध्रो लोध्रः शाबरकश्चिल्लकस्तिल्वकस्तरः ।
तिरीटः कालहीनश्च चिल्ली शबरपादपः ॥

[ ] इति ।

श्वेतलोध्रनामानि ॥ ११५ ॥

रक्ते तु पट्टिका तिल्वः पट्टी लाक्षाप्रसादनः ।
तिरीटो मार्जनश्चिल्ली कानीनः क्रमुकः शाँशः ॥११६॥

स्थूलपत्रो बृहत्पत्रः

'तुः' पुनरर्थे । रक्ते लोध्रे पट्टी एव **पट्टिका**, स्वार्थिकः कः । तिलति—स्निह्यत्यङ्गमनेन **तिल्वः**, "प्रह्वा-ऽऽह्वा-" [हैमोणादिसू० ५१४] इति वे निपात्यते । पटति **पट्टी**, "घटा-घाटा-" [हैमोणादिसू० १४१] इति टे निपात्यते, गौरादित्वाद् ङीः; पट्टोऽस्यास्तीति **पट्टी** । "पट्टिकारोध्रोऽयम्" इति **क्षीरस्वामी** । **यदमरः**—

क्रमुकः पट्टिकाख्यः स्यात् पट्टी लाक्षाप्रसादनः ।

[का० २ वर्ग ४ श्लो० ४१] इति ।

---

१ °रस्तनुवल्कलः नि० ॥ २ °ध्रोऽनम्भः श° नि० ॥ ३ शिशुः ॥११६॥ स्थूलवल्को बृ° नि०॥

लाक्षां प्रसादयति **लाक्षाप्रसादनः** । तिरयति रोगांस्तिरीटः; तरति वा, "तृ-कृ-कृपि-" [हैमोणादिसू० १५१] इत्यादिना किदीटः। मार्ष्टि—उद्वर्तयत्यङ्गमनेन **मार्जनः** । चिल्लति—वातेन शिथिलीभवति **चिल्ली**, अच् । कन्याया अपत्यमिव **कानीनः**, "कन्या-त्रिवेण्याः कानीन-त्रिवर्णं च" [सिद्ध०६.१.६२] इति साधुः । यदाह—

रोध्रस्तिरीटः कानीनस्तिल्वकः सन्ततोद्भवः ।
[ ] इति ।

क्रामति **क्रमुकः**, "क्रमेः कृम् च वा" [हैमोणादिसू० ५३] इत्युकः । "शश प्लुतगतौ" शशति **शशः** ॥११६॥

स्थूलानि पत्राण्यस्य **स्थूलपत्रः** । बृहन्ति पत्राण्यस्य **बृहत्पत्रः** । आह च—

क्रमुकः पट्टिका रोध्रो गालवः स्थूलवल्कलः ।
जीर्णबुध्नो बृहत्त्वक्कस्तरः शाबरपादपः ॥
[ ] इति ।

अन्योऽप्याह—

रोध्रः शाबरकः श्वेतत्वगतीसारभेषजम् ।
द्वितीयः पट्टिका रोध्रो बृहत्पत्रस्तिरीटकः ॥
उत्तालकस्तिल्वकश्च पट्टी लाक्षाप्रसादनः ।
[ ] इति ।

मुनिलोध्रनामान्यमूनि ।

कृष्णलोध्रे तु गालवः ।

गालयति—स्रावयत्यक्षि **गालवः**, "कैरव-भैरव-" [हैमोणादिसू० ५१९] इत्यवे निपात्यते ।

भूर्जे भूजो बहुपुटो मृदुत्वक्को मृदुच्छदः ॥११७॥
रेखापत्रश्छत्रपत्रो बहुत्वक्-चर्मिणावपि ।

"भृश् भर्जने च" "ष्वादेः" [सिद्ध० ४. २. १०५] इति ह्रस्वे भृणाति **भूर्जः**, "उटजादयः" [हैमोणादिसू० १३४] इति अजे निपात्यते;

१. बहुपटो मृदुवल्को मृदु ° नि०॥

"ऊर्जण् बल-प्राणयोः" भुवि ऊर्जयति इति वा, तत्र । भुवि जातो **भूजः**, "क्वचित्" [सिद्ध० ५. १. १७१] इति डः । बहूनि पुटान्यस्य **बहुपुटः** । मृदूच-स्त्वचोऽस्य मृदुत्वक्, स्वार्थिके के **मृदुत्वकः** । मृदूनि छदान्यस्य **मृदुच्छदः** ॥११७॥

रेखायुक्तानि पत्राण्यस्य **रेखापत्रः** । छत्राकाराणि पत्राण्यस्य **छत्रपत्रः** । बहूचस्त्वचोऽस्य **बहुत्वक्** । चर्म–त्वचाऽस्यास्तीति **चर्मी**, शिखादित्वादिन् । आहुश्च–

भूर्जे भूजो बहुपुटो बहुत्वक्को मृदुच्छदः ।

[ ] इति ।

अमरोऽप्याह—

" भूर्जे चर्मि-मृदुत्वचौ" [का० २ वर्ग ४ श्लो० ४६] इति ।

भूर्जनामानि ।

श्लेष्मातके भूतवृक्षः पिच्छिलो द्विजकुत्सितः ॥११८॥
वसन्तकुसुमः शेलुः फलेलुर्लेखशाटकः ।
विषघाती बहुवारः शीत उद्दालकः सेलुः ॥११९॥

श्लिष्यति कफोऽस्मात् **श्लेष्मातकः**, "श्लेष्मातका-" [हैमोणादिसू० ८३] इत्यातके निपात्यते; श्लेष्माणमततीति वा, णकः प्रत्ययः, तत्र । भूतानां वृक्षो **भूतवृक्षः** । पिच्छाऽस्यस्य **पिच्छिलः**, "लोम-पिच्छादेः शेलम्" [सिद्ध० ७. २. २८] इतीलः । द्विजानां कुत्सितो **द्विजकुत्सितः** ॥११८॥

वसन्तस्य कुसुम इव **वसन्तकुसुमः** । शेरतेऽस्मिन् **शेलुः**, "शीङो लुः" [हैमोणादिसू० ८२०] इति लुः । "शिलति शिनोति वा रोगान् **शेलुः**" इति **क्षीरस्वाम्याह** । फलति **फलेलुः**, "गृहलु-गुग्गुलु-" [हैमणादिसू० ८२४] इति आलुप्रत्यये निपात्यते । लेखं शाटयति **लेखशाटकः** । विषस्य घाती **विषघाती** । बहु वृणोति श्रोतांसि **बहुवारः** । शीतवीर्यत्वात् **शीतः**, श्यायते स्म वा **शीतः**, क्तः प्रत्ययः, "श्यः शीर्द्रवमूर्ति-" [सिद्ध० ४.१. ९७] इति शीरादेशः; शेते अनेन वा, "शी-री-" [हैमोणादिसू० २०१] इति कित् तः । उद्दालयत्यङ्गम् **उद्दालकः**, स्पर्शेन स्फोटकारित्वात् । "सिलत् उञ्छे" दन्त्यादिरयम्, सिलति **सेलुः**, "भृ-मृ-तृ-त्सरि-" [हैमोणादिसू० ७१६] इत्यादिबहुवचनादुः । आहेन्दुः—

---

१. °कस्तथा नि०॥

शेलुः श्लेष्मातकः शीतो वसन्तकुसुमस्तथा ।
उद्दालकः कन्दुरकः शेलुको भूतवृक्षकः ॥
पिच्छिलः शपितः सेलुस्तथा स द्विजकुत्सितः ।
लेखशाटो बहुवारः [ ] इति ।

अन्योऽपि— ९

श्लेष्मातकः कबुदारुः पिच्छिलो लेखशाटकः ।
शेलुः सेलुर्बहुवारः शपितो द्विजकुत्सितः ॥
[ ] इति ।

एतस्य लोके 'गूंदी' इति प्रसिद्धिः ॥११९॥

लकुचे लिकुचो ग्रन्थिमत्फलः

"लषी कान्तौ" लष्यते **लकुचः**, "लषेरुचः कश्च" [हैमोणादिसू० ११९] इति उचः अन्त्यस्य च कः ; "लक्ष्यते—आस्वाद्यते **लकुचः**" इति **क्षीरस्वामी** , तत्र । पृषोदरादित्वादन्त्याक्षरस्य इत्वे **लिकुचः** । ग्रन्थिमन्ति फलान्यस्य **ग्रन्थिमत्फलः** । आह च—

लकुचः क्षुद्रपनसो निचुलो ग्रन्थिमत्फलः ।
[ ] इति ।

एतस्य लोके 'वडहर' इति प्रसिद्धिः ।

पनसे डहुः ।

लकुचः क्षुद्रपनसः

"पनी स्तुतौ" पन्यते **पनसः**, "तप्यणि-पन्यली-" [हैमोणादिसू० ५६९] इत्यसः; "**'फनस**" इति **दुर्गः** , तत्र । दह्यते **डहुः**, पृषोदरादित्वात् । **लकुच** इति प्राग्वत् । क्षुद्रश्चासौ पनसश्च **क्षुद्रपनसः** । एतस्य लोके 'कटहर' इति प्रसिद्धिः ।

तस्य तु न्युब्जकं फलम् ॥१२०॥

'तस्य' पनसस्य फलं "उब्जत् आर्जवे" न्युब्जति न्युब्जम् , अच् , स्वार्थिके के **न्युब्जकम्** ॥१२०॥

---

१ शपितो बहुकुत्सितः पु २ ॥ २ बकुले कण्टकी ग्रन्थिफलाम्बुपनसामेहुः । लकुचः **क्षुद्रपन**सस्तनु स्यात् कुब्जकं फलम् ॥१२०॥ नि०॥

आम्रे रसालो माकन्दः कामाङ्गः पिकबान्धवः ।
वनपुष्पोत्सवश्चूतः परपुष्टमदोत्सवः ॥१२१॥
मधुदूतो मधुफलः सुफलो मदिरासखः ।
वसन्तपादपः

अम्यते—अभिलष्यते **आम्रः**, "चि-जि-शु-सि-मि-तम्यमि-" [हैमोणादिसू० ३९२] इति रो दीर्घश्च, तत्र । रसं मलति—दधाति **रसालः** । "कदुङ् क्रदुङ् क्रदुङ् वैक्लव्ये" मा कन्दते **माकन्दः**, अजन्तः । कामस्य अङ्गः **कामाङ्गः** । पिकानां बान्धवः **पिकबान्धवः** । वने पुष्पैरुत्सवोऽस्माद् **वनपुष्पोत्सवः** । श्चोतति रसं **चूतः**; "चूष् पाने, चूष्यत इति [**चूतः**]" इति श्रीभोज उवाच, "पुत-पित्त-" [हैमोणादिसू० २०४] इति ते निपात्यते । परपुष्टस्य मदोत्सवावस्मात् **परपुष्टमदोत्सवः** ॥ १२१ ॥

मधोः—वसन्तस्य दूत इव **मधुदूतः** । मधूनि—मृष्टानि फलान्यस्य **मधुफलः** । शोभनानि फलान्यस्य **सुफलः** । मदिरायाः सखा इव **मदिरासखः**, "राजन्सखेः" [सिद्ध० ७.३.१०६] इत्यट् समासान्तः । वसन्तस्य पादपो **वसन्तपादपः** । आह च—

आम्रश्चूतो रसालश्च स चेष्टो मदिरासखः ।
कामाङ्गः सहकारश्च परपुष्टमदोत्सवः ॥
[ ] इति ।

एतस्य लोके 'आंबउ' इति प्रसिद्धिः ।

असौ तु सहकारोऽतिसौरभः ॥१२२॥

'तु' पुनः 'असौ' आम्रः अतिसौरभः सहकारयति—मेलयति स्त्री-पुंसौ **सहकारः**, सुरासखत्वाद्वा, उच्यते इति शेषः ॥ १२२॥

क्षुद्राम्रे स्यात् कृमितरुर्लाक्षावृक्षो जतुद्रुमः ।
सुकोशको घनस्कन्धः कोशाम्बुश्च सुरक्तकः ॥१२३॥
टङ्को नीलकपित्थोऽन्यो राजपुत्रो नृपात्मजः ।

क्षुद्रश्चासौ आम्रश्च **क्षुद्राम्रः**, तत्र । कृमीणां तरुः **कृमितरुः** । लाक्षावर्णो वृक्षो **लाक्षावृक्षः** । एवं **जतुद्रुमः** । शोभनः कोशोऽस्य सुकोशः, के **सुकोशकः** ।

१ °दोद्भवः नि० ॥ २ केशाम्बुश्च सुरक्तसः नि० ॥

घनः स्कन्धोऽस्य **घनस्कन्धः** । कोशे—मध्येऽम्बु अस्य **कोशाम्बुः** । सुतरां रक्तः सुरक्तः, के **सुरक्तकः** ॥१२३॥

"टकुण् बन्धने" टङ्कयते **टङ्कः**, पुं-क्लीबलिङ्गः । यद् **गौडः**—

जङ्घायां स्त्री पुमान् खड्गकोशे पाषाणदारणे ।
खनित्रे टङ्कणे नीलकपित्थे टङ्कमस्त्रियाम् ॥

[ ] इति ।

नीलश्चासौ कपित्थश्च **नीलकपित्थः** । 'अन्यः' अपरः राज्ञः पुत्रो **राजपुत्रः** । एवं **नृपात्मजः** । आह च—

क्षुद्राम्र उक्तकोशश्च लाक्षावृक्षः सुरक्तकः ।
जतुवृक्षो घनस्कन्धः कृमिवृक्षः सुकोशकः ॥
राजाम्रातक आम्लातो मन्मथोद्भवनस्तथा ।
टङ्को नीलकपित्थोऽन्यो राजपुत्रो नृपात्मजः ॥

[ ] इति ।

एतस्य लोके 'राजाम्र' इति प्रसिद्धिः ।

जम्ब्वां महाफला राजजम्बूर्नीलाम्बुजच्छदा ॥१२४॥
सुगन्धिपत्रा

जायते अस्यां **जम्बूः**, "कमि-जनिभ्यां बूः" [हैमोणादिसू० ८४७] इति बूः, स्त्रीलिङ्गः, तस्याम् । महान्ति फलान्यस्या **महाफला** । राज्ञो जम्बूः **राजजम्बूः** । नीलाम्बुजमिव च्छदान्यस्याः **नीलाम्बुजच्छदा** ॥१२४॥

सुगन्धीनि पत्राण्यस्याः **सुगन्धिपत्रा** । यदाह—

जम्बूः सुरभिपत्रा च राजजम्बूर्महाफला ।
सूक्ष्मपत्रा क्षुद्रजम्बूर्नादेयी भूमिजम्बुका ॥

[ ] इति ।

"**सूक्ष्मपत्रा**द्याश्चत्वारो नागरङ्गार्थाः" इति **गौडः** । जम्बूनामानि । लोके 'जांबू' इति प्रसिद्धिः ।

१. °म्बुकच्छदा नि० ॥

साऽन्या तु काकजम्बूः कुजम्बुका ।
उशीरपत्रा नादेयी वैदेशी काकवल्लभा ॥१२५॥

'तुः' पुनरर्थे । 'सा' जम्बूरन्या काकस्य जम्बूः **काकजम्बूः** । कुत्सिता जम्बूः कुजम्बूः, स्वार्थिके के **कुजम्बुका,** "ङ्यादीदूतः के" [सिद्ध० २. ४. १०४] इति ह्रस्वः । उशीरस्येव पत्राण्यस्या **उशीरपत्रा** । **नादेयी** नदीजाता । विदेशे भवा **वैदेशी** । काकस्य वल्लभा **काकवल्लभा** । आह च—

काकजम्बूर्मेघवर्णा नादेयी विशदोऽल्पकः ।
[ ] इति ।

तस्या विशेषोऽयम् ॥१२५॥

मदने श्वसनो राठः शल्यको विषनाशनः ।
करहाटो मरुबकः पिण्डी पिण्डीतकः फलः ॥१२६॥

सूर्यपुत्रः[1] कर्कटको विषगन्धो विषोदरः ।
मत्स्यान्तकफलो राजपुत्रकः कफवर्धनः ॥१२७॥

मदधातुर्हर्ष-ग्लपनार्थो घटादिः, मदयति **मदनः**, नन्द्यादित्वादनः, तत्र । "[अन] श्वसक् प्राणने" श्वसत्यनेन **श्वसनः**, "श्वसि-रसि-" [हैमोणादिसू० २६९] इत्यादिशब्दाद् अनः । राति **राठः**, "पष्ठैधिठादयः" [हैमोणादिसू० १६६] इति ठे निपात्यते । "**शल्यमस्यास्ति इति शल्यः**" इति **क्षीरस्वामी** ; "शल गतौ" शलति वा "स्था-छा-मा-" [हैमोणादिसू० ३५७] इति यः, स्वार्थिके के **शल्यकः** । विषं नाशयति **विषनाशनः** । करं हन्ति दुःस्पर्शत्वात् **करहाटः**, "कपट-कीकटा-दयः" [हैमोणादिसू० १४४] इति अटे निपात्यते; "हय हर्य क्रान्तौ च" चकारात् गतौ, करं हयतीति वा कर्मण्यण् । म्रियन्ते अनेन विषपुष्पत्वादिति **मरुबकः**, मा रौति वा, "कीचक-पेचक-" [हैमोणादिसू० ३३] इत्यके निपात्यते; मरौ बक इव सीदतीति वा । पिण्डमस्यास्ति **पिण्डी** । पिण्डीमितः—प्राप्तः पिण्डीतः, के **पिण्डीतकः**; पिण्डयते वा "ह्रु-रुहि-पिण्डिभ्य ईतकः" [हैमोणादिसू० ७९] इति "पिडुङ् सङ्घाते" इत्यस्माद् ईतकः प्रत्ययः । फलति **फलः** ; फलमस्यास्ति वा. अभ्रादित्वादः ॥१२६॥

---

१. मदने छर्दनो राठः नि० ॥ २. °त्र-कर्कटकौ नि० ॥

सूर्यस्य पुत्रः **सूर्यपुत्रः** । "कर्क हासे" सौत्रोऽयम्, कर्कति कर्कटः, "दिव्यवि-" [हैमोणादिसू० १४२] इत्यटः, स्वार्थिके के **कर्कटकः** । विषस्येव गन्धोऽस्य **विष-गन्धः** । विषमुदरेऽस्य **विषोदरः** । मत्स्यान्तकं फलमस्य **मत्स्यान्तकफलः** । राज्ञः पुत्रो राजपुत्रः, के **राजपुत्रकः** । कफं वर्धयति **कफवर्धनः** । आह च—

मदनः शल्यको राठः पिण्डी पिण्डीतकः फलः ।
तस्करः करहाटश्च छर्दनो विषपुष्पकः ॥

[ ] इति ।

मदननामानि । लोकेऽस्य 'मयणहल' इति प्रसिद्धिः ॥१२७॥

कुब्जके कामुकः श्यामसारः फुल्लो निमिद्रुमः ।

"कुङ् शब्दे" कवते कुब्जः, "कुवः कुब्-कुनौ च" [हैमोणादिसू० १२९] इति जक्प्रत्ययो अस्य च कुब् इत्यादेशः, स्वार्थिके के **कुब्जकः**, तत्र । कमनशीलः **कामुकः**, "शॄ-कम-" [सिद्ध० ५.२.४०] इत्युकण् । श्यामः सारः—मज्जाऽस्य **श्यामसारः** । फुल्लति—विकसति **फुल्लः** । नमतीव निमिः, "क्रमि-तमि-स्तम्भेरिच्च नमेस्तु वा" [हैमोणादिसू० ६१३] इति किदिः प्रत्ययोऽकारस्य च इकारः, स चासौ द्रुमश्च **निमिद्रुमः** । कुब्जकनामानि । लोके 'कुबउ' इति प्रसिद्धिः ।

निचुले तु नदीकान्तोऽम्बुजो हिज्जल इज्जलः ॥१२८॥
गन्धपुष्पो गुच्छफलोऽम्बुजातः कच्छपाल्यपि ।

"णिजूंकी शौचे च" चकारात् पोषणे, नेनेक्ति **निचुलः**, "कुमुल-तुमुल-निचुल-" [हैमोणादिसू० ४८७] इत्युले निपात्यते; निचुल्यते अम्बुनेति वा, "नाम्युपान्त्य-" [सिद्ध० ५.१.५४] इति कः, तत्र । नद्याः कान्तो **नदीकान्तः** । अम्बुनि जातो **अम्बुजः** । हिनोति **हिज्जलः**, एति इज्जलः, उभावपि "मुरलोरल-" [हैमो-णादिसू० ४७४] इत्यले निपात्येते । "हितजलापभ्रंशो हिज्जलः" इति **क्षीरस्वामी**, जलवेतसविशेषत्वादस्य ॥१२८॥

गन्धयुक्तं पुष्पमस्य **गन्धपुष्पः** । गुच्छाकारं फलमस्य **गुच्छफलः** । अम्बुनि जायते **अम्बुजातः** । कच्छं पालयति **कच्छपाली** । आह च—

---

१ °फलोऽनुवाकः कच्छकोल्यपि नि० ॥

इज्जलो हिज्जलो गुच्छफलः स्यात् कच्छकेतिका ।

[ ] इति ।

एतस्य लोके 'इजर' इति प्रसिद्धिः ।

वेतसे विदुलः शीतो नदीकूलप्रियो रथः ॥१२९॥
अभ्रपुष्पः पत्रमाली वानीरो वञ्जुलोऽपि च ।

"वींक् प्रजनादिषु" वैति—अम्भोऽनुवर्तते **वेतसः**, "तसः" [हैमोणादिसू० ५८०] इति तसः प्रत्ययः; "तसू दसूच् उपक्षये" वितस्यते वा पृषोदरादित्वात् साधुः, पुं-स्त्रीलिङ्गः, तत्र । "विदु अवयवे" विन्दति **विदुलः**, 'स्था-वङ्कि-" [हैमोणादिसू० ४८६] इत्युलो न लुक् च; "दुलण् क्षेपे" विदोल्यते वेगेनेति वा, 'नाम्युपान्त्य-" [सिद्ध० ५.१.५४] इति कः । **शीतो**ऽनुष्णवीर्येण दाहशमनात् । नदीकूलं प्रियमस्य **नदीकूलप्रियः** । रमन्तेऽस्मिन् **रथः**, "नी-नू-रमि-" [हैमोणादिसू० २२७] इति कित् थः ॥१२९॥

अभ्राणीव पुष्पाण्यस्य **अभ्रपुष्पः** । पत्राणि मलते धारयतीत्येवंशीलः **पत्रमाली** । वनति—भजत्यम्बु **वानीरः**, वन्यते वा, वनि-वपिभ्यां "णित् [हैमोणादिसू० ४२१] इति णिद् ईरः । "वज गतौ" वजति **वञ्जुलः**, "कुमुल-तुमुल-" [हैमोणादिसू० ४८७] इत्युले निपात्यते । आह च—

अथ वेतसे ॥

रथा-ऽभ्रपुष्प-विदुल-शीत-वानीर-वञ्जुलाः ।

[अमर० का० २ वर्ग ४ श्लो० २९-३०] इति ।

वेतसनामानि ।

स्यादम्बुवेतसे भीरुर्नादेयी बालभीरुकः ॥१३०॥
विदुलो मञ्जरी नम्रः परिव्याधो निकुञ्जकः ।

'अम्बुवेतसे' जलवेतसे बिभेतीत्येवंशीलो **भीरुः**, "भियो रु-रुक-लुकम्" [सिद्ध० ५.२.७६] इति रुः । नद्यां भवा **नादेयी**, "नद्यादेरेयण्" [सिद्ध० ६.३.२] इत्येयण् । बाल इव भीरुकः **बालभीरुकः** ॥१३०॥

विदुल इति प्राग्वत् । मज्जिः सौत्रो ध्वन्यर्थः, मज्जति **मञ्जरी**, "ऋच्छि-चटि-वटि" [हैमोणादिसू० ३९७] इत्यरः । नमनशीलो नम्रः, "स्म्यजस-हिंस-" [सिद्ध० ५.२.७९] इति रः । परिविध्यते अम्भसा **परिव्याधः** । नितरां कूयते **निकुञ्जः**; "कुवः कुब्-कुनौ च" [हैमोणादिसू० १२९] इति जक्प्रत्ययः कुन् इत्यादेशश्च, के **निकुञ्जकः** । आह च—

नादेयो मेघपुष्पोऽन्यस्तोयकामो निकुञ्जकः ।
जलौकाः संवृतोऽम्भोजो निचुलो जलवेतसः ॥
[ ] इति ।

जलवेतसोऽयम् । **चन्द्राद्यास्त्वविभागेनाऽऽहुः**—

वेतसो विदुलो नम्रो वञ्जुलो दीर्घपत्रकः ।
नादेयौ गन्धपत्रश्च जलौकाः संवृतस्तथा ॥
नदीकूलप्रियस्त्वन्यः सुशीतो मेघपुष्पकः ।
जलजातस्तोयकामो विदुलो जलवेतसः ॥
[ ] इति ।

निचुलाद्याः सर्वेऽप्येते वेतसविशेषाः ।

वरुणे गन्धवृक्षः स्यात् तिक्तशाकः कुमारकः ॥१३१॥

श्वेतपुष्पः श्वेतफलस्तमालो मारुतापहः ।
शीधुवृक्षः[1] श्वेतवृक्षः सेतुरश्मरिकारिपुः ॥१३२॥

"वृञ् वरणे" वृणोति **वरुणः**, कर्णिकावृक्षत्वात्, "ऋ-कृ-वृ-" [हैमोणादिसू० १९६] इत्यादिना उणः प्रत्ययः । "तृ-कृ-शृ-पृ-भृ-वृ-श्रु-शृ-रु-रुहि-" [हैमोणादिसू० १८७] इत्यादिना अण्प्रत्यये **वरणो**ऽपि, तत्र । गन्धयुक्तो वृक्षो **गन्धवृक्षः** । तिक्तरसः शाकः **तिक्तशाकः**, शाकमध्ये पाठात् । कुमारप्रतिकृतिः **कुमारकः**, "तस्य तुल्ये कः संज्ञा-प्रतिकृत्योः" [सिद्ध० ५. १. ५४] इति कः, नित्यं तरुणत्वात्; काम्यते कुमारः, "कमेरत उच्च" [हैमोणादिसू० ४०९] इत्यारः अकारस्य च उकारः, स्वार्थिके के **कुमारक** इति वा ॥१३१॥

---

१ साधुवृक्षः नि० ॥

श्वेतानि पुष्पाण्यस्य **श्वेतपुष्पः** । श्वेतानि फलान्यस्य **श्वेतफलः** । "तमूच् काङ्क्षायाम्" ताम्यति **तमालः**, "ऋ-कृ-मृ-वृ-तनि-तमि-" [हैमोणादिसू० ४७५] इत्यालः, [पुं-क्लीबलिङ्गः] । मारुतं—वायुमपहन्ति **मारुतापहः** । शीधोः वृक्षः **शीधुवृक्षः** । श्वेतश्चासौ वृक्षश्च **श्वेतवृक्षः** । सेतुमत्त्वात् **सेतुः**, पर्यन्ते रक्षाहेतुत्वात् ; "षिंगट् बन्धने" सिनोति वा **सेतुः**, "कृ-सि-कमि" [हैमोणादिसू० ७७३] इति तुन् । अश्मरिका—मूत्रबन्धनं तस्या रिपुः **अश्मरिकारिपुः**, अश्मरीहरत्वात् । आह च—

वरुणः श्वेतपुष्पश्च तिक्तशाकः कुमारकः ।
सेतुद्रुमः शीधुवृक्षस्तमालो मारुतापहः ॥

[ ] इति ।

वरुणनामानि । लोकेऽपि 'वरुणा' इति प्रसिद्धिः ॥१३२॥

अङ्कोठे स्यात् पीतसारो दीर्घकीलो निकोचकः ।
अङ्कोल्लकस्ताम्रफलो रेचको गन्धपुष्पकः ॥१३३॥

अङ्कचते—कीलकैर्लक्ष्यते **अङ्कोठः**, "पष्ठैधिठादयः" [हैमोणादिसू० १६६] इति ठे निपात्यते, तत्र । पीतः सारः—मज्जाऽस्य **पीतसारः** । दीर्घा कीला अस्य **दीर्घकीलः** । "कुंचच् कौटिल्या-ऽल्पीभावयोः" निकुञ्च्यते अस्मात् कण्टकित्वाद् **निकोचकः**, णके पृषोदरादित्वात् साधुः । अङ्कचते -कीलकैर्लक्ष्यते अङ्कोल्लः, "पिञ्छोल-कल्लोलं-" [हैमोणादिसू० ४९५] इत्योले निपात्यते, स्वार्थिके के **अङ्कोल्लकः** । प्राकृतेऽपि **अङ्कोल्लः** । ताम्राणि फलान्यस्य **ताम्रफलः** । **रेचको** विरेचकत्वात् । गन्धयुक्तानि पुष्पाण्यस्य गन्धपुष्पः, स्वार्थिके के **गन्धपुष्पकः** । आह च—

अङ्कोठोऽङ्कोल्लको रेची निर्दिष्टो दीर्घकीलकः ।
पीतसारस्ताम्रफलो गन्धपुष्पो निकोचकः ॥

[ ] इति ।

अङ्कोठनामानि । लोके 'आंकुल' इति प्रसिद्धिः ॥१३३॥

भल्लातके वीरतरुररुष्कोऽरुष्करो व्रणः ।
भौतिको भूतरुड् भूरिस्नेहः शोफकरो धनुः ॥१३४॥
अग्निमुखी बहुपत्रो भल्ली सूर्या-ऽग्निसंज्ञकः ।

"भल्लि परिभाषण-हिंसा-दानेषु" भल्लते **भल्लातकः**, "चण्डि-भल्लिभ्यामातकः" [हैमोणादिसू० ८२] इत्यातकः । "भल्ल इव अतति–वृणोति **भल्लातकः**" **इत्यमरे** [का० २ वग ४ श्लोक ४२] त्रिलिङ्गैः, तत्र । विशेषेण ईरयति **वीरः**, स चासौ तरुश्च **वीरतरुः** ; वीराणां तरुरिति वा, दुःशकत्वात् । अरूंषि–स्फोटैर्व्रणान् करोति **अरुष्कः**, "कचित्" [सिद्ध० ५.१.१७१] इति डः, "सङ्ख्या-ऽहर्दिवा-विभा-निशा-" [सिद्ध० ५.१.१०२] इति टे प्रत्यये **अरुष्करः**, उभयत्र "समासेऽसमस्तस्य" [सिद्ध० २.३.१३.] इति षत्वम् । "व्रणण् गात्रविचूर्णने" व्रणयति **व्रणः**, अच् । भूतैर्निर्वृत्तो **भौतिकः**, "निर्वृत्ते" [सिद्ध० ६.४.१०५] इतीकण् । अत एव भूतेभ्यो रोहति **भूतरुट्**, किप् । भूरिः–प्रचुरः स्नेहोऽस्य **भूरिस्नेहः** । शोफं करोति **शोफकरः** । धनुरिव **धनुः**, वक्रत्वात् ; धन्यते वा **धनुः**, "भृ-मृ-तॄ-त्सरि-" [हैमोणादिसू० ७१६] इत्युः ॥१३४॥

अग्निवन्मुखमस्या दाहकत्वाद् **अग्निमुखी** । बहूनि पत्राण्यस्य **बहुपत्रः** । भल्लीव **भल्ली** भेदकत्वात् ; "भल्लि परिभाषणादौ" अचि प्रत्यये ङ्यां च **भल्ली** । 'सूर्या-ऽग्निसंज्ञकः' इति **सूर्यसंज्ञः**, तापकत्वात् ; **अग्निसंज्ञः**, दाहकत्वात् । एवमन्येऽपि । आह च—

भल्लातकः स्मृतोऽरुष्को दहनस्तपनोऽग्निकः ।
अरुष्करो वीरतरुर्भल्ली चाग्निमुखी धनुः ॥
[ ] इति ।

भल्लातकनामानि । लोके 'भीलामा' इति प्रसिद्धिः ।

अरिष्टे स्यात् कृष्णबीजो[२] रक्षाबीजोऽर्थसाधनः ॥१३५॥
शुभनामा शीतफेनः[३] फेनिलो गर्भपातनः ।

न रिष्यते–न हिंस्यते अनेन **अरिष्टः** रक्षाहेतुः, तत्र । कृष्णानि बीजान्यस्य **कृष्णबीजः** । रक्षाकारि बीजमस्य **रक्षाबीजः** । अर्थं साधयति **अर्थसाधनः** ॥१३५॥

शुभस्य नामास्य **शुभनामा** । शीताः फेनाः अस्य **शीतफेनः** । फेनाः सन्त्यस्य **फेनिलः**, "प्रज्ञा-पर्णोदक-फेनाच्छेलौ" [सिद्ध० ७.२.२२] इति इलः प्रत्ययः । गर्भं पातयति **गर्भपातनः** । यदाह **चन्द्रः**—

---

१ "वीरवृक्षोऽरुष्करोऽग्निमुखी भल्लातकी त्रिवु ॥४२॥" इत्यमरे का० २ वर्ग ४ ॥
२ कृष्णवर्णो रक्तबीजो० नि० ॥ ३ पीतफेनः नि० ॥

अरिष्टकस्तु मङ्गल्यः कृष्णबीजोऽर्थसाधनः ।
रक्षाबीजः शीतफेनः फेनिलो गर्भपातनः ॥

[ ] इति ।

अरिष्टकनामानि । लोके 'अरीठा' इति प्रसिद्धिः ।

निम्बे तु सर्वतोभद्रः पारिभद्रः सुतिक्तकः ॥१३६॥

पिचुमन्दो यवनेष्टः शक्रेष्टः[1] शुकमालकः ।
अरिष्टो हिङ्गुनिर्यासो नेता नियमनोऽपि च ॥१३७॥

नयति रोगान् उपशमं **निम्बः**, "डी-नी-बन्दि-" [हैमोणादिसू० ३२५] इति डिदिम्बः; निम्ब्यते–सिच्यते वा, तत्र । सर्वतो भद्रमस्मात् **सर्वतोभद्रः** । पारि–निष्ठां प्राप्तं भद्रमस्य **पारिभद्रः** । सुतरां तिक्तः सुतिक्तः, के **सुतिक्तकः** ॥ १३६॥

पिचुं–तूलं मन्दयति **पिचुमन्दः**[2] । "अरोमशत्वात्, "**पिचुमर्दः**"[3] इत्येके । "यवनानामिष्टो **यवनेष्टः**" इति **सौश्रुतः** । शक्रस्य इष्टः **शक्रेष्टः** । शुकैर्माल्यते–वेष्टयते **शुकमालकः** । **चन्द्रनन्दनस्तु शुकमाल**माह । एतस्यैकदेशे **मालको**ऽपि । "रिष हिंसायां" न रिष्यते **अरिष्टः** । हिङ्गुगन्धिर्निर्यासोऽस्य **हिङ्गुनिर्यासः** ।

"हिङ्गुनिर्यासशब्दोऽयं निम्बे हिङ्गुरसेऽपि च ।"
इति **शाश्वतः** [श्लोक० ३७३] इति ।

नयति रोगानुपशममिति **नेता** । नियम्यन्ते रोगा अनेन **नियमनः**, "करणा-ऽऽधारे" [सिद्ध० ५.३. १२९] इत्यनट् । आह च—

निम्बो नियमनो नेता पिचुमन्दः सुतिक्तकः ।
अरिष्टः सर्वतोभद्रः सुभद्रः पारिभद्रकः ॥

[ ] इति ।

एतस्य लोके 'नींब' इति प्रसिद्धिः ॥१३७॥

---

१ शुकेष्टः नि० ॥ २ "पिचुमन्दः; अरोगकृत्त्वाद् अपिचमन्त्येनमिति वा "कुसुद-" [हैमोणादिसू० २४४]इति निपात्यते" इत्यभिधानचिन्तामणिस्वोपज्ञटीकायाम् ॥ ३ एके अमरादयः । तथाहि—"अरिष्टः सर्वतोभद्र-हिङ्गुनिर्यास-मालकाः । पिचुमर्दश्च निम्बे" [अमर० का० २ वर्ग ४ श्लो० ६२] इति ॥

महानिम्बे निम्बरकः कामुको विषमुष्टिकः ।
रम्यकः क्षीबको वृक्काऽक्षिपीलुः केशमुष्टिकः ॥१३८॥

महांश्चासौ निम्बश्च **महानिम्बः**, तत्र । निम्बवद् रक्यते—आस्वाद्यते **निम्बरकः** । कमनशीलः **कामुकः** । विषस्य मुष्टिरिव विषमुष्टिः, के **विषमुष्टिकः** । रमयति रम्यः, "भव्य-गेय-जन्य-रम्य-" [सिद्ध० ५.१.७] इति साधुः, स्वार्थिके के **रम्यकः** । "क्षीवृङ् मदे" क्षीवते **क्षीबकः** । [वृज्यते **वृक्का**, "निष्क-तुरुष्क-" [हैमोणादिसू० २६] इति के निपात्यते] । अक्ष्णि पीलुः **अक्षिपीलुः** । केशानां मुष्टिः केशमुष्टिः, के **केशमुष्टिकः** । आह च—

महानिम्बः स्मृतोद्रेकः कामुको विषमुष्टिकः ।
केशमुष्टिर्निम्बरको रम्यकः क्षीब एव च ॥
[ ] इति ।

एतस्य लोके 'बकायणि' इति प्रसिद्धिः ॥१३८॥

पीलौ स्रंसी सहस्राङ्गी शीतः करभवल्लभः ।
गुल्मारिर्गुडफलश्च

पीयते माधुर्यात् **पीलुः**, "पीङः कित्" [हैमोणादिसू० ८२१] इति लुः; पीड्यते इति वा, "केवयु भुरण्यु-" [हैमोणादिसू० ७४६] इति उप्रत्यये निपात्यते, पुंल्लिङ्गः, तत्र । 'स्रंसूङ् प्रमादे" स्रंसते स्रंसयते वेत्येवंशीलः **स्रंसी**, "अजातेः शीले" [सिद्ध० ५. १. १५४] इति णिन् । सहस्रमङ्गानि सन्त्यस्य **सहस्राङ्गी** । शीतफलैकदेशः **शीतः**, शीतलवीर्यत्वाद्वा । करभाणां वल्लभः **करभवल्लभः** । गुल्मस्य अरिः **गुल्मारिः** । गुडवन्मधुराणि फलान्यस्य **गुडफलः** । आह च—

पीलुः शीतफलः स्रंसी धारी गुडफलोऽपि च ।
विरेचनफलः शाखी श्यामः करभवल्लभः ॥
[ ] इति ।

पीलुनामानि । लोके 'पील्लू' 'वेणु' इति वा प्रसिद्धिः ।

तस्मिंस्तु गिरिसम्भवे ॥१३९॥

---

१ निम्बकश्च कार्मुको नि० ॥ २ वृक्षोऽक्षि ° नि० ॥ ३ ° स्राङ्गः शीतः नि० ॥ ४ ° लश्चाथास्मिंस्तु नि० ॥

अक्षोटः कर्परालश्च फलस्नेहो गुहाश्रयः ।

'तुः' पुनः 'तस्मिन्' पीलौ 'गिरिसम्भवे' गिरिजाते ॥१३९॥—

"अक्षौ व्याप्तौ च" अक्ष्णोति **अक्षोटः**; अश्नाति वा, "कपोट-वकोटा-ऽक्षोट-" [हैमोणादिसू० १६१] इत्योटे निपात्यते । कर्परे अलति—दीप्यते **कर्परालः** । "कन्द-राऽस्यास्ति कन्दरां लाति वा **कन्दरालः**, कन्दरावेष्टनात्" इत्यपरे । फले स्नेहोऽस्य **फलस्नेहः** । गुहायामाश्रयोऽस्य **गुहाश्रयः** । आह च—

अक्षोटः पार्वतीयश्च फलस्नेहो गुहाश्रयः ।
कीरेष्टः कन्दरालश्च स्वादुमज्जो मृदुच्छदः ॥

एतस्य लोके 'अखोड' इति प्रसिद्धिः ।

पारापते तु साराम्लः कृतमालः परावतः ॥१४०॥
आरेवतः सारफलः

पारमापतति **पारापतः**, लिहादित्वादच्, तत्र । सारः—मज्जा अम्लोऽस्य **साराम्लः** । कृता मालाऽस्य **कृतमालः** । "पॄङ् पालन-पूरणयोः" "प्वादेः-" [सिद्ध०४.२.१०५] इति ह्रस्वे पृणाति **परावतः**, "पुत-पित्त-" [हैमोणादिसू० २०४] इति ते निपात्यते ॥१४०॥

आरेवत्यां भवः **आरेवतः**; "रेवृङ् गतौ" आरेवन्ते ज्वरा अनेन वा । सारं फलमस्य **सारफलः** ।

महापारावतो(ऽते) महान् ।
कपोताण्डतुल्यफलः

महांश्चासौ पारावतश्च **महापारावतः**, तत्र । महापारावतैकदेशे **महान्**, यथा सेनो भीमसेनः । कपोताण्डतुल्यानि फलानि अस्य **कपोताण्डतुल्यफलः** ।

रुद्राक्षे तु महामुनिः ॥१४१॥

रुद्रस्य अक्षि **रुद्राक्षः**, "सक्थ्यक्ष्णः-" [सिद्ध०७.३.१२६] इत्यट् (ऽइति टः) समासान्तः, तत्र । मन्यते मुनिः, "मनेरुदेतौ चास्य वा" [हैमोणादिसू० ६१२] इति इः अकारस्य च उकारः, महांश्चासौ मुनिश्च **महामुनिः** ॥१४१॥

---

१ गुहाशयः नि० ॥ २ पारावारे तु साराम्लो रक्तमालः नि० ॥

स तु चतुर्मुखो ब्रह्मा

'सः' रुद्राक्षः चतुर्मुखो **ब्रह्मो**च्यते ।

द्विमुखस्तु वरार्गलः ।

'तुः' पुनरर्थे । वरा अर्गला अस्य **वरार्गलो** द्विमुखः प्रोच्यते ।

षण्मुखस्तु कार्त्तिकेयः

'तुः' पुनरर्थे । षण्मुखः **कार्तिकेय** उच्यते ।

पञ्चमुखस्तु शङ्करः ॥१४२॥

'तु' पुनः पञ्चमुखो रुद्राक्षः **शङ्कर** उच्यते ॥१४२॥

माधवस्त्वेकवदनो विजयी शस्त्रधारणः ।

'तु' पुनः एकवदनो मा–लक्ष्मीस्तस्या धवो **माधवः** । विजयोऽस्त्यस्य **विजयी** । शस्त्रं धारयति **शस्त्रधारणः** । रुद्राक्षनामानि ।

पुत्रञ्जीवे त्वक्षफलः कुमार-जीवनामकः ॥१४३॥

पुत्रं जीवति **पुत्रञ्जीवः**, पृषोदरादित्वान्मोऽन्तः, तत्र । अक्षवत् फलान्यस्य **अक्षफलः** । 'कुमारजीवनामकः' इति कुमार-जीवाभ्यां पुरो नामेति शब्दः सम्बध्यते, तेन **कुमारनामकः जीवनामकश्च** । पुत्रञ्जीवनामानि ॥१४३॥

करञ्जे स्यान्नक्तमालः पूतिकश्चिरिबिल्वकः ।
करजः श्लीपदारिश्च प्रकीर्णः कलिनाशकः ॥१४४॥
पूतिकरञ्जो गौरश्च सुमना घृतपर्णकः ।

करं जयति **करञ्जः**, "क्वचित्" [सिद्ध० ५.१.१७१] इति ड पृषोदरादित्वात् साधुः; करोति वा "कृगोऽञ्जः" [हैमोणादिसू० १३६] इत्यञ्जः, तत्र । नक्तं–रात्रौ आलम्–अनर्थोऽस्माद् **नक्तमालः**, भूताश्रयत्वात् । **रक्तमालः** इत्येके । **पूतिको** दुर्गन्धः । चिरिणं बिलति–भिनत्ति चिरिबिल्वः, "नि-घृ-षी-" [हैमोणादिसू० ५११] इति किद्वः, स्वार्थिके के **चिरिबिल्वकः** । करं जयति **करजः**, "क्वचित्" [सिद्ध० ५.१.१७१] इति डः; कीर्यते वा "उटजादयः" [हैमोणादिसू० १३४] इत्यजे निपात्यते । श्लीपदस्य अरिः **श्लीपदारिः** । प्रकीर्यते **प्रकीर्णः**, क्तप्रत्ययः । कलिं

१. ° श्चिरबि ° नि० ॥ २ प्रकीर्यः कलिनाशनः नि० ॥ ३ एके क्षीरस्वाम्यादयः । "रक्तमाल इति स्वामी" इति व्याख्यासुधायाम् ॥ ४ कीडीनगरउ पु २ टिप्पणी ॥

नाशयति **कलिनाशकः** । अत एव **कलिमारकः** ॥१४४॥

पूतिः- दुर्गन्धः स चासौ करञ्जश्च **पूतिकरञ्जः** । **गौरः** श्वेतत्वात् । सुष्ठु मनोऽस्य **सुमनाः** । घृतवन्ति पर्णान्यस्य घृतपर्णः, के **घृतपर्णकः** । यद् **इन्दुः**—

करञ्जो नक्तमालश्च पूतिकश्चिरिबिल्वकः ।
घृतपर्णः करजोऽन्यः प्रकीर्यो गौर एव च ॥
पूतिकरञ्जः सुमनास्तथा कलहनाशनः ।
[ ] इति ।

अन्योऽपि—

चिरिबिल्वो नक्तमालः करजश्च करञ्जके ॥
प्रकीर्यः पूतिकरजः पूतिकः कलिमारकः ।

[अमर० का० २ वर्ग ४ श्लो० ४७-४८] **इति** ।

करञ्जनामानि । लोके 'करञ्जूयउ' इति प्रसिद्धिः ।

भेदास्त्वस्य त्रयस्तत्र षड्ग्रन्थे हस्तिवारणी ॥१४५॥

'अस्य' करञ्जस्य त्रयो भेदाः । 'तत्र' भेदत्रिके षड् ग्रन्थयोऽस्य **षड्ग्रन्थः**, पृषोदरादित्वात् साधुः, तस्मिन् । हस्तिनं वारयति **हस्तिवारणी** ॥१४५॥

मर्कट्यां तु कृतमालः उदकीर्यः प्रकीर्यकः ।

मर्दयति अङ्गपाटनाद् **मर्कटी**, "कपट-" [हैमोणादिसू० १४४] इत्यटे निपात्यते; मर्किः सौत्रः, मर्कति वा **मर्कटी**, "दिव्यवि-" [हैमोणादिसू० १४२] इत्यटः, स्त्रीलिङ्गः, तस्याम् । कृतम् आलम्—अनर्थोऽनेन **कृतमालः** । उत्कीर्यते **उदकीर्यः**, पृषोदरादित्वात् । प्रकीर्यते प्रकीर्यः, के **प्रकीर्यकः** ।

अङ्गारवल्ल्यां शार्ङ्गस्था कासघ्नी करतालिका ॥१४६॥

अङ्गार इव वल्लयोऽस्य **अङ्गारवल्ली**, तस्याम् । शार्ङ्गे तिष्ठति **शार्ङ्गस्था**, "स्था-पा-स्ना-त्रः-" [सिद्ध० ५.१.१४२] इति कः । कासं हन्ति **कासघ्नी** । करं ताडयति करताली, ड-लयोरैक्यात्, [स्वार्थिके के **करतालिका**] । आह च—

---

१ ° ग्रन्था हस्तिवारणी नि० ॥

उदकीर्यस्तृतीयोऽन्यः षड्ग्रन्थो हस्तिवारणी ।
अङ्गारवल्ली शार्ङ्गेस्था काक(?स)घ्नी करतालिका ॥

[ ] इति ।

करञ्जभेदा अमी ॥१४६॥

रोहीतके रोहितको रोही दाडिमपुष्पकः ।
रोहेडकः सदापुष्पो रोचनः प्लीहरक्तहा ॥१४७॥

रोहयति **रोहीतकः**, "रुहं जन्मनि" रोहतीति वा छिन्नप्ररूढत्वात्, "हृ-रुहि-पिण्डिभ्य ईतकः" [हैमोणादिसू० ७९] इतीतकः, तत्र । "हृ-स्या-रुहि-शोणि-पलिभ्य इतः" [हैमोणादिसू० २१०] इतीते प्रत्यये रोहितः, स्वार्थिके के **रोहितकः** । रोहयत्यवश्यं **रोही**, "णिन् चावश्यका-" [सिद्ध० ५. ४. ३६] इति णिन् । दाडिमपुष्पाणीव पुष्पाण्यस्य दाडिमपुष्पः, "उप्टूमुखादयः" [सिद्ध० ३.१.२३] इति समासः, स्वार्थिके के **दाडिमपुष्पकः** । रोहति रोहेडः, "विहड-कहोड-" [हैमोणादिसू० १७२] इत्यडे निपात्यते, के **रोहेडकः** । सदा पुष्पाण्यस्य **सदापुष्पः** । रोचयति **रोचनः** । प्लीह-रक्ते हन्ति **प्लीहरक्तहा** । **'प्लीहहा रक्तहा' इत्यपरे** । आह च—

रोहितको रोचनकः प्लीहघ्नो रक्तपुष्पकः ।
रक्तघ्नो रोहितो रक्तो रोही दाडिमपुष्पकः ॥

[ ] इति ।

एतस्य लोके 'रोहीडउ' इति प्रसिद्धिः ॥१४७॥

कट्फले तु सोमवल्कः कैडर्या गोपभद्रिका ।
कुम्भी कुमुदिका भद्रा श्रीपर्णी भद्रवत्यपि ॥१४८॥

कटति—आवृणोति कषायत्वात् क्विपि कट्, इदक् फलमस्य **कट्फलः**, तत्र । सोमस्येव वल्कमस्य **सोमवल्कः** । कं-रसमीष्टे—स्तौति **कैडर्यः**, "शिक्या-ऽऽस्या-ऽऽद्य-" [हैमोणादिसू० ३६४] इति ये निपात्यते ; "अविभावितप्रकृति-प्रत्ययार्थोऽयं वा" इति **क्षीरस्वामी** । द्वयर्थे **कैडर्यः** कट्फलो मदनफलं च । गोपानां भद्रिकेव **गोपभद्रिका** । **कुम्भी** रसाधारत्वात् । कुमुदप्रतिकृतिः **कुमुदिका**; कौ मोदते वा । भद्र

१ रोहडकः नि० ॥ २ रोचना नि० ॥

मस्यास्ति **भद्रा**, अभ्रादित्वादः । श्रीयुक्तानि पर्णान्यस्याः **श्रीपर्णी**, सुपर्णत्वात्, "पाक-कर्ण-पर्ण-" [सिद्ध० २.४.५५] इति ङीः । भद्रमस्त्यस्या **भद्रवती**, "तदस्या-स्त्यस्मिन्निति मतुः" [सिद्ध० ७.२.१] इति मतुः । आह च—

कट्फलः सोमवल्कश्च श्रीपर्णी कुमुदा तथा ।
महाकषायोग्रगन्धिः क्षिप्रगर्भः प्रचेतनः ॥
महाकुम्भी च कुम्भीका भद्रा भद्रवतीति च ।
[ ] इति ।

एतस्य लोके 'कायफल' इति प्रसिद्धिः ॥१४८॥

दाडिमे कुट्टिमः कीरवल्लभः फलषाण्डवः ।
करको रक्तबीजश्च

दाल्यते–भेद्यते **दाडिमः**, " वयिम-खचिमादयः " [हैमोणादिसू० ३५०] इतीमे निपात्यते, तत्र । " कुट्टण् कुत्सने च" चकारात् छेदने, कुट्टयते **कुट्टिमः**, "कुट्टि-वेष्टि-" [हैमोणादिसू० ३४९] इति इमः प्रत्ययः । कीराणां–शुकानां वल्लभः **कीरवल्लभः** । फलं षाण्डव इवास्य **फलषाण्डवः** । किरति कणान् **करकः**, " दृ-कृ-नृ-सृ-" [हैमोणादिसू० २७] इत्यादिना अकः, पुंल्लिङ्गः । रक्तानि बीजानि अस्य **रक्तबीजः** । आह च—

दाडिमो दालिमः सारः कुट्टिमः फलषाण्डवः ।
स्वाद्वम्लो रक्तबीजश्च करकः शुकवल्लभः ।
[ ] इति ।

एतस्य लोके 'दाडिमसार' इति प्रसिद्धिः ।

अथौड्रपुष्पे जपा जवा ॥१४९॥

ओड्रदेशे भवम् औड्रम्, "भवे" [सिद्ध० ६. ३. १२३] इत्यण्, तच्च तत् पुष्पं च **औड्रपुष्पम्**, तत्र । जपतीव **जपा**, अच् । जपादित्वाद् वत्वे **जवा** ॥१४९॥

धातक्यां[1] स्याद् धातुपुष्पी बर्हिपुष्प्यग्निपुष्पिका ।
ताम्रपुष्पी सुभिक्षा च कुञ्जरा मद्यपाचनी ॥१५०॥

---

१. दन्तबीजश्च नि० ॥ २. धातक्यां तु धातुपुष्पी बहुपुष्प्यग्निपुष्पिका । ताम्रपर्णी सुभिक्षा नि० ॥

दधाति **धातकी**, "श्लेष्मातक-" [हैमोणादिसू० ८३] इत्यातके निपात्यते, तत्र । धातुवद् रक्तानि पुष्पाण्यस्या **धातुपुष्पी**, " असत्काण्ड-प्रान्त-शतैकाञ्चः पुष्पात्" [सिद्ध० २. ४. ५६] इति ङीः । बर्हिरिव—वह्निरिव पुष्पाण्यस्या **बर्हिपुष्पी** । अग्निरिव पुष्पाण्यस्या अग्निपुष्पी, "असत्काण्ड-प्रान्त-शतैकाञ्चः पुष्पात्" [सिद्ध० २. ४. ५६] इति ङीः, स्वार्थिके के **अग्निपुष्पिका** । ताम्रवर्णानि पुष्पाण्यस्याः **ताम्रपुष्पी**, प्राग्वद् ङीः । **सुभिक्षा** सुलभा । कौ—पृथिव्यां जीर्यति **कुञ्जरा**, पृषोदरादित्वात् । मद्यस्य पाचनी **मद्यपाचनी** । आह च—

धातकी ताम्रपुष्पी च कुञ्जरा मद्यपाचनी ।
पार्वतीया सुभिक्षा च वह्निपुष्पी च शब्दिता ॥

[ ] इति ।

एतस्य लोके 'धाहुडी' इति प्रसिद्धिः ॥१५०॥

सल्लक्यां वल्लकी ह्रादा सुवहा सुस्रवा रसा ।
अश्वमूत्री कुन्दुरुकी गजभक्षा महेरणा ॥१५१॥
गन्धवीरा गन्धकारी सुरभिर्वनकर्णिका ।

सल्लिः सौत्रः, सल्लति **सल्लकी**, "दृ-कृ-नृ-सृ--" [हैमोणादिसू० २७] इत्यादिना अकः; सत्कृत्य लक्ष्यते—स्वाद्यते गजैरिति वा, तस्याम् । "वल्ल संवरणे" वल्लते **वल्लकी**, " दृ-कृ-नृ-सृ-" [हैमोणादिसू० २७] इत्यकः । ह्रादा सन्त्यस्यां **ह्रादा**, अभ्रादित्वादः । सुष्ठु वहति **सुवहा**, अच् । "सुष्ठु स्रवति **सुस्रवा** " इति **वैद्याः** । रस्यते—आस्वाद्यते गजैः **रसा** । अश्वस्य मूत्रमस्या **अश्वमूत्री** । कुं—पृथ्वीं द्यति कुन्दुरुः, " शिग्रु-गेरु-नमेर्वादयः" [हैमोणादिसू० ८११] इति रुप्रत्यये निपात्यते, स्वार्थिके के **कुन्दुरुकी** । गजैर्भक्ष्यते **गजभक्षा** । महद् ईरणमस्या **महेरणा** ॥१५१॥

गन्धेन वीरा **गन्धवीरा** । गन्धं करोति **गन्धकारी** । "रभुङ् शब्दे" सुष्ठु रम्भते **सुरभिः**, "पदि-पठि " [हैमोणादिसू० ६०७] इति बहुवचनादिः, " आगमशासनमनित्यम्" इति न्यायाद् नागमाभावः । वनस्य कर्णिकेव **वनकर्णिका** । आह च—

१. अश्वमूर्त्तिः कुन्दरुकी गजभक्ष्या नि० ॥

सल्लकी वल्लकी ह्रादा सुरभिः सुस्रवा रसा ।
अश्वमूत्री कुन्दुरुकी गजभक्षा महेरणा ॥

[ ] इति ।

एतस्या लोके 'सालरि' इति प्रसिद्धिः ।

एरण्डे तरुणश्चित्रो दीर्घदण्डो व्यडम्बरः ॥१५२॥
पञ्चाङ्गुलो वर्धमान आमण्डो रुचको रुचुः ।
व्याघ्रपुच्छो व्याघ्रतलश्चञ्चुरुत्तानपत्रकः ॥१५३॥
गन्धर्वहस्तकश्चञ्चुरदण्डो हस्तिपर्णकः ।
उरुवूको हस्तिकर्णः, शुक्लो रक्तश्च स द्विधा ॥१५४॥

ईरयति वायुम् **एरण्डः**, "पिचण्डैरण्ड-" [हैमोणादिसू० १७६] इत्यण्डे निपात्यते, तत्र । "तॄ प्लवन-तरणयोः" तरति **तरुणः**, "यम्यजि-" [हैमोणादिसू० २८८] इत्युनः । "चिंगट् चयने" चीयते **चित्रः**, "चि-मि-दि-" [हैमोणादिसू० ४५४] इति कित् त्रः । दीर्घो दण्डोऽस्य **दीर्घदण्डः** । "अड उद्यमे" विपूर्वः, व्यडति **व्यडम्बरः**, "जठर-क्रकर-" [हैमोणादिसू० ४०३] इत्यरे निपात्यते ॥१५२॥

पञ्च अङ्गुल्योऽस्य **पञ्चाङ्गुलः**, अङ्गुलीसदृशपञ्चपत्रावयवत्वात्, "बहुव्रीहेः काष्ठे टः" [सिद्ध० ७.३.१२५] इति टः समासान्तः । वर्धते **वर्धमानः** । "मडुण् भूषायाम्" आमण्डयति **आमण्डः**, अच् । **आरण्ड** इत्येके, दीर्घदण्डत्वात् । रोचते **रुचकः**, ध्रु-धून्दि-रुचि-" [हैमोणादिसू० २९] इति किदकः । **[रुचुः]**, "पॄ-का-हृषि-धृषी-" [हैमोणादिसू० ७२९] इति आदिशब्दात् किदुः । व्याघ्रस्येव पुच्छमस्य **व्याघ्रपुच्छः** । व्याघ्रस्येव तलोऽस्य **व्याघ्रतलः** । "चञ्चू गतौ" चञ्चति **चञ्चुः**, "भृ-मृ-तॄ-सरि-" [हैमोणादिसू० ७१६] इत्युः । **चुञ्चुरित्यन्ये** । उत्तानं पत्रमस्य उत्तानपत्रः, के **उत्तानपत्रकः** ॥१५३॥

गन्धर्वस्येव हस्तोऽस्य गन्धर्वहस्तः, स्वार्थिके के **गन्धर्वहस्तकः** । चञ्चुरो दण्डोऽस्य **चञ्चुरदण्डः** । हस्तिनः पर्ण इव हस्तिपर्णः, के **हस्तिपर्णकः** । उरु वाति **उरुवूकः**, "शम्बूक-शाम्बूक-" [हैमोणादिसू० ६१] इत्यूके निपात्यते । हस्तिनः कर्ण इव हस्तिकर्णः, [स्वार्थिके के **हस्तिकर्णकः**] । 'सः' एरण्डः शुक्लो रक्तश्च द्विधा । आह च—

---

१. व्यडम्बकः ०नि ॥ २ °रादण्डो नि० ॥

एरण्डस्तरुणः शुक्लश्चित्रो गन्धर्वहस्तकः ।
पञ्चाङ्गुलो वर्धमान आरण्डो दीर्घदण्डकः ॥
रक्तोऽपरो हस्तिकर्णः कर्णो व्याघ्रतलो रुचुः ।
उरुवूको हस्तिपर्णश्चञ्चुरुत्तानपत्रकः ॥
[ ] इति ।

एतस्य लोके 'एरंड' इति प्रसिद्धिः ॥१५४॥

किम्पाके तु महाकालः काकर्दः काकमर्दकः ।

कुत्सितः—प्राणहरः पाकः—परिणामोऽस्य विषवृक्षत्वात् **किम्पाकः**, तत्र । महांश्चासौ कालश्च **महाकालः** । "अर्द गति-याचनयोः" काकम् अर्दति **काकर्दः**, पृषोदरादित्वात् । काकं मर्दयति **काकमर्दकः** ।

काम्पिल्यके तु कपिलो रक्ताङ्गो रक्तचूर्णकः ॥१५५॥
चन्द्राह्वयो रेचनकः कर्कशाह्वः पटोदकः ।

काम्पिलदेशे भवः काम्पिल्यः, भवेऽर्थे यण्, स्वार्थिके के **काम्पिल्यकः**, तत्र । "कवृङ् वर्णे" कवते **कपिलः**, "स्थण्डिल-कपिल-" [हैमोणादिसू० ४८४] इतीले निपात्यते; कपिलवर्णत्वाद् वा । रक्तमङ्गमस्य **रक्ताङ्गः** । रक्तं चूर्णमस्य रक्तचूर्णः, [स्वार्थिके] के **रक्तचूर्णकः** ॥१५५॥

चन्द्रस्य आह्वयोऽस्य **चन्द्राह्वयः**, तेन **चन्द्रः**, ह्लादनत्वात् । रेचयति रेचनः, स्वार्थिके के **रेचनकः** । कर्कश इत्याह्वाऽस्य **कर्कशाह्वः** । पटे उदकमस्य **पटोदकः** । यदाह—

काम्पिल्यकोऽथ रक्ताङ्गो रेची रेचनकस्तथा ।
रजनो लोहिताङ्गश्च कर्कशो रक्तचूर्णकः ॥
[ ] इति ।

इन्दुरपि—

कर्कशाख्यः करम्भः स्यात् स काम्पिल्यः पटोदकः ।
[ ] इति ।

एतस्य लोके 'कंपीलउ' इति प्रसिद्धिः ।

---

१ "महान् कालः—मृत्युरस्माद् महाकालः" इत्यभिधानचिन्तामणिस्वोपज्ञटीकायाम् ॥
२ कम्पिल्लके तु काम्पिल्लो रक्त० नि० ॥ ३ रोचनकः नि० ॥ ४ पटोदयः नि० ॥

कतके छेदनीयोऽम्बुप्रसादनफलः कतः ॥१५६॥

"कित निवासे" केतति शैतल्यमत्र **कतकः**, णके पृषोदरादित्वात् साधुः, तत्र । छेद्यते मलमनेन **छेदनीयः**, करणेऽप्यनीयः । अम्बुनः प्रसादनं फलमस्य **अम्बुप्रसादनफलः** । केतत्यत्र **कतः**, पृषोदरादित्वात् साधुः । आह च—

कतकश्छेदनीयश्च कतः कृ(ृक)तफलं मतम् ।
अम्बुप्रसादनफलं श्लक्ष्णं नेत्रविकारहृत् ॥
[ ] इति ।

एतस्य लोके 'कतकफल' इति प्रसिद्धिः ॥१५६॥

कर्पास्यां[1] तु समुद्रान्ता बदरी तुण्डिकेर्यपि ।

"डुकृंग् करणे" करोति **कर्पासी**, "कृ-कुरिभ्यां पासः" [हैमोणादिसू० ५८३] इति पासः; "कल्यते कर्पासी" इति **क्षीरस्वामी**, तस्याम् । समुद्रे अन्तो यस्याः सा **समुद्रान्ता** । "समुद्रः—कण्टकैः कृतरक्षोऽन्तोऽस्याः **समुद्रान्ता**; दूरप्रसराद् वा" इति **क्षीरस्वामी** । "बद स्थैर्ये" बदति **बदरी**, "ऋच्छि-चटि-" [हैमोणादिसू० ३९७] इत्यरः, गौरादित्वाद् ङीः । यद् **महेश्वरः**—

बदरी कोलि-कर्पास्योः फले स्याद् बदरं तयोः ।
एलापर्ण्यां तु बदरा विष्णुक्रान्तौषधावपि ॥
[ ] इति ।

"बदराणीव फलानि सन्त्यस्याः बदरी" इत्**यमरटीका** । **यन्माला**—

कर्पासो बदरः प्रोक्तो बारदरः पिचुश्चहा ।
[ ] इति ।

"तुण्डिकान्[2]—नालादीन् ईरयति कण्टकैर्वा **तुण्डिकेरी**" इति **क्षीरस्वामी** । "तुडुङ् तोडने" तुण्डयते वा **तुण्डिकेरी**, "शतेरादयः" [हैमोणादिसू० ४३२] इति केरे प्रत्यये निपात्यते । एतस्या लोके 'वमनी' इति प्रसिद्धिः ।

सा तु वन्या भारद्वाजी भद्रा चन्दनबीजिका ॥१५७॥

'तुः' पुनरर्थे । 'सा' कर्पासी वने भवा **वन्या**, "भवे" [सिद्ध० ६. ३. १२३] इति यः । भारद्वाजस्येयं **भारद्वाजी**, "तस्येदम्" [सिद्ध० ६. ३. १६०] इत्यण्, "अणञेये-" [सिद्ध० २. ४. २०] इति ङीः । "भारद्वाजसृष्टा" **इत्यागमः** । भन्दते

---

१ कार्पास्यां नि० ॥ २ °न् नावादीन् पु १। °न् तालावादीन् पु २ । मूलगतस्तु पाठः पु १ प्रतौ टिप्पितः पाठः ॥

भद्रा, "भन्देर्वा" [हैमोणादिसू० ३९१] इति रो न लोपश्च । चन्दनबीजप्रतिकृतिः **चन्दनबीजिका**, "तस्य तुल्ये कः संज्ञा-प्रतिकृत्योः" [सिद्ध० ७.१. १०८] इति कः ॥ १५७ ॥

वन्दायां स्यात् तटरुहा शेखरी पादरोहणी ।
वृक्षादनी वृक्षरुहा जयन्ती कामपादपः ॥१५८॥

वन्द्यते **वन्दा**, भिदादित्वादङ्, तस्याम् । तटे रोहति **तटरुहा**, "नाम्युपान्त्य-" [सिद्ध० ५. १. ५४] इति कः । शेखरोऽस्त्यस्य **शेखरी** । पादे रोहति **पादरोहणी**, अनट् । जन्मना वृक्षमत्ति **वृक्षादनी**, अनट् । वृक्षे रोहति **वृक्षरुहा** । जयति **जयन्ती**, "तॄ-जि-भू-वदि-" [हैमोणादिसू० २२१] इति टिदन्तः । कामस्य पादपः **कामपादपः** । आह च —

वन्दाका स्याद् वृक्षरुहा शेखरी कामवृक्षकः ।
वृक्षादनी तटरुहा कामिन्यङ्घ्रिप्ररोहणी ।
[ ] इति ।

एतस्या लोके 'कामवृक्षा वन्दा वा' इति प्रसिद्धिः ॥१५८॥

स तु क्षीरवृक्षभवो नन्दीमुखो जयद्रुमः ।

'तुः' पुनरर्थे । 'सः' वन्दावृक्षः क्षीरवृक्षे भवति **क्षीरवृक्षभवः** । नन्दी मुखेऽस्य **नन्दीमुखः** । जयस्य द्रुमो **जयद्रुमः** । वन्दाभेदोऽयम् ।

आटरूषे वृषो वासा वासिका वाजिदन्तकः ॥१५९॥
भिषग्माता सिंहमुखः सिंहिका सिंहपर्णिका ।

आ—समन्ताद् अटति **आटरूषः**, "कोरदूषा-ऽऽटरूष-" [हैमोणादिसू० ५६१] इत्यूषे निपात्यते; "रूषण् रूक्षण-व्याप्त्योः" अटन् रूषयतीति **अटरूषः**, पृषोदरादित्वादित्यपि, तत्र । "वृषू सेचने" वर्षति मधु **वृषः**, "नाम्युपान्त्य-" [सिद्ध० ५. १. ५४] इति कः, पुंस्ययम्, स्त्रियामित्यपरे । वाति—गच्छति श्लेष्मा अनया **वासा**, स्त्रीलिङ्गोऽयम्, "मा-वा-वदि-" [हैमोणादिसू० ५६४] इति सः,

---

१ तरुरुहा शौरवर्यंदरोहिणी । वृक्षादनी वृक्षभक्ष्या जय० नि० ॥ २ रुद्राक्षादीनां वन्दा, वटादीनामपि पु२ टिप्पणी ॥ ३ "रूषण् रूक्षण् व्याप्तौ" अ० पु२ ॥

दन्त्यान्तोऽयम् । "उश्यते–काम्यते **वाशे**ति तालव्यान्तः" इत्य**मरः** । वासैव **वासिका** । "उश्यते–काम्यते वाशिका" इत्ये**के**, तालव्यमध्योऽयम् । वाजिनः–अश्वस्येव दन्ता अस्य **वाजिदन्तकः** ॥१५९॥

भिषजां–वैद्यानां मातेव **भिषग्माता** । सिंहस्येव मुखमस्य **सिंहमुखः** । हिनस्ति रोगान् सिंहः, स्वार्थिके के **सिंहिका** । सिंह इव पर्णान्यस्याः सिंहपर्णी, के **सिंहपर्णिका** । आहुश्च—

वैद्यमातृ-सिंहचौ तु वाशिका ।
वृषोऽटरूषः सिंहास्यो वासिका वाजिदन्तकः ॥

[अमर०का० २ वर्ग ४ श्लो०१०३] इति ।

अन्योऽपि—

वासिका सिंहकर्णी च वृषो वासा च सिंहिका ।
आटरूषः सिंहमुखी भिषग्माताऽटरूषकः ॥

[ ] इति ।

आटरूषनामानि । लोके 'अरडूसा' इति प्रसिद्धिः ।

तुम्बुरौ सानुजः सौरः [1]सारसो [2]वनजोऽग्निकः ॥१६०॥
तीक्ष्णवल्कस्तीक्ष्णफलस्तीक्ष्णपत्रो महामुनिः ।

"तुबु अर्दने" तुम्बति **तुम्बुरुः**, "तुम्बेरुरुः" [हैमोणादिसू० ८१७] इति उरुः, तत्र । सानौ जातः **सानुजः**, "क्वचित्" [सिद्ध० ५. १. १७१] इति डः । सूरस्यायं **सौरः**, "तस्येदम्" [सिद्ध० ६. ३. १६०] इत्यण् । सरसि भवः **सारसः**, "भवे" [सिद्ध० ६. ३. १२३] इत्यण् । वने जातो **वनजः**, "क्वचित्" [सिद्ध० ५.१. १७१] इति डः । अग्निरिव **अग्निकः**, "तस्य तुल्ये कः संज्ञा-प्रतिकृत्योः" [सिद्ध० ७. १. १०८] इति कः ॥१६०॥

तीक्ष्णं वल्कमस्य **तीक्ष्णवल्कः** । तीक्ष्णानि फलान्यस्य **तीक्ष्णफलः** । तीक्ष्णानि पत्राण्यस्य **तीक्ष्णपत्रः** । महांश्चासौ मुनिश्च **महामुनिः** । आह च—

---

१ सौरभो वनजोऽन्धकः नि० ॥ २ वनजोऽन्दकः पु १ पु २ ॥

तुम्बुरुः सारसः सौरो वनजः सानुजोऽग्निकः ।
तीक्ष्णवल्कस्तीक्ष्णफलस्तीक्ष्णपत्रो महामुनिः ॥

[ ] इति ।

लोके एतस्य 'तुम्बुरु' इति प्रसिद्धिः ।

कदल्यां तु हस्तिविषा रम्भा मोचांशुमत्फला ॥१६१॥
काष्ठीला वारणबुंसा स्यात् कोलीरस इत्यपि ।

कदिः सौत्रः, कद्यते **कदली**, "मृदि-कन्दि-" [हैमोणादिसू० ४६५] इत्यलः; केन-वायुना दल्यते वा, स्त्रीलिङ्गः, तस्याम् । "के दलमस्यास्तीति वा, इन्नन्तोऽयम्" **इत्यमरटीका** इत्यपि । हस्तिनां विषमिव **हस्तिविषा** । रमन्ते अस्यां **रम्भा**, "गृ-दृ-रमि-" [हैमोणादिसू० ३२७] इति भः; "रभुङ् शब्दे" रम्भन्ते इति वा । मुञ्चति त्वचं **मोचा** । अंशुमन्ति फलान्यस्या **अंशुमत्फला भानुफलाख्या** ॥१६१॥

ईषद् अष्ठीलमस्याः **काष्ठीला**, "अल्पे" [सिद्ध० ३. २. १३६] इत्यनेन ईषदर्थे वर्तमानस्य कुशब्दस्य कादेशः । **काष्ठीरा** इत्यपरे । वारणानां—हस्तिनां बुसः—घासः **वारणबुसा** । **वारणविशेषेत्येके** । कोल्या रस इव रसः—स्वादोऽस्य **कोलीरसः**। आह च—

कदली सुकुमारा च रम्भा भानुफला मता ।
काष्ठीरसश्च निस्सारा मोचा हस्तिबुसा तथा ॥

[ ] इति ।

अमरोऽप्याह—

कदली वारणबुसा रम्भा मोचांशुमत्फला ।
काष्ठीला [का० २ वर्ग ४ श्लो० ११३] इति ।

कदलीनामानि । लोके 'केलि' इति प्रसिद्धिः ।

तगरे कालानुसार्यं वँक्काख्यो नहुषो नृपः ॥१६२॥

"तगु गतौ" तङ्क्यते **तगरः**, "जठर-क्कर-" [हैमोणादिसू० ४०३] इत्यरे निपात्यते, तत्र । काले अनुस्रियते **कालानुसार्यम्** ; कालमनुसरति शीतोष्णाभ्यामिति वा । वक्र इत्याख्याऽस्य **वक्राख्यः** । तेन **कुटिलः जिह्म** इत्यादयोऽवसेयाः ।

१ °वुशा स्यात् काली° नि०॥ २ निस्सारो पु २॥ ३ चक्राख्यो मधुरो नृपः नि०॥

"णहींच् बन्धने" नह्यति व्याधिं **नहुषः**, "ऋ-पृ-नहि-" [हैमोणादिसू० ५५७] इत्युषः । नॄन् पाति **नृपः** । आह च—

तगरं कुटिलं वक्रं दीनं जिह्मं नतं शिवम् ।
कालानुसार्यमनृजु कुञ्चितं नहुषं नृपम् ॥

[ ] इति ।

पुं-क्लीवलिङ्गा एते । लोकेऽप्येतस्य 'तगर' इत्येव प्रसिद्धिः ॥१६२॥

तूले नूदं ब्रह्मदारु ब्रह्मण्यं ब्रह्मकाष्ठकम् ।
ब्रह्मनिष्ठं च यूपं च क्रमुकं ब्रह्मचारि च ॥ १६३ ॥

"तूल निष्कर्षे" तूल्यते **तूलम्**, **तूली**ति **गौडः**, तत्र । "णुदंत् प्रेरणे" नुद्यते **नूदम्**, पृषोदरादित्वात् । ब्रह्मणो दारु **ब्रह्मदारु** । ब्रह्मणि—वैदिके साधु **ब्रह्मण्यम्**, "तत्र साधौ" [सिद्ध० ७.१.१५] इति यः । ब्रह्मणः—वैदिकस्य काष्ठं ब्रह्मकाष्ठम्, स्वार्थिके के **ब्रह्मकाष्ठकम्** । ब्रह्मणो निष्ठाऽत्र **ब्रह्मनिष्ठम्** । यूपप्रतिकृतित्वाद् **यूपम्** । क्रामति **क्रमुकम्**, "क्रमेः कृम् च वा" [हैमोणादिसू० ५३] इत्युकः । ब्रह्म चरतीत्येवंशीलं **ब्रह्मचारि** । आह च—

तूलं नूदं च यूपं च क्रमुकं ब्रह्मकाष्ठकम् ।
ब्रह्मदारु ब्रह्मनिष्ठं ब्रह्मण्यं ब्रह्मचारि च ॥

[ ] इति ।

अन्योऽप्याह—

नूदस्तु यूपः क्रमुको ब्रह्मण्यो ब्रह्मदारु च ॥
तूलं च [अमर० का० २ वर्ग ४ श्लो० ४१–४२] इति ।
एतस्य लोके 'पद्मनस' इति प्रसिद्धिः ॥१६३॥

मुष्ककें मूषको घण्टा झाटलो मोक्ष-मुञ्चकौ ।
पाटलिर्गोलिहः क्षारश्रेष्ठः, कृष्णः सितश्च सः ॥१६४॥

मुष्णाति रोगान् क्षारत्वात् मुष्कः, "विचि-पुषि-" [हैमोणादिसू० २२] इति कित् कः, स्वार्थिके के **मुष्ककः**, तत्र । "मूष स्तेये" मूषति **मूषकः**, णकः प्रत्ययः । हन्यते **घण्टा**, "घटा-घाटा-घण्टादयः" [हैमोणादिसू० १४१] इति टे निपात्यते । झाटं—सङ्घातं लाति **झाटलः**, "क्वचित् " [सिद्ध० ५. १. १७१] इति

१ मोक्षको घण्टा कन्दालो मोक्ष[0] नि० ॥

ङः । मोक्षति-क्षिपति **मोक्षः**; मुञ्चति वा, "मा-वा-वदि-" [हैमोणादिसू० ५६४] इति सः । मुञ्चति **मुञ्चकः** । पाटं—विस्तारं लाति **पाटलिः**, "नाम्युपान्त्य-" [हैमोणादिसू० ६०९] इति बहुवचनात् किदिः । गोभिर्लिह्यते **गोलिहः**, **गोली-ढो**ऽपि । क्षारश्चासौ श्रेष्ठश्च **क्षारश्रेष्ठः** । कृष्णोऽयं श्वेतश्च । आह च—

मुष्कको मोक्षको घण्टा मूषको मुञ्चकस्तथा । 5
क्षारश्रेष्ठो गोलिहश्च द्विविधः श्वेत-कृष्णकः ॥
[ ] इति ।

एतस्य लोके 'मोषउ' इति प्रसिद्धिः ॥१६४॥

वंशो यवफलो वेणुः शतपर्वा तृणध्वजः ।
मस्करस्त्वचिसारस्त्वक्सार-कर्मार-तेजनाः ॥१६५॥ 10

वमति **वंशः**, "पा-दा-वमि-" [हैमोणादिसू० ५२७] इति शः; "**वन्यते वंशः**" इति **क्षीरस्वामी**, तत्र । यवाकारं फलमस्य **यवफलः** । अजन्त्यनेन **वेणुः**, पुंल्लिङ्गः, "अजि-स्था-" [हैमोणादिसू० ७६८] इति णुः । शतं—बहूनि पर्वाण्यस्य **शतपर्वा** । तृणानां ध्वज इव **तृणध्वजः** । माक्रियते—प्रतिषिध्यते अनेन **मस्करः**, वर्चस्कादित्वात् साधुः । त्वचि सरति **त्वचिसारः**, "सृ स्थिरे" [पाणिनि० 15
३.३.१२] इति घञ्, "तत्पुरुषे कृति" [सिद्ध०३.२.२०] "बहुलम्" [सिद्ध० ५.१.२.] इति सप्तम्या अलुक्, लोपे **त्वक्सारः** । कर्म इयर्ति **कर्मारः** । तेजयति **तेजनः** । आह च—

वंशो वेणुर्यवफलः कर्मारस्तृणकेतुकः ।
त्वक्सारः शतपर्वा च मस्करः कीचकस्तथा ॥ 20
[ ] इति ।

एतस्य लोके 'वांसु' इति प्रसिद्धिः ॥१६५॥

गाङ्गेरुक्यां विश्वदेवा झषा ह्रस्वगवेधुका ।
खञ्जाऽरिष्टा नागबला खरगन्धनिकेत्यपि ॥१६६॥

गाङ्गमीरयति पवित्रत्वाद् **गाङ्गेरुकी**, "कञ्चुकांशुक-" [हैमोणादिसू० ५७] 25
इत्युके निपात्यते, तस्याम् । विश्वे दीव्यति **विश्वदेवा** । झषति—हिनस्ति गन्धेन **झषा**, अच् । ह्रस्वा—लघ्वी, गवि—जले एधते गवेधुः, "भृ-मृ-तृ-त्सरि-" [हैमोणादिसू० ७१६] इति बहुवचनादुः, स्वार्थिके के गवेधुका, गूयते गवेधुका इति वा, "गुङ

१ विश्वदेवदेवा ह्रस्वाङ्गवेधुका । खण्डारिष्टा नागबला स्वरबन्धनिकेत्यपि ॥ १६६ ॥ नि० ॥
२ ह्रस्वा गवेधुका पु १ पु २ ॥

ईधुकैधुकौ" [हैमोणादिसू० ७४] इत्यनेन एधुकप्रत्ययः, ह्रस्वा चासौ गवेधुका च **ह्रस्वगवेधुका**। "खजु गतिवैकल्ये" खञ्जत्यनया **खञ्जा**। न रिष्यते अनया **अरिष्टा**। नागानां बलकृद् **नागबला**। खरः—कठोरो दुःसहत्वाद् गन्धोऽस्त्यस्याः [? खर-गन्धा, सैव खरगन्धना, स्वार्थिके के] **खरगन्धि(न्धनि)का**। आह च—

गाङ्गेरुकी नागबला खरगन्धनिका रसा।
विश्वदेवा तथाऽरिष्टा खञ्जा ह्रस्वगवेधुका॥
[ ] इति।

एतस्या लोके 'गांगेटी' इति प्रसिद्धिः ॥१६६॥

दार्वी दारुहरिद्रायां[1] हरिद्रुः कण्टकेरुका।
पीतद्रुमः पीतदारुः पीतनं पीतचन्दनम् ॥१६७॥
पर्जनी[2] च कण्टकिनी कालीयकः पचम्पचा।

दृणाति **दार्वी**, "कृ-वा-पा-जि-" [हैमोणादिसू० १] इति उण्, गौरादित्वाद् ङीः। **दारुहरिद्रा** पिण्डहरिद्रातोऽन्या, तस्याम्। हरिः—पीतो द्रुः—स्कन्धोऽस्य **हरिद्रुः**। कण्टकान् ईर्त्ते कण्टकेरुः, "भृ-मृ-तॄ-त्सरि-" [हैमोणादिसू० ७१६] इति बहुवचनादुः, के **कण्टकेरुका**। पीतश्चासौ द्रुमश्च **पीतद्रुमः**। पीतं दारु अस्य **पीतदारुः**। पीतयति **पीतनम्**। पीतं च तच्चन्दनं च **पीतचन्दनम्** ॥१६७॥

पिपर्त्ति रोगेभ्यः **पर्जनी**, "विदन-गगन-"[हैमोणादिसू० २७५] इत्यने निपात्यते। कण्टकाः सन्त्यस्याः **कण्टकिनी**। कालयति दोषान् कालीयः, "गय-हृदयादयः" [हैमोणादिसू० ३७०] इत्यये निपात्यते, स्वार्थिके के **कालीयकः**। अत्यर्थं पचति **पचम्पचा**। आह च—

हरिद्रा पीतिका पिण्डा रजनी रञ्जनी निशा।
गौरी वर्णवती पीता हरिता वरवर्णिनी॥
अन्या दारुहरिद्राऽपि हरिद्रुः पीतचन्दनम्।
निर्दिष्टा वै कण्टकिनी स च कालेयकः स्मृतः॥
कालीयको दारुनिशा दार्वी-पीतद्रु-पीतिकाः।
कटङ्कटेरी पर्जन्या पीतदारुः पचम्पचा॥
[ ] इति।

एतस्या लोके 'दारुहलद्द' इति प्रसिद्धिः।

---

१ °यां पीता कटङ्कटेरिका। नि० ॥ २ पर्जनी कर्कटकिनी कालेयकः पच° नि० ॥

ग्रन्थिपर्णे श्लिष्टपर्णं विकीर्णं शीर्णरोमकम् ॥१६८॥
हरितं कुकुरं पुष्पं शुकगुच्छं शुकच्छदम् ।
स्थौणेयकं वह्निचूडमारामं ग्रन्थिकाऽपि च ॥१६९॥

ग्रन्थिप्रधानानि पर्णान्यस्य **ग्रन्थिपर्णम्** । ग्रन्थीन् पिपर्ति वा ग्रन्थिमत्त्वात्, "इण्वर्वि-शा-वेणि-" [हैमोणादिसू० १८२] इति णः, तत्र । श्लिष्टानि पर्णान्यस्य **श्लिष्टपर्णम्** । विकीर्यते **विकीर्णम्** । शीर्णानि रोमाण्यस्य **शीर्णरोमकम्** ॥१६८॥

हरति ह्रियते अनेन वा **हरितम्**, "हृ-श्या-रुहि-" [हैमोणादिसू० २१०] इति इतः । "कुक वृकि आदाने" कोकते **कुकुरम्**, "श्वशुर-कुकुन्दुर-" [हैमोणादिसू० ४२६] इत्युरे निपात्यते । पुष्यति **पुष्पम्**, अच् । शुकस्येव गुच्छोऽस्य **शुकगुच्छम्** । शुकस्येव छदान्यस्य **शुकच्छदम्** । स्थूणाया इदं स्थौणेयम्, "तस्येदम्" [सिद्ध० ६. ३. १६०] इत्येयण्, स्वार्थिके के **स्थौणेयकम्** । वह्निरिव चूडा अस्य **वह्निचूडम्** । आरमन्त्यत्र **आरामम्** । "ग्रथुङ् कौटिल्ये" ग्रन्थ्यते ग्रन्थिः, "पदि-पठि-" [हैमोणादिसू० ६०७] इति इः, स्वार्थिके के **ग्रन्थिका** । "ग्रन्थि इति क्लीबे" **इत्यन्ये** । ग्रन्थिरत्रास्ति **ग्रन्थिका**, व्रीह्यादित्वादिकः, स्त्रियाम् । क्लीबेऽप्ययम् । यदाह --

ग्रन्थिकं पिप्पलीमूलं ग्रन्थिपर्णकभेषजे ।
[ ] इति ।

आह च—

स्थौणेयकं वह्निचूडं शुकगुच्छं शुकच्छदम् ।
विकीर्णं शुकबर्हं च हरितं शीर्णरोमकम् ॥
[ ] इति ।

एतस्य लोके 'थूणीयउ' इति प्रसिद्धिः ॥१६९॥

स्पृक्कायां ब्राह्मणी पङ्क्तिमुष्टिका पिशुना वधूः ।
समुद्रान्ता मरुन्माला निर्माल्या देवपुत्रिका ॥१७०॥
लङ्कोयिका कोटिवर्षा देवी पङ्क्तिजमुष्टिका ।
गोमी स्वर्णलतेन्द्राणी मरुद् माला लता लघुः ॥१७१॥

---

१ कुकुरं च तथा गुच्छं शुकपुष्पं शुकच्छदम् । स्थौणेयकं वह्निचूडा सुगन्ध-ग्रन्थिकावपि ॥१६९॥ नि० ॥ २ लङ्कातिका नि० ॥ ३ मरन्माला नि० ॥

स्पृशति गन्धैः **स्पृक्का,** "निष्क-तुरुष्क-" [हैमोणादिसू० २६] इति के निपात्यते, तस्याम् । ब्रह्मणोऽपत्यमिव **ब्राह्मणी,** "ङसोऽपत्ये" [सिद्ध० ६ १.२८] इत्यण्, "अणञेये-" [सिद्ध० २.४.२०] इति ङीः । पङ्कस्य मुष्टिः पङ्कमुष्टिः, के **पङ्कमुष्टिका** । "पिशत् अवयवे" पिंशति **पिशुना,** गन्धसूचनात्, "पिशि-मिथि-क्षुधिभ्यः कित्" [हैमोणादिसू० २९०] इति किदुनः । "**वधूः** आशावधूवात्" इति **क्षीरस्वामी**; उह्यते **वधू**रिति वा, "वहेर्धू च" [हैमोणादिसू० ८३२] इति ऊः धश्चान्तादेशः । समुद्रे अन्तो यस्याः सा **समुद्रान्ता** । मरुत्सहिता मालाऽस्याः **मरुन्माला** । निर्गतं माल्यमस्याः **निर्माल्या** । देवानां पुत्री देवपुत्री, के **देवपुत्रिका** ॥१७०॥

"वेंग् तन्तुसन्ताने" लङ्कायामूयते **लङ्कोयिका,** णकः प्रत्ययः । कोटिभिर्वर्षति मधु **कोटिवर्षा** । दीव्यति **देवी;** देवपुत्र्या एकदेशो वा **देवी,** यथा सत्या सत्यभामेत्यादिवत् । पङ्कजं मुष्टिरस्याः पङ्कजमुष्टिः, के **पङ्कजमुष्टिका** । गावः सन्त्यस्य **गोमी,** "गोः" [सिद्ध० ७.२.५०] इति मिन् । स्वर्णस्य लता **स्वर्णलता** । **इन्द्राणी** देवपुत्रीत्वात् । म्रियते **मरुत्,** मारुताख्यात्वात्, "म्र उत्" [हैमोणादिसू० ८८९] इति उत्; मल्यते–धार्यते **माला;** मीयते इति वा "शा-मा-श्या-" [हैमोणादिसू०४६२] इति लः, "**मारुत-स्रगा**ख्ये द्वे संज्ञे एते" **इत्यपरै**रुक्तत्वात् । "लांक् दाना-ऽऽदानयोः" लाति लायते वा **लता,** "पृषि-रञ्जि-" [हैमोणादिसू० २०८] इति किदतः । "लघुङ् गतौ" लङ्घते **लघुः,** "रङ्घि-लङ्घि-लिङ्गेर्नलुक् च" [हैमोणादिसू० ७४०] इति उः नकारस्य च लोपः । **इन्द्राद्या** आहुः—

स्पृक्का माला पङ्कमुष्टिर्नीला देवी लता गुरुः ।
देवपुत्री च लङ्कोयी सीता पङ्कजमुष्टिका ॥
स्रग् मारुता कोटिवर्षा निर्माल्या सा वधूः स्मृता ॥
[ ] इति ।

धन्वन्तरिरप्याह—

स्पृक्का स्पृग् ब्राह्मणी देवी लता लङ्कोयिका मरुत् ।
पङ्कमुष्टिर्देवपुत्री निर्माल्या पिशुना वधूः ॥
[ ] इति ।

स्पृक्कानामानि । लोके 'पीक' इति प्रसिद्धिः ॥१७१॥

विडङ्गे केरला-ऽमोघा तण्डुलश्चित्रतण्डुला ।
भस्मकः कृमिहा जन्तुघातको मृगगामिनी ॥१७२॥

"विड् आक्रोशे" विडति **विडङ्गम्,** "विडि-विलि-" [हैमोणादिसू० १०१] इति किदङ्गः; विलङ्गति वा, ड-लयोरैक्यमत्र, पुं-क्लीबलिङ्गोऽयम्, स्त्रियां **निघण्टुः,** तत्र । किरति—क्षिपति **केरला,** "मुरलोरल-विरल-केरल-" [हैमोणादिसू० ४७४] इत्यले निपात्यते । न मोघा **अमोघा** । "तडुङ् ताडने" तण्डयते **तण्डुलः,** "हृषि-वृति-चटि-पटि-" [हैमोणादिसू० ४८५] इत्युलः । चित्रास्तण्डुला अस्याः **चित्र-तण्डुला** । भस्मयति **भस्मकः,** पुं-क्लीबलिङ्गोऽयम् । यदाह—

भस्मकं भस्मलग्ने(?रोगे)स्याद् विडङ्ग-कलधौतयोः ।

[विश्वलोचन कतृतीय श्लो० १२९] इति ।

कृमीन् हन्ति **कृमिहा** । अत एव जन्तून् घातयति **जन्तुघातकः** । मृगं गच्छतीत्येवंशीला **मृगगामिनी** । आह च—

अथो वेल्लममोघा चित्रतण्डुला ।
तण्डुलश्च कृमिघ्नश्च विडङ्गः पुं-नपुंसकः ॥

[अमर० का० २ वर्ग ४ श्लो० १०६] इति ।

धन्वन्तरिरपि—

विडङ्गा जन्तुहन्त्री च कृमिघ्नी चित्रतण्डुला ।
तण्डुलः कृमिहाऽमोघा केरला मृगगामिनी ॥

[ ] इति ।

एतस्य लोके 'विडंग' इति प्रसिद्धिः ॥१७२॥

इन्द्राक्षे ऋषभो वीरः श्रीमान् वृषभनामकः ।
धूर्वहो[2] गोपतिः शृङ्गी बन्धुरः पृथिवीपतिः ॥१७३॥

इन्द्रवद् अक्षाण्यस्माद् **इन्द्राक्षः;** इन्द्रवद् अक्ष्णोति वा, तत्र । "ऋषैत् गतौ" ऋषति **ऋषभः,** "ऋषि-वृषि-लुसिभ्यः कित्" [हैमोणादिसू० ३२१] इति

१ तन्दुलः कृष्णतन्दुलः । वेल्लकः कृमिहा नि० ॥ २ धूर्धुरो गो० नि० ॥

किदभः । विशेषेण ईरयति **वीरः** । श्रीर्विद्यतेऽस्य **श्रीमान्** । वृषभस्य नामान्यस्य **वृषभनामकः**, तेन **वृषा**दयोऽपि । धुरं वहति **धूर्वहः** । गवां पतिः **गोपतिः** । शृङ्गाणि सन्ति अस्य **शृङ्गी** । बध्नाति **बन्धुरः**, "वाश्यसि-" [हैमोणादिसू० ४२३] इत्युरः । पृथिव्याः पतिः **पृथिवीपतिः** । आह च—

ऋषभो धूर्वहो धीरो मातृको वृषभो वृषः ।
विषाणी ककुदीन्द्राक्षो बन्धुरो गोपतिः स्मृतः ॥

[ ] इति ।

एतस्य लोके 'ऋषभु' इति प्रसिद्धिः ॥१७३॥

ऋद्धौ सिद्धिर्युगं योग्यं रथाङ्गं मङ्गलं वसु ।
ऋषिसृष्टा सुखं लक्ष्मीर्वृद्धेरप्याह्वया अमी ॥१७४॥

"ऋधौट् वृद्धौ" ऋध्नोति **ऋद्धिः**, क्तिप्रत्ययः । सिध्यति अस्याः **सिद्धिः**, क्तिप्रत्ययान्तः । युज्यते अनेन **युगम्**, "वर्षादयः क्लीबे" [सिद्ध० ५.३.२९] इति साधुः । योजनीयं **योग्यम्**, "शक्तार्हे कृत्याश्च" [सिद्ध० ५.४.३५] इति ष्यण् । योगे साधु वा, "तत्र साधौ" [सिद्ध० ७.१.१५] इति यः । रथस्य अङ्गं **रथाङ्गम्** । "मगु गतौ" मङ्गति **मङ्गलम्**, "मृदि-कन्दि-" [हैमोणादिसू० ४६५] इत्यलः । वसत्यत्र **वसु**, "भृ-मृ-तृ-त्सरि-" [हैमोणादिसू० ७१६] इत्युः । ऋषिभिः सृष्टा **ऋषिसृष्टा** । सुखयति **सुखम्** । लक्ष्यते **लक्ष्मीः**, "लक्षेर्मोऽन्तश्च" [हैमोणादिसू० ७१५] इति ईः । 'वृद्धेरप्याह्वया अमी' **'वृद्धेः'** ओषधविशेषस्यापि **ऋद्ध्यादी**नि नामानि ज्ञेयानि । आह च—

ऋद्धिर्वृद्धिः सुखं सिद्धी रथाङ्गं मङ्गलं वसु ।
ऋषिसृष्टा युगं योग्यं लक्ष्मीः सर्वजनप्रिया ॥

[ ] इति ।

ऋद्धि-वृद्ध्योर्नामानि । अनयोर्लोके 'ऋद्धि वृद्धि' इति प्रसिद्धिः ॥१७४ ॥

पद्मके मालकः पीतरक्तश्चारुश्च सुप्रभः ।
सुरभिः शीतवीर्यश्च पाटलः पीतवर्णकः ॥१७५॥

---

१ °लं तथा । ऋषिसृष्टसुखं नि० ॥ २ पीतो रक्तश्चरुसरुश्यवः । सुमनः शीत° नि० ॥

पद्मप्रतिकृतिः **पद्मकः**, "तस्य तुल्ये कः संज्ञा-प्रतिकृत्योः" [सिद्ध० ५. १. ५४.] इति कः, तत्र । मलते–दधाति **मालकः**, णकः प्रत्ययः । पीतश्चासौ रक्तश्च **पीतरक्तः** । चरति मनोऽत्र **चारुः**, "मि-वहि-" [हैमोणादिसू० ७२६] इति णिदुः । शोभना प्रभाऽस्य **सुप्रभः** । सुरभते **सुरभिः**, "पदि-पठि-" [हैमोणादिसू० ६०७] इति बहुवचनादिः । शीतं वीर्यमस्य **शीतवीर्यः** । पाटयति **पाटलः**, "मृदि-कन्दि-" [हैमोणादिसू० ४६५] इत्यलः । पीतं वर्णमस्य पीतवर्णः, स्वार्थिके के **पीतवर्णकः** । आह च—

पद्मकं मलयश्चारुः पीतरक्तश्च सुप्रभः ।

[ ] इति ।

एतस्य लोके 'पदमाकु' इति प्रसिद्धिः ॥१७५॥

कङ्कुष्ठे स्यात् काककुष्ठः पुलकः काकपालकः ।
रेचनः शोधनो ह्रासो विडङ्गो रङ्गदायकः ॥१७६॥

कम् इत्यव्ययं कुत्सायाम्, कुत्सितं कुष्ठमस्य **कङ्कुष्ठः**, तत्र । काकानां कुष्ठमस्मात् **काककुष्ठः** । "पुल महत्त्वे" पोलति **पुलकः**, "धु-धून्दि-रुचि-तिलि-पुलि-" [हैमोणादिसू० २९] इति किदकः । काकानां पालकः **काकपालकः** । रेचयति **रेचनः**, विरेचकत्वात् । शोधति **शोधनः** । "तुस ह्रस ह्लस रस शब्दे" ह्रस्यते **ह्रासः** । "विड आक्रोशे" वेडति **विडङ्गः**, "विडि-विलि-" [हैमोणादिसू० १०१] इति किदङ्गः । रङ्गस्य दायको **रङ्गदायकः** । आह च—

कङ्कुष्ठं काककुष्ठं तु विडङ्गं रङ्गदायकम् ।
रेचकं पुलकं ह्रासं शोधनं काकपालकम् ॥

[ ] इति ।

एवमेते पुं-क्लीबलिङ्गाः । एतस्य लोकेऽपि 'कङ्कुष्ठ' इत्येव प्रसिद्धिः ॥१७६॥

परूषके स्यादल्पास्थि परुषो नीलपर्णकः ।
परापरः परुश्चेरुः परिमण्डल इत्यपि ॥१७७॥

१. परोपरः परश्चैष परि० नि० ॥

"पृश् पालन-पूरणयोः" पृणाति परूषः, "खलि-फलि-" [हैमोणादिसू० ५६०] इत्यूषः, स्वार्थिके के **परूषकः**, तत्र । अल्पमस्थि अस्य **अल्पास्थि** । पृणाति **परुषः**, "ऋ-पृ-नहि-" [हैमोणादिसू० ५५७] इत्यादिना उषः । नीलानि पर्णान्यस्य नीलपर्णः, के **नीलपर्णकः** । परमापिपर्त्ति **परापरः** । "पृश् पालन-पूरणयोः" पृणाति **परुः**, "रुद्यर्त्ति-जनि-" [हैमोणादिसू० ९९७] इत्युस् । "चिंगट् चयने" चीयते **चेरुः**, "शिग्रु-गेरु-नमेर्वादयः" [हैमोणादिसू० ८११] इति रौ निपात्यते । परि–सर्वतोभावे मण्डलमस्य **परिमण्डलः**; परिमण्डयति वा, "मृदि-कन्दि-कुन्दि-मण्डि-" [हैमोणादिसू० ४६५] इत्यलः । आह च—

परूषकः परुः प्रोक्तो नीलपर्णः परापरः ।
परिमण्डलमल्पास्थि परुषं चापि नामतः ॥

[ ] इति ।

एतस्य लोके 'फल्हा' इति प्रसिद्धिः ॥१७७॥

खर्जूरे त्वग्रजः पिण्डी निःश्रेणिः स्वादुमस्तकः ।

"खर्ज मार्जने च" चकाराद् व्यथने, खर्जति **खर्जूरः**, "मी-मसि-पशि-" [**हैमोणादिसू०** ४२७] इत्यूरः, तत्र । [अग्रे जायते **अग्रजः** ।] पिण्डमस्त्यस्य **पिण्डी** । निष्क्रान्ता श्रेणेः– तरुसमूहाद् **निःश्रेणिः**, उच्चविटपित्वात् । यदाह—

निःश्रेणिरधिरोहिण्यां खर्जूरीपादपेऽपि च ।

[विश्वलोचने णतृतीये श्लो०६१] इति ।

स्त्रीलिङ्गः । स्वादु–मृष्टं मस्तकमस्य **स्वादुमस्तकः** । आह च—

खर्जूरी तु खरस्कन्धा कषाया मधुराऽग्रजा ।
दुष्प्रधर्षा दुरारोहा निःश्रेणिः स्वादुमस्तका ॥

[ ] इति ।

महाखर्जूरिकेयम् ।

खर्जूरिकायां स्याद् भूमिखर्जूरी काकपर्कटी ॥१७८॥

---

१. त्वग्रुजः नि० ॥ २ °दपे स्त्रियाम् विश्वलोचने ॥ ३ काककर्कटी नि० ॥

'खर्जूरिकायां' खर्जूरीविशेषे 'स्याद्' भवेद् भूमेः खर्जूरी **भूमिखर्जूरी** । काकैः पृच्यते **काकपर्कटी**, "कपट-कीकटादयः" [हैमोणादिसू० १४४] इत्यटे निपात्यते । पिण्डखर्जूरिकेयम् । आह च **मदनपालः**—

बृहत्खर्जूरिका श्रेणी सुफला द्वीपसम्भवा ।
पिण्डखर्जूरिका खर्जूः दुष्प्रधर्षा च कण्टका ॥ 5
अन्या स्कन्धफला स्वाद्वी दुरारोहा मृदुच्छदा ।
भूमिखर्जूरिका काकपर्कटी

[ ] इति ।

अनयोर्लोके 'महाखजूरि' 'पिंडख़जूरि' इति प्रसिद्धिः ॥१७८॥

तैले तालो लेख्यपत्रस्तृणराजो ध्वजद्रुमः । 10

तैलति—प्रतिष्ठते बहुमूलत्वात् **तलः**, अच्, तत्र । प्रज्ञाद्यणि **तालः** । लेख्यानि पत्राण्यस्य **लेख्यपत्रः** । तृणानां राजा **तृणराजः**, तृणद्रुममध्ये मुख्यत्वात्, "राजन्-सखेः" [सिद्ध० ७. ३. १०६] इत्यट् समासान्तः । ध्वज इव द्रुमेषु **ध्वजद्रुमः** । आह च—

तालो ध्वजद्रुमः पां(?प्रां)शुर्दीर्घस्कन्धो दुरारुहः । 15
तृणराजो दीर्घतरुर्लेख्यपत्रो द्रुमेश्वरः ॥

[ ] इति ।

एतस्य लोके 'ताड' इति प्रसिद्धिः । अष्टविधोऽयम् । यदाह—

तालश्चाष्टविधो ज्ञेयो हृद्यः कुष्ठकृमिप्रणुत् ।
पित्ताऽस्रघ्नो रुचिस्वादु वातजिद् बृंहणो गुरुः ॥ 20

[ ]

इत्येतस्य गुणाः ।

नालिकेरे रसफलो लाङ्गली कूर्चकेसरः ॥१७९॥

दाक्षिणात्यो दृढफलो नालिकेलो लतातरुः ।

---

१. ताले तलो लेख्य० नि० ॥ २ "तलति—प्रतिबिम्बति बहुरूपत्वात् तलः" इत्यभिधानचिन्तामणिस्वोपज्ञटीकायाम् ॥ ३. नारिकेरो लता० नि० ॥

नालिकान्—नालयुक्तान् पुष्पादीन् ईरयति **नालिकेरः**; नलति वा, "शतेरादयः" [हैमोणादिसू० ४३२] इति केरे निपात्यते, पुं-स्त्रीलिङ्गः, तत्र । रसमयं फलमस्य **रसफलः**। हलाकारपत्रशाखत्वाद् **लाङ्गली** । कूर्चं केसराण्यस्य **कूर्चकेसरः** ॥१७९॥

दक्षिणस्यां दिशि भवो **दाक्षिणात्यः**, "दक्षिणा-पश्चात्पुरसस्त्यण्" [सिद्ध० ६. ३. १३] इति त्यण् । दृढानि फलान्यस्य **दृढफलः**। नालिकेर इत्यस्य लत्वे **नालिकेलः**। लता चासौ तरुश्च **लतातरुः** । आह च—

नालिकेरो रसफलः सतुङ्गः कूर्चकेसरः ।
लतावृक्षो दृढफलो लाङ्गली दाक्षिणात्यकः ॥

[ ] इति

एतस्य लोके 'नालेर' इति प्रसिद्धिः ।

पूगे क्रमुक-गूवाक-खपुरा नीलवल्कलः ॥१८०॥

घोण्टा

"पूगृश् पवने" पुनाति **पूगः**, "पू-मुदिभ्यां कित्" [हैमोणादिसू० ९३] इति किद् गः, तत्र । क्रामति **क्रमुकः**, "क्रमेः कृम् च वा" [हैमोणादिसू० ५३] इत्युकः। "गुंत् पुरीषोत्सर्गे" गुवत्यनेन स्रंसकत्वाद् **गूवाकः**, "मवाक-श्यामाक-" [हैमोणादिसू० ३७] इत्याके निपात्यते । "पुरत् अग्रगमने" खे पुरति **खपुरः** । "खानि पृणाति **खपुरः**" इति **क्षीरस्वामी** । पुंलिङ्गः । यद् **गौडः**—

खपुरो लसके भद्रमुस्तके क्रमुकेऽपि च ।

[ ] इति ।

नीलं वल्कलमस्य **नीलवल्कलः** ॥१८०॥

"घुण् घूर्णत् भ्रमणे" घुणति **घोण्टा**, "घटा-घाटा-" [हैमोणादिसू० १४१] इति टे निपात्यते । एतस्य लोके 'सोपारी' इति प्रसिद्धिः १

अस्य फलमुद्वेगं

'अस्य' पूगस्य फलं उद्गतो वेगोऽस्य **उद्वेगम्**, [स्रंसकत्वात्] ।

चिक्के तत्र तु चिक्कणम् ।

---

१. पूगो गूवाकः क्रमुकः पूगी च नीलवल्कलः ॥१८०॥ एतस्य फल० नि० ॥ २. चिक्कणे तत्र चिक्कणम् नि० ॥

'तत्र' इति पूगे 'तुः' इति पुनरर्थे, चिनोति **चिक्कम्**, "निष्क-तुरुष्क-" [हैमोणादिसू० २६] इति के निपात्यते ; "चिक्कण् व्यथने" इति **कौशिकः**, चिक्कयति वा **चिक्कम्**, अच्, तस्मिन् । चिनोति **चिक्कणम्**, "चिक्कण-कुक्कण-" [हैमोणादिसू० १९०] इत्यणे निपात्यते । **धन्वन्तरि**स्तु सामान्येनाऽऽह—

स्यात् पूगफलमुद्वेगं स्रंसि घोण्टाफलं मतम् ।
चिक्कणं वल्कलं चिक्कं गवां मदकरं च तत् ॥
[ ] इति ।

पूगफलनामान्यमूनि । लोके 'फोफलु' इति प्रसिद्धिः ।

हिन्ताले तु तृणराजो राजवृक्षो लताङ्कुरः ॥१८१॥

हिनोति—वर्धते **हिन्तालः**, "चात्वाल-कङ्काल-हिन्ताल-" [हैमोणादिसू० ४८०] इत्याले निपात्यते, तत्र । तृणानां राजा **तृणराजः** । वृक्षाणां राजा **राजवृक्षः**, राजदन्तादित्वात् पूर्वनिपातः । लताया अङ्कुर इव **लताङ्कुरः** । एतस्य लोके 'हिन्ताल' इत्येव प्रसिद्धिः ॥१८१॥

ताल्यां तु मृत्युपुष्पा स्यादेकपत्रफलाऽपि च ।

ताड्यते **ताली**, ऋफिडादित्वाद् लत्वम् ; **ताडी** इत्यपि, तस्याम् । मृत्युप्रदानि पुष्पाण्यस्या **मृत्युपुष्पा** । एकं पत्रं फलं चास्याः **एकपत्रफला** ।

केतके तु रजःपुष्पो जम्बूलः ककचच्छदः ॥१८२॥

"कित निवासे" केतति वने **केतकः**, णकः प्रत्ययः, पुं-क्लीबलिङ्गोऽयम् । यद् **वाचस्पतिः**— "केतकस्तु द्वयोः" [ ] इति । रजोयुक्तानि पुष्पाण्यस्य **रजःपुष्पः** । जायते **जम्बूलः**, "दुकूल-कुकूल-" [हैमोणादिसू० ४९१] इत्यूले निपात्यते । ककचाकाराणि छदान्यस्य **ककचच्छदः** ॥१८२॥

खर्जूर-ताल-खर्जूरी-ताली-हिन्ताल-केतकाः ।
क्रमुको नालिकेरश्च [1]स्युरेतास्तृणजातयः ॥१८३॥

खर्जूरः – बृहत्खर्जूराख्यः, **तालः** – लेख्यपत्रः, **खर्जूरी** – पिण्डखर्जूरिका, अत्रानुक्रमव्यत्ययश्छन्दोभङ्गभयादिति, एवमन्यत्रापि, **ताली**—मृत्युपुष्पा, **हिन्तालः**–

१ स्युरेते तृणपादपाः नि० । अमरेऽपि तृणद्रुमत्वेनैवोल्लेखः ॥

तृणराजः, **केतकः**—ककचच्छदः, एषां द्वन्द्वः । **क्रमुकः**— पूगः । **नालिकेरः** प्रतीतः । एताः तृणजातयः 'स्युः' इति भवन्ति, तृणप्रधानवृक्षत्वादिति । आह च—

एते च हिन्तालसहितास्त्रयः ॥
खर्जूरः केतकी ताली खर्जूरी च तृणद्रुमाः ।

[अमर० का०२ वर्ग ५ श्लो०१६९-७०] ॥१८३॥ 5

॥ इति श्रीमद्बृहत्खरतरगच्छे श्रीजिनराजसूरिशिष्यश्रीजयसागरमहोपाध्यायपट्टानुक्रमवाचनाचार्यधुर्यश्रीभानुमेरुगणिशिष्यसमस्तप्रशस्तग्रन्थावलिविचक्षणश्रीज्ञानविमलोपाध्यायशिष्यवाचनाचार्यश्रीश्रीवल्लभगणिविरचितायां श्रीहेमचन्द्राचार्यकृतनिघण्टुशेषटीकायां वृक्षकाण्डः प्रथमः समाप्तः ॥ १ ॥ 10



२

[द्वितीयो गुल्मकाण्डः]

॥ अर्हम् ॥ अथ द्वितीयं गुल्मकाण्डं व्याख्यायते—

सिन्दुवारे च निर्गुण्डी सिन्दुको नील[1]सिन्दुकः ।
शीतसहेन्द्रसुरसाविन्द्राणी सिन्दुवारिका ॥१८४॥

स्यन्दते **सिन्दुवारः**, "द्वार-शृङ्गार-" [हैमोणादिसू० ४११] इत्यारे निपात्यते; "स्यन्दं वृणोति **सिन्दुवारः**, पृषोदरादित्वात्" इति **क्षीरस्वामी**, तत्र । निष्क्रान्ता गुण्डाद्—वेष्टनाद् **निर्गुण्डी** । **निर्गुण्ठी**त्यपि । "स्यन्दौङ् स्रवणे" अन्तस्थीयमध्योऽयम्, स्यन्दते **सिन्दुकः**, "केवयु-भुरण्यु-" [हैमोणादिसू० ७४६] इत्यादिना उप्रत्यये निपात्यते, स्वार्थिके के **सिन्दुकः** । नीलश्चासौ सिन्दुकश्च **नीलसिन्दुकः** । शीतं सहते **शीतसहः** । इन्द्रस्य सुरसः—दिव्य इत्यर्थः **इन्द्रसुरसः** । अत एव **इन्द्रोऽपि** अनिति अनया **इन्द्राणी** । सिन्दुं वृणोति **सिन्दुवारिका**, णके आप् । आह च—

सिन्दुवारः श्वेतपुष्पः सिन्दुकः सिन्दुवारिका ।
नीलपुष्पः शीतसहो निर्गुण्डी नीलसिन्दुकः ॥
[ ] इति ।

अन्योऽपि—

अथ सिन्दुकः ।
सिन्दुवारेन्द्रसुरसौ निर्गुण्डीन्द्राणिकेत्यपि ॥
[अमर० का० २ व० ४ श्लो० ६८] इति ।

एतस्य लोके 'निर्गुण्डी' इति प्रसिद्धिः ॥१८४॥

सा नीला वनशेफालो सुपुष्पा नीलमञ्जरी ।

'सा' निर्गुण्डी 'नीला' नीलवर्णा वनस्य शेफाली **वनशेफाली** । शोभनानि पुष्पाण्यस्याः **सुपुष्पा** । नीलवर्णा मञ्जर्योऽस्या **नीलमञ्जरी** ।

---

१ तु नि० ॥ २ नीलसन्धिकः । शीतसहा च सुरसा चेन्द्राणी सिन्दुवारकः ॥१८४॥नि०॥

श्वेता तु श्वेतसुरसा गोलोमी भूतवेश्यपि ॥१८५॥

'तुः' पुनरर्थे । 'श्वेता' श्वेतवर्णा श्वेतः शोभनश्च रसोऽस्याः **श्वेतसुरसा** । गोरिव लोमान्यस्या **गोलोमी**, गोलोमशत्वात्, पृषोदरादित्वात् साधुः । गोभिर्ह्रीयते वा **गोलोमी**, "रुक्म-ग्रीष्म" [हैमोणादिसू० ३४६] इति मान्तो निपात्यते । भूतानि विशति—आह्लादयति **भूतवेशी** । आह च—

शेफालिकाऽन्या निर्गुण्डी वनौका नीलमञ्जरी ।
शुक्लाऽन्या श्वेतसुरसा भूतवेशी च कथ्यते ॥
[ ] इति ।

द्वितीया निर्गुण्डीयम् ॥१८५॥

शेफालिकायां सुवहा निर्गुण्डी नीलिका च सा ।
सुरसा रक्तवृन्ता च श्वित्रघ्नी पुष्पवर्षिणी ॥१८६॥

शेरते शेफाः, 'री-शीभ्यां फः" [हैमोणादिसू० ३१४] इति फः, ते अलयोऽस्याः **शेफालिका**, तस्याम् । सुष्ठु वहत्यामोदं **सुवहा** । निर्गुण्डयति **निर्गुण्डी**, "गुडण् वेष्टने" । **नीलिका** नीलवर्णा । शोभनो रसोऽस्याः **सुरसा** । रक्तं वृन्तमस्याः **रक्तवृन्ता** । श्वित्रं—कुष्ठं हन्ति **श्वित्रघ्नी** । पुष्पाणां वर्षः पुष्पवर्षः, स विद्यतेऽस्याः **पुष्पवर्षिणी** ॥१८६॥

सा तु शुक्ला भूतवेशी सत्यनामा बहुक्षमा ।

'सा' शेफालिका शुक्ला भूतानि विशति—आह्लादयति **भूतवेशी** । सत्यं नाम अस्याः **सत्यनामा** । बहु क्षमते **बहुक्षमा** ।

प्रियङ्गौ प्रियकः कङ्गुः प्रियवल्ली प्रिया लता ॥१८७॥

विष्वक्सेना गन्धफली कारम्भा फलिनी फली ।
गुन्द्रा गोवन्दनी श्यामा योषाह्वा वर्णभेदिनी ॥१८८॥

---

१ गोलोमा नि० ॥ २ भूतकेश्यपि पु १ पु २ नि० । यद्यपि टीकादर्शयोः मूलपाठे 'भूतकेशी' इति पाठो वर्त्तते, किञ्च व्याख्या तु 'भूतवेशी' पाठानुसारिणी वर्त्तते । अमरादिष्वपि "सिताऽसौ श्वेतसुरसा भूतवेशी" [का० २ वर्ग ४ श्लो० ७२] इत्यादौ 'भूतवेशी' नामैव दृश्यते ॥ ३ भूतकेशी पु २ ॥ ४ नालिका सुता । सुरसा नि० ॥ ५ भूतकेशी सत्यनाम्नी बहु० नि० ॥ ६ पर्णभेदनी नि० ॥

"प्रींग्श् तृप्ति-कान्त्योः" प्रीणाति इति **प्रियङ्गुः**, स्त्रीलिङ्गः, "प्री-कै-पै-नीले-रङ्गुक्" [हैमोणादिसू० ७६१] इत्यङ्गुक्, तत्र । प्रीणाति **प्रियकः**, "कीचक-पेचक-" [हैमोणादिसू० ३३] इत्यके निपात्यते । "कै शब्दे" कायते **कङ्गुः**, "-प्री-कै-पै-नीले-रङ्गुक्" [हैमोणादिसू० ७६१] इत्यङ्गुक् । प्रिया चासौ वल्ली च **प्रियवल्ली** । प्रीणाति **प्रिया**, "नाम्युपान्त्य-" [सिद्ध०५.१.५४] इति कः । लायते **लता**, "पृषि-रञ्जि-" [हैमोणादिसू० २०८] इति "लांक् आदाने" इत्यस्मात् किद् अतः ॥१८७॥

विषूची सेनाऽस्याः **विष्वक्सेना**; विष्वक् सिनोति–सर्वतो बध्नाति वा "सेर्वा" [हैमोणादिसू० २६२] इति विकल्पेन किद् नः प्रत्ययः । गन्धप्रधाना फली **गन्धफली** । ईषद् रम्भा **कारम्भा**, "अल्पे" [सिद्ध०३.२.१३६] इत्यनेन ईषदर्थे कादेशः । फलति–विशीर्यते **फलिनी**, "श्या-कठि-खलि-" [हैमोणादिसू० २८२] इति बहुवचनादिनः । फलति **फली**, अच्, गौरादित्वाद् ङीः । गुण्ड्यते–क्रीड्यते **गुन्द्रा**, "खुर-क्षुर-" [हैमोणादिसू० ३९६] इति रे प्रत्यये निपात्यते । गवि–भूमौ वन्द्यते **गोवन्दनी** । इन्दुस्तु "**गौः वन्दनी**" इति भिनत्ति । यदाह—

वन्दनी पुष्पशोभना ।
गन्धप्रियङ्गुः कारम्भा लता गौर्वर्णभेदिनी ॥
[ ] इति ।

"**श्यामा** वर्णेन गौरश्यामवर्णा" इति **क्षीरस्वामी** । योषा–स्त्री तस्याः आह्वा अस्या **योषाह्वा** । वर्णं भिनत्तीत्येवंशीला **वर्णभेदिनी**, "अजातेः शीले" [सिद्ध० ५.१.१५४] इति णिन् । आह च—

श्यामा तु महिलाह्वया ।
लता गोवन्दनी गुन्द्रा प्रियङ्गुः फलिनी फली ॥
विष्वक्सेना गन्धफली कारम्भा प्रियकश्च सौ[1] ।
[अमर० का० २ वर्ग ४ श्लो० ५५–५६] इति ।

तथा च—

प्रियङ्गुः प्रियवल्ली च फलिनी कङ्गुनी प्रिया ।
वृत्ता गोवन्दनी श्यामा कारम्भा वर्णभेदिनी ॥
[ ] इति ।

एतस्या लोके 'प्रियंगु' इति प्रसिद्धिः ॥१८८॥

१ अमरे तु 'सः' इति पाठः ॥

मधुयष्ट्यां यष्टीमधुस्तल्लक्षणं मधुस्रवा ।
क्लीतकं च नीरजाऽसौ मधुपर्णी मधूलिका ॥१८९॥

मधुनो यष्टी **मधुयष्टी**, तस्याम् । यष्टीरूपं मधु **यष्टीमधुः** । तल्लक्षयति **तल्लक्षणम्** । मधु स्रवति **मधुस्रवा** । क्लीबत्वं तकति—प्रतिहन्ति वृष्यत्वात् **क्लीतकम्**, पृषोदरादित्वात् साधुः; **क्लीतक**संज्ञं वा, क्लीबलिङ्गः, स्थलजेयम् । नीरे जाता **नीरजा** । 'असौ' इति मधुयष्टी । मधूनि पर्णान्यस्याः **मधुपर्णी**, "पाक-कर्ण-पर्ण-" [सिद्ध० २.४.५५] इति ङीः । **मधूलिका** माधुर्यात् । आह च—

मधुयष्टी च यष्टी च यष्टीमधु मधुस्रवा ।
यष्टीमधूकं मधुकं यष्ट्याह्वं मधुयष्टिका ॥
तल्लक्षणं क्लीतनं च क्लीतकं क्लीतका च सा ।
स्थलजा जलजाऽन्या च मधुपर्णी मधूलिका ॥
[ ] इति ।

मधुयष्टीनामानि । लोके 'जेठीमधु' इति प्रसिद्धिः ॥१८९॥

अश्वगन्धायां तुरगी कञ्चुकाऽश्वावरोहकः ।
अश्वकन्दो बहुगन्धा पुत्रदा लोककर्ण्यपि[2] ॥१९०॥

अश्वस्येव गन्धोऽस्याः **अश्वगन्धा**, तस्याम् । तुरो गच्छति **तुरगी**, "नाम्नो गमः-" [सिद्ध०५.१.१३१] इति डः । यदाह **श्रीधरः**—

तुरगी त्वश्वगन्धायां तुरगो हय-चित्तयोः ।
[विश्वलोचन गतृतीये श्लो० ४०] इति ।

"कचि बन्धने" कच्यते **कञ्चुका**, "कञ्चुकांशुक-" [*हैमोणादिसू०* ५७] इत्युके निपात्यते । अश्वैः अवरुह्यते अश्वावरोहः, स्वार्थिके के **अश्वावरोहकः** । अश्वस्य कन्दः **अश्वकन्दः** । बहुर्गन्धोऽस्या **बहुगन्धा** । पुत्रं ददाति **पुत्रदा** । "कर्णण् भेदे" लोकं कर्णयति **लोककर्णी**, वातहन्त्रीत्वात् । आह च—

अश्वगन्धा वाजिगन्धा कुम्भकोऽश्वावरोहकः ।
वराहकर्णी तुरगी बल्या वाजीकरी मता ॥
[ ] इति ।

---

१ तुरङ्गी कम्बुका ° नि० ॥ २ कोलकर्ण्यपि नि० ॥

एतस्या लोके 'आसगंधि' इति प्रसिद्धिः ॥१९०॥

मेषशृङ्ग्यामजशृङ्ग्यौ वर्त्तिका सर्पदंष्ट्रिका ।

मेषस्येव शृङ्गाण्यस्याः **मेषशृङ्गी**, तस्याम् । अजस्येव शृङ्गाण्यस्या **अजशृङ्गी** । वर्त्तते वर्तयति वा **वर्त्तिका**, णकः प्रत्ययः । सर्पस्येव दंष्ट्रा अस्याः सर्पदंष्ट्रा, स्वार्थिके के **सर्पदंष्ट्रिका** । आह च **मदनपालः**— 5

मेषशृङ्गी मेण्ढवल्ली सर्पदंष्ट्राऽजशृङ्गिका ।

[ ] इति ।

मेषशृङ्गीनामानि । लोके तु 'मीढासिंगी' इति प्रसिद्धिः ।

सैव स्याद् दक्षिणावर्ता वृश्चिकाली विषाणिका ॥१९१॥
उष्ट्र-धूमकपुष्पा च काली च विषघातनी । 10

'एव' इति निश्चयार्थे । 'सा' मेषशृङ्गी 'स्याद्' भवेद् दक्षिणा आवर्ता अस्या **दक्षिणावर्ता**; दक्षिणस्यां दिशि आवर्तते इति वा । वृश्चिकालमिव **वृश्चिकाली**, '**अलम्**' इति वृश्चिककण्टक उच्यते । विषाणानि सन्त्यस्याः **विषाणिका**, शृङ्गीत्वात् ॥१९१॥

'उष्ट्र-धूमकपुष्पा' इति उष्ट्र-धूमशब्दाभ्यां परः पुष्पशब्दः सम्बध्यते, तेन 15
उष्ट्रपुष्पा धूमपुष्पा च । **काली** कालवर्णत्वात् । विषं घातयति **विषघातनी**, अनट् । आह च—

अन्या तु दक्षिणावर्ता वृश्चिकाली विषाणिका ।

[ ] इति ।

धन्वन्तरिरप्याह— 20

अजशृङ्गी मेषशृङ्गी सर्पदंष्ट्रा च वर्त्तिका ।
द्वितीया दक्षिणावर्ता वृश्चिकाली विषाणिका ॥

[ ] इति ।

मेषशृङ्गीविशेषोऽयम् ।

कर्कटशृङ्ग्यां तु शृङ्गी नताङ्गी शिशिरेफला ॥१९२॥ 25
कर्कटाह्वा महाघोषा वक्रा मञ्जीरशिम्बिका ।

---

१ °काला वि° नि० ॥ २ °पुच्छा च नि० ॥ ३ शृङ्गी तु कर्कटशृङ्ग्यां नता° नि० ॥
४ मञ्जरिशि° नि० ॥

कर्कटशब्देन जलचरजीवविशेषः, तदाकाराणि शृङ्गाण्यस्याः **कर्कटशृङ्गी**, तस्याम्। शृणाति **शृङ्गी**, "शृङ्ग-शार्ङ्गादयः" [हैमोणादिसू० ९६] इति गे निपात्यते। नतमङ्गमस्या **नताङ्गी**। शिशिरे फलान्यस्याः **शिशिरेफला**, पृषोदरादित्वात् सप्तम्यलोपः ॥१९२॥

कर्कटस्य आह्वा अस्याः **कर्कटाह्वा**। महती चासौ घोषा च **महाघोषा**। **यन्महेश्वरः**—

स्मृता कर्कटशृङ्ग्यां च महाघोषा मनीषिभिः।
[ ] इति।

वक्रा कुटिला। मञ्जीर इव शिम्बिरस्या [मञ्जीरशिम्बिः, स्वार्थिके के] **मञ्जीरशिम्बिका**। आह च—

शृङ्गी कर्कटशृङ्गी च कुलीरा कर्कटाह्वया।
कुलिङ्गशृङ्गी वक्रा च महाघोषा नताङ्ग्यपि ॥
चन्द्रा स्वादु विषाणी च प्रोक्ता च निजमूर्द्धजा।
[ ] इति।

कर्कटशृङ्गीनामानि। लोके तु 'काकडासिंगी' इति प्रसिद्धिः।

निर्दिग्धिकायां कण्टाली दुःस्पर्शा कण्टकारिका ॥१९३॥
व्याघ्री क्षुद्रा दुष्प्रधर्षा धावनी हेमपुष्पिका।

निर्दिह्यते निर्दिग्धा, स्वार्थिके के **निर्दिग्धिका**, तस्याम्। कण्टैरलति—दीप्यते **कण्टाली**। दुष्टः स्पर्शोऽस्याः **दुःस्पर्शा**। कण्टकान् इयर्त्ति कण्टकारी, के **कण्टकारिका** ॥१९३॥

व्याघ्रीव **व्याघ्री**, दुःस्पर्शत्वात्। [क्षुणत्त्यङ्गं **क्षुद्रा**।] "धृषण् शक्तिबन्धे" धर्षणं धर्षः, दुष्टः प्रधर्षोऽस्या **दुष्प्रधर्षा**। धाव्यते **धावनी**, "अनट्" [सिद्ध०५.३.१२४] इत्यनट्। हेमवर्णानि पुष्पाण्यस्या हेमपुष्पी, के **हेमपुष्पिका**। आह च—

कण्टकारी च दुःस्पर्शा क्षुद्रा व्याघ्री निर्दिग्धिका।
कण्टालिका कण्टकिनी धावनी दुष्प्रधर्षणी ॥
[ ] इति।

---

१ मञ्जरी इव शिम्बिरस्या मञ्जरीशिम्बिका पु १ ॥

अस्या लोके 'रींगणी' इति प्रसिद्धिः ।

बृहत्यां क्षुद्रा[1] भण्टाकी वार्ताकी राष्ट्रिका कुली ॥१९४॥
विशदा[2] सिंह्यनाक्रान्ता महोटिका महत्यपि ।

कण्टकबाहुल्याद् **बृहती**, तस्याम् । क्षुणत्ति **क्षुद्रा** हिंस्रा, "ऋज्यजि-" [हैमोणादिसू० ३८८] इति किद् रः ; **क्षुद्रवार्ताक्ये**कदेशे वा **क्षुद्रा**, यथा सत्या सत्यभामा । "भट भृतौ" भटति **भण्टाकी**, वर्तते **वार्ताकी**, उभावपि "मवाक-श्यामाक-वार्ताक-" [हैमोणादिसू० ३७] इत्याके निपात्येते । "**भण्टाकी** कण्टकार्था वा" **इत्यपरः** । राष्ट्रमस्त्यस्या **राष्ट्रिका**, "अतोऽनेकस्वरात्" [सिद्ध०७.२.६] इतीकः । कोलति **कुली**, "नाम्युपान्त्य-" [सिद्ध०५.१.५४] इति कः ॥१९४॥

विशदा श्वेता । हिनस्ति **सिंही**, पृषोदरादित्वात् । न आक्रान्ता **अनाक्रान्ता** । **महोटिके**त्ययमव्युत्पन्नः शब्दः । **महती** वृद्धा । आह च—

बृहती सिंह्यनाक्रान्ता वार्ताकी राष्ट्रिका कुली ।
विशदा स्थूलभण्टाकी महती तु महोटिका ॥
[ ] इति ।

भागुरिस्तु द्वयोर्बृहतीत्वं मन्यते । यत् **शाश्वतः**—

क्षुद्रायां क्षुद्रवार्त्ताक्यां बृहती छन्दसि क्वचित् ।
[श्लो० ४२०] इति ।

एतस्या लोके 'बृद्धरींगणी' 'डोल्हरी' इति प्रसिद्धिः ।

विदार्यां तु स्वादुकन्दा पुष्पकन्दा शृगालिका ॥१९५॥
वृक्षादनी चर्मकषा[3] कूष्माण्डी चाऽश्ववल्लभा ।
विडालिका वृक्षपर्णी

विदारयति **विदारी**, अच्, गौरादित्वाद् ङीः; "विदार्य भक्ष्यते **विदारी**" इति **क्षीरस्वामी**, पृषोदरादित्वात्, तस्याम् । स्वादुः—मृष्टः कन्दोऽस्याः **स्वादुकन्दा** । पुष्पाकारः कन्दोऽस्याः **पुष्पकन्दा** । सृजति रसं **शृगाली**, "चात्वाल-कङ्काल-" [हैमोणादिसू० ४८०] इत्याले निपात्यते, के **शृगालिका** ॥१९५॥

वृक्षमत्ति **वृक्षादनी**; अनट् । चर्म कषति **चर्मकषा** । कुष्णाति कुष्यते वा **कूष्माण्डी**, "पिचण्डैरण्ड-" [हैमोणादिसू० १७६] इत्यण्डे निपात्यते । अश्वानां

---

१ क्षुद्रभण्टाकी नि० ॥ २ विशदः नि० ॥ ३ ° षा भूकूष्माण्डयश्च ° नि० ॥

वल्लभा **अश्ववल्लभा** । "विड आक्रोशे" वेडति विड्यते वा **विडाली** , "कुलि-पिलि-" [हैमोणादिसू० ४७६] इति किदालः, के **विडालिका** । वृक्ष इव पर्णान्यस्या **वृक्षपर्णी** । आह च—

विदारिका मता शुक्ला स्वादुकन्दा सृगालिका ।
वृक्षकन्दा विदारी च वृक्षवल्ली विडालिका ॥
[ ] इति ।

एतस्या लोके 'विदारि' इति प्रसिद्धिः ।

महाश्वेताऽपरा तु सा ॥१९६॥

क्षीरशुक्ला क्षीरकन्दा क्षीरवल्ली पयस्विनी ।
ऋक्षगन्धेक्षुगन्धेक्षुवल्ली क्षीरविदारिका ॥१९७॥

'तुः' पुनरर्थे । 'सा' विदारी 'अपरा' अन्या महती चासौ श्वेता च **महाश्वेता** ॥१९६॥

क्षीरेण शुक्ला **क्षीरशुक्ला** । क्षीरप्रधानः कन्दोऽस्याः **क्षीरकन्दा** । क्षीरस्य वल्ली **क्षीरवल्ली** । पयोऽस्त्यस्याः **पयस्विनी** । ऋक्षान् गन्धयति—अर्दयति **ऋक्ष-गन्धा** । इक्षोरिव गन्धोऽस्याः **इक्षुगन्धा** माधुर्यात् । इक्षोर्वल्लीव **इक्षुवल्ली** । क्षीर-प्रधाना विदारी क्षीरविदारी, स्वार्थिके के **क्षीरविदारिका** । आह च—

अन्या क्षीरविदारी स्याद् ऋक्षगन्धेक्षुवल्ल्यपि ।
क्षीरकन्दा क्षीरयुक्ता क्षीरवल्ली पयस्विनी ॥
[ ] इति ।

क्षीरविदारिकेयम् ॥१९७॥

पृष्णिपर्णी पृथक्पर्णी लाङ्गली क्रोष्टुपुच्छिका ।
शृगालविन्ना कलशिर्धृतिला धावनी गुहा ॥१९८॥
सिंहपुच्छी चित्रपर्ण्यहिपर्णी तिलपर्ण्यपि ।

पृष्णिरिव पर्णान्यस्याः **पृष्णिपर्णी सूक्ष्मपर्णा** वा, यदाह —"पृष्णि(श्नि?)रल्प तनौ" [अमर० का० २ वर्ग ६ श्लो० ४८], तस्याम् । पृथक् पर्णान्यस्याः

---

१ ऋष्यग० नि० ॥ २ पृश्निपर्णी नि० । हैमोणादौ 'पृष्णि'शब्दः स्वीकृतोऽस्ति । पाणिन्युणादौ अमरादौ च 'पृश्नि'शब्दः स्वीकृतोऽस्ति ॥

पृथक्पर्णी। "लगु गतौ" लङ्गति **लाङ्गली,** "नहि-लङ्गेर्दीर्घश्च" [हैमोणादिसू० ४६६] इत्यालः। क्रोष्टोरिव पुच्छमस्याः क्रोष्टुपुच्छी, के **क्रोष्टुपुच्छिका।** अत एव क्रोष्टुभिर्विन्ना दत्तेव **क्रोष्टुविन्ना** इत्यपि। शृगालैर्विन्ना—दत्तेव **शृगालविन्ना। कलशिः** गर्गरीव। धृतिलत्वाद् धृतिं लाति **धृतिला,** "क्वचित्" [सिद्ध० ५. १. १७१] इति डः। धावति—प्रसरति **धावनी,** "ग्वसि-रसि-" [हैमोणादिसू० २६१] इत्यादिवचनादनः। 'गुहौग् संवरणे" गूहति रसं **गुहा,** "तुदादि-विषि-गुहिभ्यः कित्" [हैमोणादिसू० ५] इति किदः ॥१९८॥

सिंहस्येव पुच्छमस्याः **सिंहपुच्छी**। लोकोक्त्या **सिंहपुच्छकः।** चित्राणि पर्णान्यस्याः **चित्रपर्णी।** अंहेः—बुध्नादारभ्य पर्णान्यस्याः **अंहिपर्णी।** तिलवत् स्निग्धानि पर्णान्यस्याः **तिलपर्णी**। आह च—

पृष्णि(?श्नि)पर्णी पृथक्पर्णी चित्रपर्ण्यंहिपर्णिका ॥
क्रोष्टुविन्ना सिंहपुच्छी कलशिर्धावनी गुहा।

[अमर० का० २ वर्ग ४ श्लो० ९२–९३] इति।

तथा च—

पृष्णि(?श्नि)पर्णी पृथक्पर्णी कलशिर्धावनी गुहा।
शृगालविन्ना धृतिला पर्णी क्रोष्टुकपुच्छिका ॥
ब्रह्मपर्णीति विख्याता वृष्णित्वा[द्] विष्णुपर्णिका।

[ ] इति।

पृष्णिपर्णीनामानि। [1]* लोके तु 'पीठवनी' इति प्रसिद्धिः।

गोक्षुरे स्थलशृङ्गाट-वनशृङ्गाट-गोखुराः ॥१९९॥
कण्टी षँडङ्गो गोकण्टस्त्रिकण्टस्त्रिककण्टकः।
इक्षुगन्धा व्यालदंष्ट्रः श्वदंष्ट्रः स्वादुकण्टकः ॥२००॥
पलङ्कषा कण्टफलः षँडन्तो भूक्षुरः क्षुरः।

गाः क्षुरति—व्यथयति **गोक्षुरः,** तत्र। स्थलस्य शृङ्गाटः स्थलशृङ्गमटति वा **स्थलशृङ्गाटः।** वनस्य शृङ्गाटो **वनशृङ्गाटः।** गवां खुरो वेधकत्वाद् **गोखुरः** ॥१९९॥

१. पु २ प्रतिः * फुल्लिकाचिह्नं यावदेव लिखिता वर्त्तते। अग्रेऽपूर्णेति। २ षडङ्गो गोकण्टस्त्रिकण्टस्तु त्रिकस्त्रिकः। नि० ॥ ३ षडङ्गस्तूक्षुरः नि० ॥

कण्टाः सन्त्यस्य **कण्टी** । षड् अङ्गान्यस्य **षडङ्गः** । गवां कण्टो **गोकण्टः** । त्रयः कण्टा अस्य **त्रिकण्टः** । त्रिकं कण्टकानामस्य **त्रिककण्टकः** । इक्षोर्गन्ध इव गन्धोऽस्याः **इक्षुगन्धा** । व्यालस्येव दंष्ट्राऽस्य **व्यालदंष्ट्रः** । शुनो दंष्ट्रेव हिंस्रत्वात् **श्वदंष्ट्रः** । स्वादवः—मृष्टाः कण्टका अस्य **स्वादुकण्टकः** ॥२००॥

पलं-मांसं कषति **पलङ्कषा** । कण्टप्रधानं फलमस्य **कण्टफलः** । षड् अन्ता यस्य स **षडन्तः** । भुवः क्षुर इव **भूक्षुरः** । क्षुरति **क्षुरः** । आह च—

गोक्षुरः स्याद् गोक्षुरको भक्षटः स्वादुकण्टकः ।
गोकण्टको भक्षटकः षडन्तः क्षुरकः क्षुरः ॥
गोकण्टो गोखुरः कण्टी षडङ्गस्त्रिकटस्त्रिकः ।
त्रिकण्टकः कण्टफलः श्वदंष्ट्रो व्यालदंष्ट्रकः ॥

[ ] इति ।

गोक्षुरनामानि । लोके 'गोखरू' इति प्रसिद्धिः ।

दन्त्यां शीघ्रोपशल्योपचित्रोदुम्बरपर्णिका ॥२०१॥
मकूलको रामदूती निकुम्भो घुणवल्लभा ।

दन्ताभात्वाद् **दन्ती,** दाम्यन्त्यनया वा दोषाः "दम्यमि-" [हैमोणादिसू० २००] इति तः, तस्याम् । श्यायते **शीघ्रा,** "खुर-क्षुर-" [हैमोणादिसू० ३९६] इति रे निपात्यते । उपशलति **उपशल्या,** "स्था-छा-मा-सा-" [हैमोणादिसू० ३५७] इति यः । उप—समीपे चित्राण्यस्याः **उपचित्रा** । उदुम्बर इव पर्णान्यस्या उदुम्बर-पर्णी, के **उदुम्बरपर्णिका** ॥२०१॥

"मकुङ् मण्डने" मङ्कते चित्रत्वाद् मकूलः, "दुकूल-कुकूल-" [हैमोणादिसू० ४९१] इत्यूले निपात्यते, स्वार्थिके के **मकूलकः** । रामस्य दूतीव **रामदूती** । नियतः कुम्भो **निकुम्भः** । घुणानां वल्लभा **घुणवल्लभा** । आह च—

दन्ती शीघ्रा निकुम्भा स्यादुपचित्रा मकूलकः ।
तथोदुम्बरपर्णी च विशल्या च घुणप्रिया ॥

[ ] इति ।

दन्तीनामानि । लोके तु 'दांती' इति प्रसिद्धिः ।

---

१ शीघ्रा विशल्या च चित्र ° नि० ॥

नागदन्त्यां हस्तिदन्ती वारुणी गजचिर्भिटी ॥२०२॥
मृगादनी मृगेर्वारुर्मृगाक्षी तु गजस्फुटा ।
श्वेतपुष्पी मधुपुष्पी पर्वपुत्री विषौषधी ॥२०३॥

नागस्य दन्ती **नागदन्ती**, तस्याम् । हस्तिनो दन्ती **हस्तिदन्ती** । वरुणस्येयं **वारुणी**, "तस्येदम्" [सिद्ध० ६. ३. १६०] इत्यण् । गजस्य चिर्भिटीव **गजचिर्भिटी** ॥२०२॥

मृगैरद्यते **मृगादनी**, "अनट्" [सिद्ध०५. १.१२४] इत्यनट् । मृगस्य ईर्वारुरिव **मृगेर्वारुः** । मृगमक्ष्णोति **मृगाक्षी** । गजानां स्फुटा **गजस्फुटा** । श्वेतानि पुष्पाण्यस्याः **श्वेतपुष्पी** । मधूनि पुष्पाण्यस्याः **मधुपुष्पी**, "असत्काण्डप्रान्त-" [सिद्ध० २. ४. ५६] इति ङीः । पर्वाणां पुत्रीव **पर्वपुत्री** । विषस्य ओषधी **विषौषधी** । दन्तीविशेषोऽयम् ॥२०३॥

अपामार्गे त्वधःशल्या किणिही खरमञ्जरी ।
धामार्गवः शैखरिको वशिरः कपिपिप्पली ॥२०४॥

कपिवल्ली मर्कटिका शिखर्याघाट-दुर्ग्रहौ ।
प्रत्यक्पुष्पी पत्रपुष्पी केशवल्ली मयूरकः ॥२०५॥

अपकृष्टः आ—समन्तान्मार्गोऽस्य **अपामार्गः**, तत्र । अधः शल्यमस्या **अधःशल्या** । किणिनो जिहीते—याति **किणिही**, स्पर्शात् किणोत्पादनात् । खरा मञ्जर्योऽस्य **खरमञ्जरी** । धाम इयर्ति **धामार्गवः**, "कैरव-भैरव-" [हैमोणादिसू० ५१९] इत्यवे निपात्यते । "अधमं मार्गं वाति न धाम अर्कति वेति [**अधामार्गवः**], पृषोदरादित्वात्" इति **क्षीरस्वामी**ति । अयमपि द्वयर्थे—**अधामार्गवो**ऽपामार्गः कोशातकी च । शिखरे भवः **शैखरिकः**, "भवे" [सिद्ध० ६.३. १२३] इति इकण् । "वशक् कान्तौ" उश्यते **वशिरः**, मध्यतालव्यः, "स्थविर-पिठिर-" [हैमोणादिसू० ४१७] इतीरे निपात्यते । कपीनां पिप्पली **कपिपिप्पली** ॥२०४॥

कपीनां वल्ली **कपिवल्ली** । मर्किः सौत्रः, मर्कति मर्कटी, "दिव्यवि-" [हैमोणादिसू० १४२] इत्यटः, स्वार्थिके के **मर्कटिका**; मर्कटाः सन्त्यस्यामिति

१ °णी चापि चि° नि० ॥ २ °क्षी भुजगस्फटा । श्वेतपुष्पा मधुपुष्पा पर्वपुष्पा विषौषधिः ॥ २०३ ॥ नि० ॥ ३°शल्यः नि० ॥

वा, तेषां प्रियत्वात्, "अतोऽनेकस्वरात्" [सिद्ध० ७.२.६] इतीकः । शिखरोऽस्त्यस्य **शिखरी** । आघटन्ते कपयोऽत्र **आघाटः** । दुःखेन गृह्यते **दुर्ग्रहः**; दुष्टो ग्रहोऽस्य वा । प्रत्यञ्चि पुष्पाण्यस्याः **प्रत्यक्पुष्पी** । **प्रत्यक्पर्ण्यपि** । पत्राण्येव पुष्पाण्यस्य **पत्रपुष्पी** । केशानां वल्ली **केशवल्ली** । **केशपर्ण्यपि** । मयूरप्रतिकृतिर्**मयूरकः**, "तस्य तुल्ये कः संज्ञा-प्रतिकृत्योः" [सिद्ध० ७.१.१०८] इति कः । आह च—

अपामार्गश्च शिखरी प्रत्यक्पुष्पी मयूरकः ।
अधःशल्याऽथ किणिही दुर्ग्रहः खरमञ्जरी ॥
स एवोक्तः शौखरिको मर्कटी दुरतिग्रहः ।
पत्रपुष्पी च वशिरः कुटो मर्कटपिप्पली ॥
[धन्व० वर्ग ५ श्लो० २६०-६१] इति ।

तथा च—

अपामार्गः शौखरिको धामार्गव-मयूरकौ ॥
प्रत्यक्पर्णी [कीशपर्णी] किणिही खरमञ्जरी ।
[अमर० का० २ वर्ग ४ श्लो० ८८-८९] इति ।

अपामार्गनामानि । लोके तु 'आझाझाडा' इति प्रसिद्धिः ॥२०५॥

आर्द्रके तु शृङ्गबेरं कटुभङ्गं कटूत्कटम् ।
शुण्ठी महौषधं विश्वा नागरं विश्वभेषजम् ॥२०६॥

"अर्द गति-याचनयोः" अर्द्यते आर्द्रम्, "चि-जि-शु-सि-" [हैमोणादिसू० ३९२] इति रो दीर्घश्च, आर्द्रमेव **आर्द्रकम्**, पुं-क्लीबलिङ्गः, तत्र । शृणाति रसनां **शृङ्गबेरम्**, "शतेरादयः" [हैमोणादिसू० ४३२] इति केरे निपात्यते । कटुः—क्षारः भङ्गोऽस्य तत् **कटुभङ्गम्** । कटुषु उत्कटम् **कटूत्कटम्** । शुण्ठति—शुष्यति **शुण्ठिः**, "किलि-पिलि-" [हैमोणादिसू० ६०८] इति इः, ङ्यां **शुण्ठी** । महच्च तदौषधं च **महौषधम्** । "विशंत् प्रवेशने" विशति दोषान् **विश्वा**, स्त्री-क्लीबलिङ्गः, "निघृषि-" [हैमोणादिसू० ५११] इति किद् वः । **नगरा**ख्ये देशे भवं **नागरम्**, "भवे" [सिद्ध० ६. ३. १२३] इत्यण्; "गॄत् निगरणे" न न गिरति कफमिति वा, नखादित्वात् साधुः, पृषोदरादित्वाद् दीर्घः । विश्वस्य भेषजं **विश्वभेषजम्**, *अनेकदोषजित्त्वात् । आह च*—

शुण्ठी, महौषधं विश्वा नागरं विश्वभेषजम् ।
विश्वौषधं शृङ्गबेरं कटुभद्रं तथाऽऽर्द्रकम् ॥
[धन्व० वर्ग० २ श्लो० ८२] इति ।

शुण्ठीनामानि । लोके तु 'सूंठि' इति प्रसिद्धिः ॥२०६॥

पुनर्नवायां वृश्ची च दीर्घपत्रः शिलाटकः ।
विशाखः क्षुद्रवर्षाभूः कटिल्लः प्रावृषायणी ॥२०७॥
शोफघ्नी च

पुनर्नवैव **पुनर्नवा**, विशेषत्वात् । "ओव्रश्चोत् छेदने" दन्त्योपान्त्योऽयम् "सस्य श-षौ" [सिद्ध० १.३. ६१] इति शे "ग्रह-व्रश्च-" [सिद्ध० ४. १. ८४] इति ष्वृति वृश्चति **वृश्ची** । दीर्घाणि पत्राण्यस्य **दीर्घपत्रः** । शिलामटति **शिलाटकः** । विशाखति—व्याप्नोति **विशाखः**, अच् । क्षुद्रश्चासौ वर्षाभूश्च **क्षुद्रवर्षाभूः** । कटति—गच्छति **कटिल्लः**, "भिल्ला-ऽच्छभल्ल-" [हैमोणादिसू० ४६४] इति ले निपात्यते । प्रावृषि भवा **प्रावृषायणी** ॥२०७॥

शोफं हन्ति **शोफघ्नी**, टक् । आह च—

पुनर्नवा विशाखश्च कटिल्लः शशिलाटकः ।
वृश्ची च क्षुद्रवर्षाभूर्दीर्घपत्रः कटिल्लकः ॥
[धन्व० वर्ग १ श्लो० २७४] इति ।

तथा चाऽ**मरः**—

पुनर्नवा तु शोफघ्नी [का० २ वर्ग ४ श्लो० १४९] इति ।
पुनर्नवानामानि । लोके तु 'साटहडा' इति प्रसिद्धिः ।

अपरा त्वेषा क्रूरा मण्डलपत्रकः ।
श्वेतमूला महावर्षाभूर्वर्षाकेतुरित्यपि ॥२०८॥

'तुः' पुनरर्थे । 'एषा' पुनर्नवा 'अपरा' अन्या कृन्तति **क्रूरा**, "कृतेः क्रू-कृच्छ्रौ च" [हैमोणादिसू० ३९५] इति सूत्रेण "कृतैत् छेदने" इत्यस्माद् रः प्रत्ययोऽस्य च क्रू इत्यादेशः । मण्डलाकाराणि पत्राण्यस्य मण्डलपत्रः, के **मण्डलपत्रकः** । श्वेतं मूलमस्याः **श्वेतमूला** । महती चासौ वर्षाभूश्च **महावर्षाभूः** । वर्षाणां केतुरिव **वर्षाकेतुः** । आह च—

---

१ वृश्चीरो दीर्घपत्रा शिलाटिका नि० ॥ २ क्रमण्ड° नि० ॥ ३ ° वर्षकेतु ° नि० ॥

पुनर्नवाऽपरा क्रूरः सघोमण्डलपत्रकः ।
श्वेतमूलो वर्षाकेतुर्महावर्षाभूरुच्यते ॥
[धन्व० वर्ग १ श्लो० २७६] इति ।

एतस्या लोके 'साटहडी' इति प्रसिद्धिः ॥२०८॥

ज्योतिष्मत्यां स्वर्णलतां दुर्मदा लवणाऽग्निभा ।
पारावतपदी पण्या ज्योतिष्का कटभीत्यपि ॥२०९॥

ज्योतिर्विद्यतेऽस्याः **ज्योतिष्मती**, तस्याम् । स्वर्णस्य लतेव **स्वर्णलता** । दुष्टो मदोऽस्याः **दुर्मदा** । लुनाति जाड्यं **लवणा**, नन्द्यादित्वादनः । अग्निवद् भादीप्तिरस्याः **अग्निभा** । पारावतस्येव पदा अस्याः **पारावतपदी** । अत एव **पारावतांह्रिः** । पथे साधुः **पण्या**; "स्तुत्या" इति **क्षीरस्वामी** । द्योतते ज्योतिः, "द्युतेरादेश्च जः" [हैमोणादिसू० ९९१] इतीस्, तदेव **ज्योतिष्का** । "कटति-आवृणोति **कटभी**" इति **क्षीरस्वामी**, "कृ-शॄ-गृ-शलि-" [हैमोणादिसू० ३२९] इत्यभः । आह च—

ज्योतिष्मती तु कटभी स्यात् सुवर्णलतेति च ।
ज्योतिष्का चाग्निभा सा च लवणोदा च दुर्दिना ॥
[धन्व० वर्ग १ श्लो० २६७] इति ।

द्व्यर्थे **पारावतपदी**—काकजङ्घा ज्योतिष्मती च ।
अमरोऽप्याह—

पारावतांह्रिः कटभी पण्या ज्योतिष्मती लता ।
[का० २ वर्ग ४ श्लो० १५०] इति ।

ज्योतिष्मतीनामानि । लोके तु 'मालकांगुणी' इति प्रसिद्धिः ॥२०९॥

माषपर्ण्यार्द्रमाषा मांसमाषा महासहा ।
अश्वपुच्छी सिंहवृन्ता काम्बोजी कृष्णवृन्तिका ॥२१०॥

माष इव पर्णान्यस्या **माषपर्णी**, तस्याम् । आर्द्रा चासौ माषा च **आर्द्रमाषा** । मांसोपलक्षिता माषा **मांसमाषा** । **महासहे**ति मुद्गपर्ण्याः सहाया भिन्नेयम् । अश्व-

---

१ °ता कड्गुनी लव° नि० ॥ २ माषपर्णी सूर्यपर्णी पाण्डुश्चापि महासहा । अश्वपुच्छा नि० ॥

पुच्छाकृतित्वाद् **अश्वपुच्छी** । सिंहाकारं वृन्तमस्याः **सिंहवृन्ता** । **कम्बोज**देशे भवा **काम्बोजी** । कृष्णं वृन्तमस्याः **कृष्णवृन्तिका** । आह च—

माषपर्णी तु काम्बोजी कृष्णवृन्ता महासहा ।
आर्द्रमाषा सिंहवृन्ता मांसमाषाऽश्वपुच्छिका ॥

[धन्व० वर्ग १ श्लो० १३६] इति ।

माषपर्णीनामानि । लोके तु 'माषवनी' इति प्रसिद्धिः ॥२१०॥

मुद्गपर्ण्या काकमुद्रा वर्णा मार्जारगन्धिका ।
शिम्बी क्षुद्रसहा ह्रासा रङ्गणी शूर्पपर्णिका ॥२११॥

मुद्गस्येव पर्णान्यस्याः **मुद्गपर्णी**, तस्याम् । काकस्येव मुद्राऽस्याः **काकमुद्रा** । यदाह— 10

मुद्गपर्णी तु काकमुद्रा सहेत्यपि ।

[अमर० का० २ वर्ग ४ श्लो० ११३] इति ।

वर्ण्यते **वर्णा** । मार्जारस्येव गन्धोऽस्या **मार्जारगन्धिका** । शिनोति **शिम्बिः**, "छवि-छिवि-" [हैमोणादिसू० ७०६] इति वौ निपात्यते, ङ्यां **शिम्बी** । सहते सहा, क्षुद्रा चासौ सहा च **क्षुद्रसहा** । ह्रस्यते **ह्रासा** । रङ्ग्त्यवश्यं **रङ्गणी** । 15 शूर्प इव पर्णान्यस्याः शूर्पपर्णी, के **शूर्पपर्णिका** । आह च—

मुद्गपर्णी क्षुद्रसहा शिम्बी मार्जारगन्धिका ।
वनजा रङ्गणी ह्रासा शूर्पपर्णी बुधैः स्मृता ॥

[धन्व० वर्ग १ श्लोक १३८] इति ।

तथा च— 20

मुद्गपर्णी क्षुद्रसहा शूर्पपर्णी कु(?तु) रङ्गणी ।
वनजा रिङ्गणी शिम्बी सिंही मार्जारगन्धिका ॥

[ ] इति ।

मुद्गपर्णीनामानि । लोके तु 'मुदगवनी' इति प्रसिद्धिः ॥२११॥

१[0]मुद्गा वन्या मार्जारगन्धिका । शिवा क्षुद्रसहा ह्रासी रङ्गणी सूर्पपर्णिका ॥ २११ ॥ नि० ॥

२ व्याख्यासुधायां 'काकमुद्रा' इति पाठानुसारेण "ईषत् कम् 'ईषदर्थे' [पा० ६. ३.१०५] इति कोः कादेशः, काकेन—ईषज्जलेन मुदं गच्छति 'गमश्च' [पा० ३. २. ४७] इति डः । यद्वा काका मुद्गाः—हर्षप्राप्ता यस्याम् ।" इति व्याख्यानं वर्तते ॥

भूम्यामलक्यामामला बहुपत्री वितुन्नकः ।
तामलक्यज्झटाऽज्झाटा तालिका च तमालिनी ॥२१२॥

भूमेरामलकी **भूम्यामलकी**, तस्याम् । आमलते **आमला**, आमलकीत्वात् । बहूनि पत्राण्यस्या **बहुपत्री** । वितुद्यते वितुन्नः के **वितुन्नकः** । ताम्यति **तामलकी**, "कीचक-पेचक-" [हैमोणादिसू० ३३] इत्यके निपात्यते । अत्—आश्चर्यकारी झटा—सङ्घातोऽस्या **अज्झटा** । "आश्चर्यकारिसङ्घाता" इति **क्षीरस्वामी** । अत्—आश्चर्ये, अद्भुतवद् झाटः—सङ्घातोऽस्त्यस्या **अज्झाटा**, अभ्रादित्वादः । ताडयति मालास्ताली, ड-लयोरैक्यात्, स्वार्थिके के **तालिका** । तमालाः सन्त्यस्याः **तमालिनी** । आह च—

तामलक्युत्तमा ताली तमालं तु तमालिनी ।
वितुन्नकस्त्वज्झटा च झाटा साऽऽमलकीति च ॥
[धन्व वर्ग ३ श्लो० ८४] इति ।

भूम्यामलकीनामानि । लोके तु 'भुइंआमली' इति प्रसिद्धिः ॥२१२॥

हरिद्रायां वर्णवती काञ्चनी वरवर्णिनी ।
निशाख्या रजनिर्गौरी पीतिका मेहघातिनी ॥२१३॥
वेश्या विटप्रियाः पिङ्गा हरिता च तरिङ्गणी ।

हरि—पीतवर्णं द्राति—गच्छति **हरिद्रा**, तस्याम् । वर्णो विद्यतेऽस्या **वर्णवती** । काञ्चनवर्णत्वात् **काञ्चनी** वर्णेन पीतेयम् । वरो वर्णोऽस्त्यस्या **वरवर्णिनी** । निशाया आख्या अस्या **निशाख्या**, रात्रिपर्यायेत्यर्थः । "रञ्जीं रागे" रज्यते अनया **रजनिः**, "रञ्जेः कित्" [हैमोणादिसू० ६८१] इति किदनिः । **गौरी** वर्णेन । पीतो वर्णोऽस्त्यस्याः **पीतिका**, "अतोऽनेकस्वरात्" [सिद्ध० ७. २. ६] इतीकः । मेहस्य—प्रमेहस्य घातिनी **मेहघातिनी** ॥२१३॥

वेश्येव **वेश्या** । अत एव विटानां प्रिया **विटप्रिया** । **पिङ्गा हरिता** च वर्णेन । तरङ्गाः सन्त्यस्यां **तरङ्गिणी** । आह च—

हरिद्रा पीतिका पिङ्गा रजनी रञ्जनी निशा ।
गौरी वर्णवती पीता हरिता वरवर्णिनी ॥

---

१ °क्याममला बहुपुत्रा वितुन्नकः । तामलक्युज्झटा ज्ञायतालिका नुन्नमालिनी ॥२१२॥ नि० ॥
२ "अथ वितुन्नकः ॥ झटाऽमलाऽज्झटा ताली शिवा तामलकीति च । "इत्यमरः [का० २ वर्ग ४ श्लो० १२६-२७] ॥ ३ °या पीता तथा हट्टविलासिनी । नि० ॥ ४-५ पिण्डा प्रतौ पाठः ॥

हलदी हलना श्रेष्ठा ज्ञेया वर्णविलासिनी ।
विषघ्नी च जयन्ती च दीर्घरक्ता सुरङ्गिणी ॥
[धन्व० वर्ग १ श्लो० ५४–५५] इति ।

हरिद्रानामानि । लोके तु 'हलद्र' इति प्रसिद्धिः ।

प्रपुनाटे तु दद्रुघ्नश्चक्रहश्चक्रमर्दकः ॥२१४॥
मेषाक्षो मेषकुसुमः पद्माटैडगजावपि ।

प्रपुणति प्रपुनाति वा **प्रपुनाटः**, "कपाट-" [हैमोणादिसू० १४८] इत्याटे निपात्यते, तत्र । दद्रुं हन्ति **दद्रुघ्नः** । चक्राणि–दद्रुमण्डलानि हन्ति **चक्रहः**, "क्वचित्" [सिद्ध० ५. १. १७१] इति डः । चक्राणि मृद्नाति **चक्रमर्दकः** ॥२१४॥

मेषवद् अक्षीण्यस्य **मेषाक्षः** उरणाक्षः । मेषाकाराणि कुसुमान्यस्य **मेषकुसुमः** । पद्मवद् आटयति **पद्माटः** । एडवन्मेषाकृतित्वाद् गज्यते–शब्द्यते **एडगजः** । आहुश्च—

चक्रमर्दः स्मृतश्चक्री प्रपुनाटश्च नामतः ।
एकरेणो दद्रुहरो मेषाक्षैडगजावपि ॥
[ ] इति ।

तथा च—

चक्रमर्दस्त्वेडगजो मेषाक्षाऽण्डगजः स्मृतः ।
प्रपुनाटः प्रपुनटश्चक्री त्वाऽऽवर्तकः स च ॥
[धन्व० वर्ग ४ श्लो० ५] इति ।

[प्रपुनाटनामानि] । एतस्य लोके 'पमाड' इति प्रसिद्धिः ।

मुण्डयां मुण्डनिका भिक्षुः श्रावणी जीवबोधनी ॥२१५॥
श्रवणा श्रवणशीर्षा प्रव्रजिता तपस्विनी ।

मुण्ड्यते **मुण्डी**, तस्याम् । मुण्डनं विद्यतेऽस्याः **मुण्डनिका**, "अतोऽनेकस्वरात्" [सिद्ध० ७. २ ६] इतीकः । भिक्षणशीला **भिक्षुः**, "सन् भिक्षा-" [सिद्ध० ५. २. ३३] इत्युः । श्रवणानामियं **श्रावणी**, "तस्येदम्" [सिद्ध० ६. ३. १६०] इत्यण् । जीवान् बोधयति **जीवबोधनी** ॥२१५॥

---

१ प्रपुन्नाटे नि० ॥ २ °श्चक्राकश्चक्र° नि° ॥

श्रूयते **श्रवणा**, "तृ-कृ-शृ-" [हैमोणादिसू० १८७] इत्यणः। श्रवणानां शीर्षमिव **श्रवणशीर्षा**। प्रव्रियते (? प्रव्रज्यते) **प्रव्रजिता**। तपो विद्यतेऽस्याः **तपस्विनी**। आह च—

श्रावणी स्यान्मुण्डनिका भिक्षुः श्रवणशीर्षिका।
श्रवणाह्वा प्रव्रजिता परिव्राजी तपोधना॥
[धन्व० वर्ग १ श्लो० १५९]

श्रावणी श्राविता पूर्वं **गालवेन** महात्मना।
आत्रेयस्त्वैषिका चोक्ता छिन्नग्रन्थनिका च सा।
[ ] इति।

मुण्डीनामानि। लोके तु 'मोडथेरी' इति प्रसिद्धिः।

महाश्रावणिकायां तु व्यथा कदम्बपुष्पिका॥२१६॥
ग्रन्थिका लोचनीया च छिन्नग्रन्थनिकाऽपि च।

महती चासौ श्रावणिका च **महाश्रावणिका**, तस्याम्। व्यथते इति **व्यथा**। कदम्बस्येव पुष्पाण्यस्याः कदम्बपुष्पी, के **कदम्बपुष्पिका**॥२१६॥

ग्रन्थिरत्रास्ति **ग्रन्थिका**, व्रीह्यादित्वादिकः। लोच्यते इति **लोचनीया**। छिन्ना चासौ ग्रन्थनिका च **छिन्नग्रन्थनिका**। आह च—

महाश्रावण्यथाऽन्या तु लोचनीया तथाऽपरा।
कदम्बपुष्पिका चोक्ता छिन्नग्रन्थनिका च सा॥
[धन्व० वर्ग १ श्लो० १६०] इति।

एतस्या लोके 'महामुण्डी' इति प्रसिद्धिः।

वाकुच्यां स्यात् कालमेषी दुर्गन्धा कुष्ठनाशनी॥२१७॥
पूतिपर्णी सोमराजी सुवल्ली सोमवल्लिका।
अवल्गुजः कृष्णफलीन्दुलेखा पूतिफल्यपि॥२१८॥

"वातं सङ्कोचयति" इति वचनाद् **वाकुची**, पृषोदरादित्वात्, तस्याम्। कालेन मिष्यते—शब्यते (? शब्द्यते) **कालमेषी**, कृष्णफलत्वात्। दुष्टो गन्धोऽस्या **दुर्गन्धा**। कुष्ठं नाशयति **कुष्ठनाशनी**॥२१७॥

पूतीनि पर्णान्यस्याः **पूतिपर्णी**, "पाक-कर्ण-पर्ण-" [सिद्ध० २.४.५५] इति ङीः। सोमेन—आह्लादनेन राजते **सोमराजी**। शोभना वल्ली **सुवल्ली**। सोमस्य

१ त्वव्यथा नि०॥ २ लोभनीया नि०॥ ३ कृष्णफला दुर्लेखा नि०॥

वल्लिका **सोमवल्लिका** । अवल्गोः—अरम्याज्जातो **अवल्गुजः** । कृष्णानि फलान्यस्याः **कृष्णफली** । इन्दोर्लेखेव **इन्दुलेखा** । पूतिः फलेषु अस्याः **पूतिफली**, "पाक-कर्ण-पर्ण-पुष्प-फल-मूल-वालोत्तरपदाच्च" इति **पाणिनीय**[४.१.६४]सूत्रेण ङीष् । यदाह—

अवल्गुजः सोमराजी सुवल्लिः सोमवल्लिका ॥
कालमेषी कृष्णफला बाकुची पूतिफल्यपि ।

[अमर० का० २ वर्ग ४ श्लो० ९५–९६] इति ।

तथा च—

बाकुची सोमराजी च सोमवल्ली सुवल्ल्यपि ।
अवल्गुजः कृष्णफली सैव पूतिफली मता ॥
चन्द्रलेखेन्दुलेखा च शशिलेखा च सा मता ।
पूतिपर्णी कालमेषी दुर्गन्धा कुष्ठनाशनी ॥

[धन्व० वर्ग १ श्लो० १६५–६६] इति ।

बाकुचीनामानि । लोके तु 'बाबची' इति प्रसिद्धिः ॥२१८॥

रास्नायां श्रेयसी रस्या रसनाऽतिरसा रसा ।
एलापर्णी गन्धमूला सुवहा मारुतापहा ॥२१९॥

रसत्यनया रस्यते वा **रास्ना**, "रसेर्वा" [हैमोणादिसू० २६०] इति विकल्पेन णित् नः, तस्याम् । **श्रेयसी** श्रेष्ठा । रस्यते इति **रस्या** । रस्यते **रसना** । रसमतिक्रान्ता **अतिरसा** । रस्यते **रसा** । एलावत् पर्णान्यस्याः **एलापर्णी**, "पाक-कर्ण-पर्ण" [सिद्ध० २. ४. ५५] इति ङीः । गन्धो मूलेऽस्या **गन्धमूला** । सुष्ठु वहति **सुवहा** । मारुतमपहन्ति **मारुतापहा** । आह च—

रास्ना युक्तरसा रस्या श्रेयसी रसना रसा ।
सुगन्धमूलाऽतिरसा सैव युक्तरसा स्मृता ॥

[धन्व० वर्ग १ श्लो० २७०] इति ।

रास्नानामानि । लोके तु 'राठ' इति प्रसिद्धिः ॥२१९॥

नाकुल्यां सर्पगन्धा सुगन्धा चीरितपत्रिका ।

१ °न्धा तु सुगन्धा वारिपत्रका नि० ॥

नकुलानामियं **नाकुली**, प्रियत्वात्, "तस्येदम्" [सिद्ध०६.३. १६०] इत्यण्, तस्याम्। सर्प इव गन्धोऽस्याः **सर्पगन्धा**। शोभनो गन्धोऽस्याः **सुगन्धा**। चीरितानि पत्राण्यस्याः **चीरितपत्रिका**। यदाह—

नाकुली सुरसौ नागसुगन्धा गन्धनाकुली ॥
नकुलेष्टा भुजङ्गाक्षी छत्राकी सुवहा च सा।

[अमर० का०२ वर्ग ४ श्लो० ११४-१५] इति।

नाकुलीनामानि। लोके तु 'नउली' इति प्रसिद्धिः।

गन्धनाकुलिकायां तु सर्पाक्षी विषमर्दनी[1] ॥२२०॥
महासुगन्धा सुवहा छत्राकी नकुलप्रिया।

गन्धोपलक्षिता नाकुलिका **गन्धनाकुलिका**, तस्याम्। सर्पस्येव अक्षीण्यस्याः **सर्पाक्षी**। विषं मृद्नाति **विषमर्दनी** ॥२२०॥

महती चासौ सुगन्धा च **महासुगन्धा**। सुष्ठु वहति **सुवहा**। छत्रमकति—याति **छत्राकी** छत्राभपत्रा। नकुलानां प्रिया **नकुलप्रिया**। आह च—

अन्या महासुगन्धा तु सुवहा गन्धनाकुली।
सर्पाक्षी नकुलेष्टा च छत्राकी विषमर्दनी ॥

[धन्व० वर्ग ४ श्लो० १०५] इति।

एतस्या लोके 'गन्धनउली' इति प्रसिद्धिः। नाकुलीभेदोऽयम्।

कुठेरके त्वर्जकः स्यात् क्षुद्रपत्रः कठिञ्जरः[2] ॥२२१॥
वैकुण्ठस्तीक्ष्णगन्धश्च

कुठिः सौत्रः, कुण्ठति कुठेरः, "कु-गु-पति-कथि-" [हैमोणादिसू० ४३१] इति किद् एरः प्रत्ययः, स्वार्थिके के **कुठेरकः**, तत्र। अर्जयति **अर्जकः**, णकः। क्षुद्राणि पत्राण्यस्य **क्षुद्रपत्रः**। कठिनं जारयति **कठिञ्जरः**, पृषोदरादित्वात् ॥२२१॥

विकुण्ठाया अयं **वैकुण्ठः**, "तस्येदम्" [सिद्ध० ६.३. १६०] इत्यण्। तीक्ष्णो गन्धोऽस्य **तीक्ष्णगन्धः**।

---

१ °सा रास्ना सुग° इति अमरकोशे पाठः॥ २ विषमर्दिनी नि०॥ ३ कुठिञ्जरः नि०॥

द्वितीयो वटपत्रकः ।

पर्णासो बिल्वगन्धश्च

'द्वितीयः' अपरः कुठेरकः वटपत्राणीव पत्राण्यस्य [वटपत्रः, के] **वटपत्रकः** । पर्णैः असति—दीप्यते **पर्णासः** । बिल्व इव गन्धोऽस्य **बिल्वगन्धः** ।

स तु कृष्णः करालकः ॥२२२॥

कालतालः कृष्णमल्ली मालुकः कृष्णमालुकः ।

'तुः' पुनरर्थे । 'सः' कुठेरकः' कृष्णः' श्यामः करोति करालः , "ऋ-कृ-मृ-" [हैमोणादिसू० ४७५] इत्यालः, स्वार्थिके के **करालकः** ॥२२२॥

कालं ताडयति **कालतालः**, ऋफिडादित्वाल्लत्वम् । कृष्णा चासौ मल्ली च **कृष्णमल्ली** । मलते **मालुकः**, "कन्चुकांशुक-" [हैमोणादिसू० ५७] इत्युके निपात्यते । कृष्णश्चासौ मालुकश्च **कृष्णमालुकः** । आह च—

कुठेरकस्तु वैकुण्ठः क्षुद्रपत्रोऽर्जकः सितः ।
वटपत्रः कुठेरोऽन्यः पर्णासो बिल्वगन्धकः ॥
कुठेरकस्तृतीयोऽन्यो मालुकः कृष्णमालुकः ।
कृष्णार्जकः कालतालः करालः कृष्णमल्लिकः ॥

[धन्व० वर्ग० ४ श्लो० ५४, ५६] इति ।

त्रयोऽपि कुठेरकभेदाः । एषां लोके 'आजऊ' इति प्रसिद्धिः ।

तुलस्यां सुरसाऽऽपीता राक्षसी बहुमञ्जरी ॥२२३॥
ग्राम्या गौरी शक्रपत्नी भूतघ्नी देवदुन्दुभिः ।

'तुलण् उन्माने" तोल्यते **तुलसी**, "फनस-" [हैमोणादिसू० ५७३] इत्यसे निपात्यते । शोभनो रसोऽस्याः **सुरसा** । आपीयते रसोऽस्याः **आपीता** । रक्षसामियं **राक्षसी** । बह्व्यः मञ्जर्योऽस्याः **बहुमञ्जरी** ॥२२३॥

ग्रामे भवा **ग्राम्या**, "भवे" [सिद्ध० ६.३. १२३] इति यः; ग्रामे साध्वी वा, 'तत्र साधौ" [सिद्ध० ७.१.१५] इति यः । गूयते **गौरी**, "खुर-क्षुर-" [हैमोणादिसू० ३९६] इति रे निपात्यते । शक्रस्य पत्नीव **शक्रपत्नी** । भूतानि हन्ति **भूतघ्नी** । देवानां दुन्दुभिरिव **देवदुन्दुभिः** । आह च—

---

१ सरालकः नि० ॥ २ काकतालः नि० ॥ ३ प्सा प्रेतराक्षसी नि० ॥ ४ यस्या गौरी नि० ।

सुरसा तुलसी ग्राम्या तुलसी बहुमञ्जरी ।
आपीता राक्षसी गौरी भूतघ्नी देवदुन्दुभिः ॥
[धन्व० वर्ग० ४ श्लो० ५०] इति ।

तुलसीनामानि । लोके तु 'तुलछी' इति प्रसिद्धिः ।

फणिज्जकेऽरिचकः खरपत्रोऽल्पपत्रकः ॥२२४॥
मरूबको मरुबको जम्भीरो मारुतः फणी ।

फणाभवर्णत्वाद् देश्यः **फणिज्जकः**, तत्र । म्रियते अनेन मरिचः, "मृ-त्रपि-भ्यामिचः" [हैमोणादिसू० ११७] इति इचः प्रत्ययः, स्वार्थिके के **मरिचकः** । खराणि पत्राण्यस्य **खरपत्रः** । अल्पं—तुच्छं पत्रमस्य अल्पपत्रः, के **अल्पपत्रकः** ॥२२४॥

मरौ बक इव **मरूबकः**, पृषोदरादित्वाद् दीर्घः; पक्षे **मरुबकः** । "जमू अदने" जम्यते **जम्भीरः**, "जम्भीरा-ऽऽभीर-" [हैमोणादिसू० ४२२] इतीरे निपात्यते । **जम्बीरोऽपि** । मरुदेव **मारुतः**, प्रज्ञादित्वादण् । फणाः सन्त्यस्य **फणी** । आह च—

जम्बीरः खरपत्रश्च फणी चोक्तः फणिज्जकः ।
मरूबको मरुबको मरुन्मरिचकस्तथा ॥
[धन्व० वर्ग ४ श्लोक० ५२] इति ।

मरुबकनामानि । लोके तु 'मरुअउ' इति प्रसिद्धिः ।

त्रायमाणायां त्रायन्ती कृतत्राणाऽद्रिसानुजा ॥२२५॥

वार्षिकं बदरा घृष्टिर्वाराही बलभद्रिका ।
बलदेवी जुहूस्त्राणा विष्वक्सेनप्रियाऽपि च ॥२२६॥

त्रायते **त्रायमाणा**, तस्याम् । "आत्मनेपदमनित्यम्" इति न्यायात् शतृप्रत्यये **त्रायन्ती** । कृतं त्राणमनया **कृतत्राणा** । अद्रिसानौ जाता **अद्रिसानुजा** ॥२२५॥

वर्षासु भवं **वार्षिकम्** । 'बद स्थैर्ये" बदति **बदरा**. "ऋच्छि-चटि-वटि-" [हैमोणादिसू० ३९७] इत्यरः । घृष्यतेऽनया **घृष्टिः**, "स्त्रियां क्तिः" [सिद्ध० ५.३.९१] इति क्तिः । वराहस्येयं **वाराही**, "तस्येदम्" [सिद्ध० ६.३. १६०] इत्यण् ।

---

१ ° ज्जके प्रस्थपुष्पः खरपत्रोऽत्रपत्रकः नि०॥ २ त्रायन्ती त्रायमाणायां कृतत्राणाऽद्रिघ्रसानुजा नि ॥ ३ °वा···सुत्राणा नि० ॥

बलेन भद्रमस्याः बलभद्रा, स्वार्थिके के **बलभद्रिका** । बलेन दीव्यति **बलदेवा** । जुह्वत्यनया **जुहूः**, "दिद्युद्दद्द-" [सिद्ध० ५.२. ८३] इति क्विपि साधुः । त्रायते स्म **त्राणा**, "ऋ-ह्री-घ्रा-" [सिद्ध० ४.२. ७६] इति क्तस्य नत्वम् । विष्वक्सेनस्य प्रिया **विष्वक्सेनप्रिया** । आह च—

त्रायमाणा कृतत्राणा त्रायन्ती त्रायमाणिका ।
बलभद्रा बलदेवा वार्षिकं गिरिसानुजा ॥

[धन्व० वर्ग १ श्लो० २५४] इति ।

त्रायमाणानामानि । लोके तु 'त्रायमाण' इति प्रसिद्धिः ॥२२६॥

यवासके धन्वयासो यासो धन्वयवासकः ।
वीरमूलो दीर्घमूलो बालपत्रो मरूद्भवः ॥२२७॥

अधिकण्टकः कुनाशस्ताम्रमूली प्रतोदनी ।
दुःस्पर्शा कच्छुराऽनन्ता समुद्रान्ता दुरालभा ॥२२८॥

"युक्त मिश्रणे" यौति यवासः, "यु-बलिभ्यामासः" [हैमोणादिसू० ५७४] इत्यासः, स्वार्थिके के **यवासकः**, तत्र । **धन्वयासो मरूद्भवत्वात्** । याति—प्रसरति **यासः**, "मा-वा-वद्यमि-" [हैमोणादिसू० ५६४] इति बहुवचनात् सः । धन्वनो यवासको **धन्वयवासकः** । वीरं मूलमस्य **वीरमूलः** । दीर्घं मूलमस्य **दीर्घमूलः** । बाल इव पत्राण्यस्य **बालपत्रः** । मरुषु उद्भवति **मरूद्भवः** ॥२२७॥

अधिकानि कण्टकान्यस्य **अधिकण्टकः** । कुं—पृथ्वीं नाशयति **कुनाशः**, कण्टकित्वात् । ताम्रं मूलमस्यास्**ताम्रमूली** । प्रतोद्यते **प्रतोदनी** । दुष्टः स्पर्शोऽस्याः **दुःस्पर्शा** । कच्छुरोगं राति—ददाति **कच्छुरा**, पृषोदरादित्वात् । नास्ति अन्तोऽस्या **अनन्ता** । अत एव **समुद्रान्ता** च, दूरव्याप्तेः । कृच्छ्रेण लभ्यते—स्पृश्यते **दुरालभा** । आह च—

यासो यवासकोऽनन्ता बालपत्रोऽधिकण्टकः ।
वीरमूलः समुद्रान्ता दीर्घमूलो मरूद्भवः ॥
धन्वयासो दुरालम्भा ताम्रमूली च कच्छुरा ।
दुरालभा च दुःस्पर्शा यासो धन्वयवासकः ॥

[धन्व० वर्ग १ श्लो० २२, २०] इति ।

---

१ दूरमूलो नि० ॥ २ कुनाशकोऽधिष्टकण्टस्ताम्रमूली प्रचोदनः । दुःस्पर्शः क० नि० ॥

[यवासकनामानि] । एतस्य लोके 'जवासउ' इति प्रसिद्धिः । **धन्वन्तरिस्तु** भेदमाह—धन्वयास इत्यादिकस्य लोके 'धमासउ' इति प्रसिद्धिरिति ॥२२८॥

किराततिक्ते कैरातो रामसेनः किरातकः ।
अनार्यतिक्तको हैमो भूनिम्बः काण्डतिक्तकः ॥२२९॥

किरातदेशे भवस्तिक्तो रसः **किराततिक्तः**, तत्र । किरातदेशे भवः **कैरातः** । रामा सेनाऽस्य **रामसेनः** । किरति रोगान् किरातः. "कृ-वृ-कल्यलि-" [हैमोणादिसू० २०९] इत्यातक्, स्वार्थिके के **किरातकः** । अनार्यस्य तिक्तः अनार्यतिक्तः, के **अनार्यतिक्तकः** । हिमस्यायं **हैमः**, "तस्येदम्" [सिद्ध० ६.३.१६०] इत्यण्, शीतलत्वात् । भुवि निम्ब इव **भूनिम्बः** । काण्डः—कुत्सितश्चासौ तिक्तश्च काण्डतिक्तः, के **काण्डतिक्तकः** । आह च—

किराततिक्तको हैमः काण्डतिक्तः किरातकः ।
भूनिम्बोऽनार्यतिक्तश्च कैरातो रामसेनकः ॥
कैडर्यः पिचुमन्दश्च निम्बो रिष्टो वरत्वचः ।
छर्दनो हिङ्गुनिर्यासः प्रियमालश्च पर्वतः ॥
नेपालः कथितश्चान्यो जात्यश्चैष ज्वरान्तकः ।
नाडीतिक्तोऽर्द्धतिक्तश्च निद्रारिः सन्निपातहा ॥

[धन्व० वर्ग १ श्लो० ३३–३५] इति ।

किरातनामानि । लोके तु 'किरायता' इति प्रसिद्धिः ॥२२९॥

कुष्ठे तु पाकलं रामं वानीरं वाप्यमुत्पलम् ।
वानीरेजं पारिभव्यं कौरव्यं व्याधिनामकम् ॥२३०॥

कुष्णाति **कुष्ठम्**, "कुषेर्वा" [हैमोणादिसू० १६४] इति विकल्पेन कित् ठः, पुं-क्लीबलिङ्गः, तत्र । **पाकलं** व्याधित्वात्; पाकं लाति वा, "क्वचित्" [सिद्ध० ५. १. १७१] इति डः । रमते **रामम्**, " वा ज्वलादि-" [सिद्ध० ५.१. ६२] इति णः, क्लीबलिङ्गः । "वन सम्भक्तौ" वन्यते **वानीरम्**, "वनि-वपिभ्यां णित्" [हैमोणादिसू० ४२१] इति णिदीरः । वाप्यां भवं **वाप्यम्**, "भवे" [सिद्ध० ६. ३. १२३] इति यः । **व्याप्यमित्येके** । **उत्पलं** दाहह्रत्त्वात्, उत्पलपुष्पत्वाद्वा ।

---

१ °रजं वापिभाव्यं कौरवं नि० ॥

वानीरे जातं **वानीरजम्** । पारिषु—तोयाशयेषु भवति **पारिभव्यम्**, "भव्य-गेय-" [सिद्ध० ५. १. ७] इति साधुः । कुरौ भवं **कौरव्यम्**, पृषोदरादित्वात् । व्याधेर्नामास्य **व्याधिनामकम्** । यदमरः—

व्याधिः कुष्ठं पारिभव्यं व्याप्यं पाकलमुत्पलम् ।
वाप्यं वानीरजं रामं कौबेरं पारिभव्यकम् ॥
[का० २ वर्ग ४ श्लो० १२६] इति ।

तथा च—

कुष्ठं रोगो गदो व्याधिरुत्पलं पाकलं रुजा ।
[धन्व० वर्ग० ३ श्लो० ४९] इति ।

कुष्ठनामानि । लोके तु 'उपलोठ' इति प्रसिद्धिः ॥२३०॥

वालके जल-केशाख्यं बर्हिष्ठं दीर्घरोमकम् ।
ह्रीबेरोदीच्य वज्राणि पिङ्गमाचमनं कचम् ॥२३१॥

"वाडृङ् आप्लावे" वाडते वालम, ऋफिडादित्वाद् डस्य लः; वलति वा, "वा ज्वलादि-" [सिद्ध० ५.१.६२] इति णः, स्वार्थिके के **वालकम्**, पुं-क्लीबलिङ्गः, तत्र । 'जल-केशाख्यम्' इति जल-केशयोराख्या—नामाऽस्य **जलाख्यं केशाख्यं** च, तेन **नीरं वारी**त्यादि, **केश** इत्यादि । बर्हते—वर्धते **बर्हिष्ठम्**, "पष्ठैधिठादयः" [हैमोणादिसू० १६६] इति ठे निपात्यते । दीर्घाणि रोमाण्यस्य **दीर्घरोमकम्** । जिह्रेतीव **ह्रीबेरम्**, "शतेरादयः" [हैमोणादिसू० ४३२] इति केरे निपात्यते । उदीचि भवं **उदीच्यम्** । "वज गतौ" वजति **वज्रम्**, "भी-वृधि-" [हैमोणादिसू० ३८७] इति रः, पुं-क्लीबलिङ्गः । पीयते **पिङ्गम्**, "स्फुलि-कलि-" [हैमोणादिसू० १०२] इतीङ्गक् । "चमू अदने" आचम्यते **आचमनम्** । "कचि बन्धने" कचते **कचम्**, अच् । आहामरः—

वालं ह्रीबेर-बर्हिष्ठोदीच्यं केशा-ऽम्बुनाम च ।
[का० २ वर्ग ४ श्लो० १२२] इति ।

तथा च—

वालकं वारि तोयं च ह्रीबेरं जलमम्बु च ।
केशं वज्रमुदीच्यं च पिङ्गमाचमनं कचम् ॥
[धन्व० वर्ग १ श्लो० ४७] इति ।

---

१ रुचम् नि० ॥

हूबेरनामानि। लोके तु 'वालउ' इति प्रसिद्धिः ॥२३१॥

शटयां पलाशः षड्ग्रन्था गन्धोली हिमजा वधूः।
कर्चूरः सुव्रता गन्धमूली पृथुपलाशिका ॥२३२॥

"शट रुजा-विशरण-गत्यवसादनेषु" शटति **शटी**, अचि ङीः। केचित् **षटी**ति मूर्द्धन्यादिमाहुः, **शढी**त्यपि, तस्याम्। पलाशाः सन्त्यस्य **पलाशः**, अभ्रादित्वादः। षड् ग्रन्थयोऽस्याः **षड्ग्रन्था**। गन्धयति–अर्दयति **गन्धोली**, "पिच्छोल-कल्लोल-" [हैमोणादिसू० ४९५] इत्योले निपात्यते। हिमे जाता **हिमजा**। उह्यते **वधूः**, "वहेर्धूः च" [हैमोणादिसू० ८३२] इत्यूः। करोति **कर्चूरः**, "सिन्दूर-कर्चूर-" [हैमोणादिसू० ४३०] इत्यूरे निपात्यते। शोभनो(?नं) व्रतो(?तम)ऽस्याः **सुव्रता**। गन्धयुक्तं मूलमस्याः **गन्धमूली**। पृथ्वी चासौ पलाशिका च **पृथुपलाशिका**। आह च—

शटी षटी पलाशः स्यात् ज्ञेया पृथुपलाशिका।
सुगन्धमूला गन्धोली षड्ग्रन्था सुव्रता वधूः॥
[धन्व० वर्ग १ श्लो० ६१] इति।

शटीनामानि। लोके तु 'शढि' इति प्रसिद्धिः ॥२३२॥

एलावालुके त्वैलेयं वालुकं हरिवालुकम्।
सुगन्ध्यालुकमेल्वालं दुर्वर्णं प्रसरं दृढम् ॥२३३॥

एलावद् वलते **एलावालुकम्**, "कञ्चुकांशुक-" [हैमोणादिसू० ५७]इत्युके साधुः, तत्र। एलाया इदम् **ऐलेयम्**, "तस्येदम्-" [सिद्ध० ६.३. १६०] इत्येयण्। वलते **वालुकम्**, "कञ्चुकांशुक-" [हैमोणादिसू० ५७] इत्युके साधुः। हरि–पिङ्गं वालुकं **हरिवालुकम्**। शोभनौ गन्धोऽस्येति **सुगन्धि**, "सु-पूत्युत्सुरभेर्गन्धादिद् गुणे" [सिद्ध० ७.३. १४४] इति समासान्त इत्। "ऋंक् गतौ" इयर्त्ति आलु, "ऋं प्रापणे च" ऋच्छति वा "ऋ-तॄ-शॄ-" [हैमोणादिसू० ७२७] इति णिदुः रकारस्य लत्वं च, स्वार्थिके के **आलुकम्**। पृषोदरादित्वाद् दीर्घे **आलूकमपि**। एलावद् वलते **एल्वालम्**, पृषोदरादित्वात्। दुष्टो वर्णोऽस्य **दुर्वर्णम्**। प्रसरति–वर्धते **प्रसरम्**। **दृढं** स्थिरम्। आह च—

एलावालुकमालूकं वालुकं हरिवालुकम्।

---

१ गन्धाली ।न० ॥ २ °थुफला ° नि० ॥ ३ °ल्वालु दु°नि० ॥

एल्वालकं कपित्थं च दुर्वर्णं प्रसरं दृढम् ॥

[धन्व० वर्ग ३ श्लो० ७६] इति ।

एतस्य लोके 'एलीयउ' इति प्रसिद्धिः ॥२३३॥

कुङ्कुमे रक्तपर्यायं सङ्कोचपिशुनं वरम् ।
धीरं कुसुम्भं घुसृणं पीतं वाल्हीक-पीतने ॥२३४॥
कश्मीरजं वह्निशिखं वर्णं लोहितचन्दनम् ।

"कुकि वृकि आदाने" कुक्यते **कुङ्कुमम्**, "कुन्दुम-लिन्दुम-" [हैमोणादिसू० ३५२] इत्युमे निपात्यते, क्लीबलिङ्गोऽयम् । **वाचस्पतिस्तु** 'निदाघेऽपि कुङ्कुमः सुखः स्यात्" इति पुंस्याह, तत्र । रक्तपर्यायं **रक्तारुयम्** । सङ्कोचस्य पिशुनं—सूचकं **सङ्कोचपिशुनम्** । **सङ्कोचं पिशुनं** चेति द्वे नाम्नी **इत्यन्ये** । व्रियते **वरम्**, "युवर्ण-" [सिद्ध० ५.३. २८] इत्यल् । **धीरं** स्थिररागम्, धीयते **धीरम्**, "इण्-धाग्भ्यां वा" [हैमोणादिसू० ३८९] इति कित् रः । "कुसच् श्लेषे" दन्त्यान्तः, कुस्यते **कुसुम्भम्**, "का-कुसिभ्यां कुम्भः" [हैमोणादिसू० ३३७] इति किदुम्भः । घुष्यते अनेनाङ्गं घुंषते—कान्तिं करोति वा **घुसृणम्**, "भूण-तृण-" [हैमोणादिसू० १८६] इति णे निपात्यते । **देश्यामप्ययम्** । पीयते स्म **पीतम्**, पीतयति वा । वाल्हीकेषु जातं **वाल्हीकम्**, "कोपान्त्यात्-" [सिद्ध० ६.३. ५६] इत्यण् । **वाल्हिकमपि** । पीतयत्यङ्गं **पीतनम्** ॥२३४॥

कश्मीरेषु जातं **कश्मीरजम्** । वह्नेरिव शिखा—केसरोऽस्य **वह्निशिखम्** । वर्ण्यते **वर्णम्**, अल् प्रत्ययः; व्रियते वा, "इणुर्विशा-वेणि-" [हैमोणादिसू० १८२] इति णः, क्लीबलिङ्गः । **वर्ण्यमपि** । लोहितं चन्दनमिव **लोहितचन्दनम्** । आह च—

कुङ्कुमं रुधिरं रक्तमसृगस्रं च पीतकम् ।
काश्मीरं चारु वाल्हीकं सङ्कोचं पिशुनं वरम् ॥

[धन्व० वर्ग ३ श्लो० १२] इति ।

[कुङ्कुमनामानि ।] एतस्य लोके 'केसर' 'कुङ्कुम' इति वा प्रसिद्धिः ।

जात्यां तु रजनिः पुष्पा मालती तैलभाविनी ॥२३५॥
प्रियंवदा हृद्यगन्धा मनोज्ञा सुमना लता ।

१°नं शुकम् । हीरं नि० ॥ २ वरं लों° नि० ॥

जायते अस्यां पुष्पादि **जातिः**, "स्त्रियां क्तिः" [सिद्ध० ५.३. ९१] इति क्तिः, तस्याम् । रज्यति **रजनिः**, "रञ्जेः कित्" [हैमोणादिसू० ६८१] इति किदनिः । पुष्पति **पुष्पा** । मालयत्यामोदै**र्मालती**, "पुत-पित्त-" [हैमोणादिसू० २०४] इति ते निपात्यते । तैलं भावयति **तैलभाविनी** ॥२३५॥

प्रियं वदति **प्रियंवदा** । हृद्यो गन्धोऽस्या **हृद्यगन्धा** । **[मनोज्ञा]** मनोहरा । सुष्ठु मन्यते **सुमना** । लाति लायते वा **लता**, "पृषि रञ्जि-" [हैमोणादिसू० २०८] इति किदतः । आह च—

जाती मनोज्ञा सुमना राजपुत्री प्रियंवदा ।
मालती हृद्यगन्धा च वेतिका तैलभाविनी ॥
[धन्व० वर्ग ५ श्लो० १३७] इति ।

जातीनामानि । लोके तु 'जाइ' इति प्रसिद्धिः ।

तस्यास्तु कलिकायां स्यात् पत्त्री सौमनसायनी ॥२३६॥

'तुः' पुनरर्थे । 'तस्याः' जात्याः कलिकायां स्यात् पतति **पत्त्री**, "नीदाव्-" [सिद्ध० ५.२.८८] इति त्रट् । सुमनसामियं **सौमनसायनी** ॥२३६॥

जातीफले जातिकोशं शालूकं मालतीफलम् ।
मज्जसारं जातिसूतं शौण्डं सौमनसं पुटम् ॥२३७॥

जात्याः फलं **जातीफलम्**, ङ्यां प्रयोगदर्शनात्, तिगन्तोऽप्ययम् इति स्त्युक्ता इति न सिध्यति, तत्र । **जातिफल**मित्यपि । जातीलतायाः कोशं **जातिकोशम्**, जातिसस्याख्यम् । **जाति**रित्यपि । "शल गतौ" शलति **शालूकम्**, "शल्यलेर्णित्" [हैमोणादिसू० ५९] इत्यूकः । मालत्याः फलं **मालतीफलम्** । मज्जनि सारोऽस्य **मज्जसारम्** । जात्याः सूतं **जातिसूतम्** । शौण्ड इव **शौण्डम्**, मदकर्तृत्वात् । सुमनसां—देवानामिदं **सौमनसम्**, "तस्येदम्" [सिद्ध० ६. ३. १६०] इत्यण् । "पुट लुटत् संश्लेषणे" पुटति **पुटम्**, "नाम्युपान्त्य-" [सिद्ध० ५.१.५४] इति कः, पुं-क्लीबलिङ्गः । आह च—

जातीफलं जातिसस्यं शालूकं मालतीफलम् ।
मज्जासारं जातिसूतं पुटं सौमनसं फलम् ॥
[धन्व० वर्ग ३ श्लो० ३५] इति ।

एतस्य लोके 'जाइफल' इति प्रसिद्धिः ॥ २३७ ॥

यूथिकायां बालपुष्पी मागधी गन्धयूथिका ।
गुणोज्ज्वला पुण्यगन्धा चारुमोटा शिखण्डिनी ॥२३८॥

अम्बष्ठा गणिका

यूयते—मिश्रीक्रियते यूथी, 'पथ-यूथ-" [हैमोणादिसू० २३१] इति थे निपात्यते, के **यूथिका**, यूथः—जालकमस्त्यस्यां वा, "अतोऽनेकस्वरात्" [सिद्ध० ७. २. ६] इतीकः, तस्याम् । बालानि पुष्पाण्यस्या **बालपुष्पी**, "असत्काण्ड-प्रान्त-" [सिद्ध० २. ४. ५६] इति ङीः । **मगधदेशे** भवा **मागधी**, "भवे" [सिद्ध० ६. ३. १२३] इत्यण्, "अणञेये-" [सिद्ध० २. ४. २०] इति ङीः । गन्धस्य यूथिका **गन्धयूथिका** । गुणैरुज्ज्वला **गुणोज्ज्वला** । पुण्यो गन्धोऽस्याः **पुण्यगन्धा** । चारुमा—प्रधानगन्धश्रीः तामटति **चारुमोटा**, पृषोदरादित्वात् । शिखण्डाः सन्त्यस्यां **शिखण्डिनी** ॥ २३८ ॥

अम्बे तिष्ठति **अम्बष्ठा**, "स्था-पा-स्ना-त्रः कः" [सिद्ध० ५. १. १४२] इति कः प्रत्ययः, गो-ऽम्बा-ऽम्ब-सव्य-" [सिद्ध० २. ३. ३०] इत्यादिना षत्वम् । गणयति **गणिका**, णके आप् , चित्ताकर्षणात् । आह च—

यूथिका बालपुष्पी च पुण्यगन्धा गुणोज्ज्वला ।
गणिका चारुमोटा च शिखण्डी
[धन्व० वर्ग ५ श्लो० १४८] इति ।

एतस्या लोके 'जूही' इति प्रसिद्धिः ।

सा तु पीता स्याद्धेमपुष्पिका ।

'सा' यूथिका 'पीता' पीतवर्णा हेमवर्णं पुष्पमस्या हेमपुष्पी, "असत्काण्ड-प्रान्तशतैकाच्चः पुष्पात्" [सिद्ध० २. ४. ५६] इति ङीः, स्वार्थिके के **हेमपुष्पिका** । आह च—

स्वर्णयूथिका ॥
यूथशालिनी [धन्व० वर्ग ५ श्लो० १४८–४९] इति ।

एतस्या लोके 'सुवर्णजूही' इति प्रसिद्धिः । इह प्रस्तावात् **शङ्खयूथिका**ऽपि ज्ञेया । आह च—

प्रोक्ताऽन्या शङ्खधवला नामतः शङ्खयूथिका ।
[धन्व० वर्ग ५ श्लो० १४९] इति ।

कुन्दे माघ्यः सदापुष्पी मकरन्दो मनोहरः ॥२३९॥
अट्टहासो भृङ्गमित्रं शाल्योदनोपमश्च सः ।

कुन्दति **कुन्दम्**, पृषोदरादित्वात् ; **कुन्द** इति माला, तत्र । माघे मासि भवो **माघ्यः**, "भवे" [सिद्ध० ६. ३. १२३] इति यः । सदा पुष्पाण्यस्याः **सदापुष्पी** । मङ्क्तचते—मण्डचते अनेन **मकरन्दः**, "कुमुद-" [हैमोणादिसू० २४४] इति उदे [प्रत्ययादेः अत्वे] निपात्यते । मनो हरति **मनोहरः** ॥ २३९ ॥

अट्टहास इव **अट्टहासः**, श्वेतत्वात् । भृङ्गस्य मित्रं **भृङ्गमित्रम्** । शाल्योदनेनोपमाऽस्य **शाल्योदनोपमः** । आह च—

कुन्दः सुमकरन्दश्च श्वेतपुष्पो मनोहरः ।
अट्टाट्टहासो भृङ्गस्तु शुक्लशाल्योदनोपमः ॥
[धन्व० वर्ग ५ श्लो० १५०] इति ।

एतस्य लोके 'कुन्द' इति प्रसिद्धिः ।

स्यान्नवमालिकायां तु[1] नेमाली वनमालिनी ॥ २४० ॥

सप्तला सुकुमाराऽतिसुरभिः शशिगन्धिका ।
कान्ता विभावरी ग्रीष्मा ग्रैष्मिका शिखरिण्यपि ॥२४१॥

नवा—स्तुत्या मालाऽस्या **नवमालिका**, तस्याम् । नेमस्य आलिरस्या **नेमाली** । वने मालते इत्येवंशीला **वनमालिनी** ॥२४०॥

सप्त—मनो बुद्धिमिन्द्रियाणि च लाति **सप्तला**; सपति—समवैति वा, "मुरलोरल-" [हैमोणादिसू० ४७४] इत्यले निपात्यते । सुतरां काम्यते **सुकुमारा**, "कमेरत उच्च" [हैमोणादिसू० ४०९] इत्यारः । **अतिसुरभिः**, अतिसौगन्ध्यात् । शशी—चन्द्रपर्यायत्वात् कर्पूरः, स इव गन्धोऽस्याः **शशिगन्धिका** । **कान्ता**, कमनीयत्वात् । विभातीति वनि प्रत्यये ङ्यां च **विभावरी** । "ग्रसूङ् ग्लसूङ् अदने" ग्रसते **ग्रीष्मा**, "रुक्म-ग्रीष्म-" [हैमोणादिसू० ३४६] इति मे निपात्यते; ग्रीष्मोत्पन्नत्वाद्वा । अत एव ग्रीष्मे भवा **ग्रैष्मिका**, "भवे" [सिद्ध० ६.३.१२३] इति इकण् प्रत्ययः । शिखरमस्त्यस्याः **शिखरिणी** । आह च—

---

१ °दनो यमश्वसः नि० ॥ २ तु मोमाली नवमालिनी ॥२४०॥ सप्तला सुकुरारातिः सुरतिः शिशुगन्धिका नि० ॥

ग्रीष्माऽतिसुरभिः कान्ता सुगन्धा वनमालिनी ।
सुकुमारा शिखरिणी नेमाली नवमालिका ॥
[धन्व० वर्ग ५ श्लो० १४०] इति ।

एतस्या लोके 'नीमाली' इति प्रसिद्धिः ॥२४१॥

मल्लिकायां शीतभीरुर्मदयन्ती प्रमोदनी ।
अष्टापदी तृणशूल्यं गवाक्षी भूपदीत्यपि ॥२४२॥

"मलि मल्लि धारणे" मल्ल्यते–ध्रियते मूर्ध्नि मल्लिः, "पदि-पठि-" [हैमोणादिसू० ६०७] इति इः, स्वार्थिके के **मल्लिका**; "दृ-कृ-नृ-" [हैमोणादिसू० २७] इत्यको वा, तस्याम् । शीताद् भीरुः **शीतभीरुः**, ग्रीष्मकत्वात् । मदयति **मदयन्ती**, शतृप्रत्ययः । प्रमोद्यतेऽनया **प्रमोदनी**, अनट् । अष्टौ पदान्यस्या **अष्टापदी**, "नाम्नि" [सिद्ध० ३.२.७५] इति दीर्घः । तृणशूले–गुल्मे साधु **तृणशूल्यम्** । गोरिव अक्षीण्यस्या **गवाक्षी** । भुवि पदमस्या **भूपदी** । आह च—

मल्लिका शीतभीरुश्च मदयन्ती प्रमोदनी ।
मदनीया गवाक्षी च भूपद्यष्टापदी तथा ॥
[धन्व० वर्ग ५ श्लोक १३४] इति ।

आह च(? तथा)—

तृणशूल्यं तु मल्लिका ॥
भूपदी शीतभीरुश्च
[अमर० का० २ वर्ग ४ श्लो० ६९-७०] इति ।

मल्लिकानामानि । लोके तु 'केवडी' इति प्रसिद्धिः ॥२४२॥

वार्षिक्यां षट्पदानन्दा श्रीमती सुभगा प्रिया ।
सुवर्षा त्रिपुटा त्र्यस्रा सुरूपा मुक्तबन्धनी ॥२४३॥

वर्षासु भवा **वार्षिकी**, "वर्षाकालेभ्यः" [सिद्ध० ६.३.८०] इतीकण्, तस्याम् । षट्पदानानन्दयति **षट्पदानन्दा** । श्रीर्विद्यतेऽस्याः **श्रीमती** । शोभनो भगोऽस्याः **सुभगा** । प्रीणाति **प्रिया**, "नाम्युपान्त्य-" [सिद्ध० ५.१.५४] इति कः । शोभनो वर्षोऽस्याः **सुवर्षा** । त्रीणि पुटान्यस्याः **त्रिपुटा** । त्रयः अस्राः

१ मुद्रितेऽमरे 'तृणशून्यं' इति पाठो दृश्यते ॥

अस्याः **त्र्यस्रा** । शोभनं रूपमस्याः **सुरूपा** । मुक्तं बन्धनमस्याः **मुक्तबन्धनी** । आह च—

वार्षिकी त्रिपुटा त्र्यस्रा सुरूपा सुभगा प्रिया ।
श्रीमती षट्पदानन्दा सुवर्षा मुक्तबन्धनी ॥
[धन्व० वर्ग ५ श्लोक १३६] इति ।

मल्लिकाविशेषोऽयम् ॥२४३॥

कुमार्यां कर्णिका चारुकेसरा भृङ्गसम्मता ।
तरणी रामतरणी गन्धाढ्या कन्यका सहा ॥२४४॥

कुं—भूमिं मारयति **कुमारी**; कुत्सितो मारोऽस्या इति वा, तस्याम् । **कर्णयति कर्णिका** । चारवः केसराः अस्याः **चारुकेसरा** । भृङ्गाणां सम्मता **भृङ्गसम्मता** । तरन्त्यनया दुःखं **तरणी**, अनट् प्रत्ययः । यत् **चन्द्रनन्दनः**—

कुब्जकस्तरणी वल्ली कुमार्यलिकुलप्रिया ।
[ ] इति ।

रामा चासौ तरणी च **रामतरणी** । गन्धेन आढ्या **गन्धाढ्या** । कनति—दीप्यते कन्या, "स्था-छा-मा-" [हैमोणादिसू० ३५७] इति यः, के **कन्यका**; **कुमारी**पर्याया वा । सहते परिमलं **सहा**, अच् । आह च—

तरणी रामतरणी वर्णिनी चारुकेसरा ।
रम्या कुमारी गन्धाढ्या द्विरेफगणसम्मता ॥
[धन्व० वर्ग ५ श्लोक १४५] इति ।

एतस्या लोके 'सेवंत्री' इति प्रसिद्धिः ॥२४४॥

अमिलाते स्यादम्लातोऽपरिम्लानो महासहा ।
रक्तपुष्पः कुरबकः पीतपुष्पः कुरण्टकः ॥ २४५ ॥

"म्लैं गात्रविनामे" न म्लायति **अमिलातः**, "पुत-पित्त-" [हैमोणादिसू० २०४] इति ते निपात्यते, तत्र । न म्लायति **अम्लातः**, "पुत-पित्त-" [हैमोणादिसू० २०४] इति ते निपात्यते । न परिम्लायते **अपरिम्लानः** । महती चासौ सहा च **महासहा** । रक्तानि पुष्पाण्यस्य **रक्तपुष्पः** । [कौ रूयते- अर्यते **कुरबकः**, "कॉ रु-रुण्टि-रण्टिभ्यः" हैमोणादिसू० २८ इति अकः प्रत्ययः ।] पीतानि **पुष्पाण्यस्य**

पीतपुष्पः। "रण्टिः प्राणहरणे" सौत्रः, कौ रण्टति **कुरण्टकः**, "को रु-रुण्टि-रण्टिभ्यः" [हैमोणादिसू० २८] इत्यकः प्रत्ययः। "कौ रम्यते **कुरण्टकः**" इति **क्षीरस्वामी**। **कुरण्डको**ऽपि। आह च—

अमिलातोऽपरिम्लानस्तथैवाऽम्लातकः स्मृतः।
रक्तपुष्पः कुरबकः पीतपुष्पः कुरण्टकः॥

[ ] इति।

एतस्य 'वानउ' इति प्रसिद्धिः॥ २४५॥

सैरेयकः सहचरो झिण्टी सहाचरश्च सः।

'सः' अमिलातः सीरे भवः सैरेयः, "भवे" [सिद्ध० ६. ३. १२३] इत्येयण्, स्वार्थिके के **सैरेयकः**। सह चरति **सहचरः**। 'झिम्' इति रटतीति **झिण्टी**, पृषोदरादित्वात्। सह आचरति **सहाचरः**। आह च—

सैरेयकः सहचरः सैरेयश्च सहाचरः।

[धन्व० वर्ग १ श्लो० २७८] इति।

स तु रक्तः कुरबकः स्यात् पीतस्तु कुरण्टकः॥२४६॥

नील आर्त्तगलो दासी बाण ओदनपाक्यपि।

'तुः' पुनरर्थे। 'सः' सहचरः 'रक्तः' रक्तवर्णः कौ रूयते—अर्यते **कुरबकः**, "को रु-रुण्टि-रण्टिभ्यः" [हैमोणादिसू० २८] इति अकः प्रत्ययः। 'तुः' पुनरर्थे। 'पीतः' पीतवर्णः 'स्याद्' भवेत् **कुरण्टकः**, एतस्य साधना पूर्ववत्॥२४६॥

'नीलः' नीलवर्णः आर्तः—क्षीणो गलति **आर्तगलः**। दस्यति—क्षीयते **दासी**, गौरादित्वाद् ङीः। "वण शब्दे" वण्यते **बाणः**, घञ् प्रत्ययः, द्विलिङ्गः। ओदनस्येव पाकोऽस्या **ओदनपाकी**, "पाक-कर्ण-पर्ण[1]" [सिद्ध० २.४.५५] इति ङीः। आह च—

पीतो रक्तोऽथ नीलश्च कुसुमैस्तं विभावयेत्॥
पीतः कुरण्टको ज्ञेयो रक्तः कुरबकः स्मृतः।
नील आर्तगलो दासी बाण ओदनपाक्यपि॥

[धन्व० वर्ग १ श्लो० २७८–७९] इति।

---

१ अमरे तु 'सैरीयक' इत्यपि दृश्यते॥

तथा च **अमरसिंहः**—

सहा कुमारी तरणिरम्लानस्तु महासहा ॥
तत्र शोणे कुरबकस्तत्र पीते कुरण्टकः ।
नीली झिण्टी द्वयोर्बाणा दासी चाऽऽर्तगलश्च सा ॥
सैरेयकस्तु झिण्टी स्यात् [तस्मिन् कुरवकोऽरुणे ।
पीता कुरण्टको झिण्टी] तस्मिन् सहचरी द्वयोः ॥

[का० २ वर्ग ४ श्लो० ७३-७५] इति ।

एतस्य लोके "कंटासेलउ" इति प्रसिद्धिः ।

किङ्किराते किङ्किराटः पीतभद्रः प्रलोभ्यपि ॥२४७॥

कुत्सितं किरति **किङ्किरातः**, "कृ-वृ-कल्यलि" [हैमोणादिसू० २०९] इत्यातक्; किञ्चित् किरातः—खर्वो वा, तत्र । "किरो लश्च वा" [हैमोणादिसू० १४७] इति किदाटे प्रत्यये **किङ्किराटः** । पीतश्चासौ भद्रश्च **पीतभद्रः** । प्रलुभ्यतीत्येवं शीलः **प्रलोभी**, "अजातेः शीले" [सिद्ध० ५.१.१५४] इति णिन् ॥२४७॥

चित्रके वह्लरी व्यालः पाठीनो दारुणः कुटः ।
ज्योतिष्को जरणोऽग्न्याख्यो वलिन द्वीपि-पाठिनः ॥२४८॥

चेतति चित्, चितः—जन्तून् त्रायते चित्रः, "क्वचित्" [सिद्ध० ५.१.१७१] इति डः, स्वार्थिके के **चित्रकः**, तत्र । "वलि वल्लि संवरणे" वल्लते **वह्लरी**, "जठर-क्कर-" [हैमोणादिसू० ४०३] इत्यरे निपात्यते । विशेषेण आ—समन्ताद् अडति लाति वा **व्यालः**, अत्र डस्य लत्वमैक्यात् । पठति **पाठीनः**, "पेठर्णित्" [हैमोणादिसू० २८७] इति णिदीनः । "दृश् विदारणे" णौ दारयति **दारुणः**, "ऋ-कृ-वृ-धृ-दारिभ्य उणः" [हैमोणादिसू० १९६] इति उणः । "कुटत् कौटिल्ये" कुटति **कुटः**, "नाम्युपान्त्य-" [सिद्ध० ५.१.५४] इति कः । ज्योतिरेव **ज्योतिष्कः** । जीर्यते अनेन **जरणः** । अग्नेराख्याऽस्य **अग्न्याख्यः** । वलिः—त्वक्सङ्कोचोऽस्त्यस्य **वलिनः**, अङ्गादित्वान्नः । द्वीपोऽस्त्यस्य **द्वीपी** । पाठोऽस्यास्तीति **पाठी** । आह च—

चित्रको दहनो व्यालः पाठीनो दारुणोऽग्निकः ।
ज्योतिष्को वह्लरी वह्निः पाठी पाली कुटः शिखी ॥

[धन्व० वर्ग २ श्लो० ८०] इति ।

एतस्य लोके 'चित्रक' इति प्रसिद्धिः ॥२४८॥

वासन्त्यां स्यात् प्रहसन्ती सुवसन्ता वसन्तजा ।
सेव्याऽलिबान्धवा शीतसंवासा शीकरा च सा ॥२४९॥

वसन्ते भवा **वासन्ती,** "भर्तु-सन्ध्यादेरण्" [सिद्ध० ६.३.८९] इत्यण् । वसन्ते पुष्पति वा, ऋत्वग् , "अगजेये-" [सिद्ध० २.४.२०] इति ङीः, तस्याम् । प्रहसति **प्रहसन्ती,** शतृप्रत्ययः । शोभनो वसन्तोऽस्याः **सुवसन्ता** । वसन्ते जाता **वसन्तजा,** "क्वचिद्" [सिद्ध० ५.१.१७१] इति डः । **सेव्या** सेवनीया । अलीनां—भ्रमराणां बान्धवा **अलिबान्धवा** । शीते संवासोऽस्याः **शीतसंवासा** । शीकते—सिञ्चतीव **शीकरा,** "ऋच्छि-चटि-वटि-" [हैमोणादिसू० ३९७] इत्यरः । आह च—

वासन्ती प्रहसन्ती च सुवसन्ता वसन्तजा ।
शीकरा शीतसंवासा सेव्या भ्रमरबान्धवा ॥

[धन्व० वर्ग ५ श्लो० १३९] इति ।

[वासन्तीनामानि] ॥२४९॥

नील्यां श्रीफलिका काली दोला मेला विशोधनी ।
तूणी तुत्था भारवाही रञ्जनी मधुपर्णिका ॥२५०॥
द्रोणी क्लीतकिका ग्राम्या नीलकेशी महारसा ।

"णील वर्णे" नीलति **नीली,** "नीलात् प्राण्यौषध्योः" [सिद्ध० २.४.२७] इति ङीः, तस्याम् । श्रीप्रधानानि फलान्यस्याः श्रीफली, स्वार्थिके के **श्रीफलिका** रम्यफला । **काली** वर्णेन । दोल्यते **दोला,** मेल्यते **मेला,** उभयत्र "भीषि-भूषि-" [सिद्ध० ५.३.१०९] इति बहुवचनादङ् । विशोध्यते **विशोधनी** । "तूणण् सङ्कोचने" तूण्यते **तूणीः** "तुंक् वृत्त्यादिषु" इत्यस्मात् " स्था-क्षुतोरूच्च " [हैमोणादिसू० १८५] इति णे प्रत्यये ऊकारे अन्तादेशे च वा **तूणी** । तुद्यते **तुत्था,** "नी-नु-रमि-" [हैमोणादिसू० २२७] इति सूत्रेण "तुदीत् व्यथने" इत्यस्मात् कित् थः प्रत्ययः । भारं वहति **भारवाही,** कर्मण्यण् । रञ्जयति—नीलीकरोति **रञ्जनी** । मधूनि पर्णान्यस्याः मधुपर्णी, "पाक-कर्ण-पर्ण-" [सिद्ध० २.४.५५] इति ङीः, के **मधुपर्णिका** ॥२५०॥

---

१ सीतप्लावसा नि० ॥ २ काला नि० अमरे च ॥ ३ तुच्छा नि० ॥

द्रवत्यस्याः स्पर्शाज्जनो **द्रोणी**, "द्रोर्वा" [हैमोणादिसू० १८४] इति णः प्रत्ययः, गौरादित्वाद् ङीः । क्लीतकं–विनिमयोऽस्त्यस्याः **क्लीतकिका**, "अतोऽनेकस्वरात्" [सिद्ध० ७.२.६] इतीकः । ग्रामे भवा **ग्राम्या**, "भवे" [सिद्ध० ६.३.१२३] इति यः । **ग्रामीणेयेत्यपि** । नीलाः केशा अस्या **नीलकेशी** । महान् रसोऽस्या **महारसा** । आह च—

नीलिनी नीलिका काली ग्राम्या तूणी विशोधनी ।
तुत्था श्रीफलिका मेला भारवाही च रञ्जनी ॥

[धन्व० वर्ग १ श्लो० २३२] इति ।

तथा च—

नीली काली क्लीतकिका ग्रामीणा मधुपर्णिका ।
रञ्जनी श्रीफली तुत्था द्रोणी दोला च नीलिनी ॥

[अमर० का० २ वर्ग ४ श्लो० ९४–९५] इति ।

नीलीनामानि । लोके तु 'गुली' इति प्रसिद्धिः ।

दमने स्याद् ब्रह्मजटा मुनिर्दान्तर्षिपुत्रकौ ॥२५१॥
गन्धोत्कटः पुण्डरीकः पाण्डुराङ्गस्तपस्व्यपि ।

दाम्यति दमयति वा **दमनः**, तत्र । ब्रह्मणो जटेव **ब्रह्मजटा** । **मुनिः**, ऋषिपुत्रत्वात् । दम्यते **दान्तः**, वेट्त्वात् क्तयोर्नेट् । ऋषीणां पुत्रः ऋषिपुत्रः, के **ऋषिपुत्रकः** ॥२५१॥

गन्धेन उत्कटः **गन्धोत्कटः** । "पुणत् शुभे" पुणति **पुण्डरीकः**; "पुडु प्रमर्दने" पुण्ड्यते वा, "सृगीका-ऽस्तीक-" [हैमोणादिसू० ५०] इतीके निपात्यते । पाण्डुरमङ्गमस्य **पाण्डुराङ्गः** । **तपस्वी** मुनित्वात् । आह च—

दमनो मदान्तो दमो दान्तो मुनिसुतो मुनिः ।
गन्धोत्कटो दमनको विनीतः कुलपुत्रकः ॥

[ ] इति ।

तथा च —

दमनकं पाण्डुराङ्गं दान्तं गन्धोत्कटं मुनिम् ।
पुण्डरीकं ब्रह्मजटमृषिपुत्रं तपस्विनम् ॥

[धन्व० वर्ग ३ श्लो० ६४] इति ।

एतस्य लोके 'दमनउ' इति प्रसिद्धिः ।

धत्तूरे धूर्त-धुत्तूरौ कितवो देवता शठः ॥२५२॥
घण्टापुष्पस्तलफलो मातुलः कनकाह्वयः ।
उन्मत्तो मदनश्च

धयति दधाति वा धातून् **धत्तूरः**, "सिन्दूर-कर्चूर-" [हैमोणादिसू० ४३०] इत्यूरे निपात्यते, तत्र । "धुर्वैं हिंसायाम्" धूर्वति **धूर्तः**, "शी-री-" [हैमोणादिसू० २०१] इति कित् तः । धुनोति **धुत्तूरः**, "सिन्दूर-" [हैमोणादिसू० ४३०] इत्यूरे निपात्यते । "कित निवासे" इत्यस्य "किति-कुडि-" [हैमोणादिसू० ५१८] इति किदवे **कितवः** । दीव्यति देवः, देव एव **देवता**, "देवात् तल्" [सिद्ध० ७.२.१६२] इति तल् । "शठ कैतवे च" शठति **शठः** ॥२५२॥

घण्टाकाराणि पुष्पाण्यस्य **घण्टापुष्पः** । तले फलान्यस्य **तलफलः** । माऽस्ति तुलाऽस्य **मातुलः**, "अ-मा-नो-नाः प्रतिषेधे" इत्युक्तत्वात् । कनकस्य आह्वयोऽस्य **कनकाह्वयः** । **उन्मत्तः**, उन्मादकत्वात् । मदयति **मदनः** । आह च—

धत्तूरकः स्मृतो धूर्तो देवता कितवः शठः ।
उन्मत्तको मदनकतरुस्तलफलस्तथा ॥

[धन्व० वर्ग ४ श्लो० ७] इति ।

एतस्य लोके 'धत्तूरउ' इति प्रसिद्धिः ।

अस्य फलं मातुलपुत्रकम् ॥२५३॥

'अस्य' इति धत्तूरस्य फलं मातुलस्य पुत्रकमिव **मातुलपुत्रकम्** । यतो **धन्वतरिः** "**मातुलं** धत्तूरं **मातुलपुत्रकं** च तत्फलम्" आह । **यदमरः**—

अस्य फले मातुलपुत्रकः ॥ [का० २ वर्ग ४ श्लो० ७८] इति ॥२५३॥

शङ्खपुष्प्यां क्षीरपुष्पी शिवा ब्राह्मी किरीटिनी ।
मधुपुष्पी मधुगन्धा शङ्खाह्वा शङ्खमालिनी ॥२५४॥
धूसरच्छदना श्वेतपुष्पी वनविलासिनी ।

शङ्खवर्णं पुष्पमस्याः **शङ्खपुष्पी**, "असत्काण्ड-प्रान्त-" [सिद्ध० २.४.५६] इति ङीः, तस्याम् । क्षीरवर्णं पुष्पमस्याः **क्षीरपुष्पी** । **शिवा** निरुपद्रवा । ब्रह्मण इयम् **ब्राह्मी** । किरीटोऽस्त्यस्याः **किरीटिनी** । मधूनि पुष्पाण्यस्याः **मधुपुष्पी** ।

मधुन इव गन्धोऽस्या **मधुगन्धा** । शङ्खस्य आह्वाऽस्याः **शङ्खाह्वा** । शङ्खवद् मालते—शोभते इत्येवंशीला **शङ्खमालिनी** ॥२५४॥

धूसराणि छदनानि अस्याः **धूसरच्छदना** । श्वेतानि पुष्पाण्यस्याः **श्वेतपुष्पी** । वने विलसति इत्येवंशीला **वनविलासिनी** । आह च—

शङ्खपुष्पी कम्बुपुष्पी शङ्खाह्वा शङ्खमालिनी ।
किरीटी शङ्खकुसुमा मेध्या वनविलासिनी ॥

[धन्व० वर्ग ४ श्लो० ११३] इति ।

एतस्या लोके 'शंखाहूली' इति प्रसिद्धिः ।

कर्चूरे द्राविडः काल्यो वेधाग्र्यो गन्धमूलकः ॥२५५॥

कृन्तति त्वग्दोषं **कर्चूरः**, "सिन्दूर-कर्चूर-" [हैमोणादिसू० ४३०] इत्यूरे निपात्यते, तत्र । द्रावयति **द्राविडः**, "विहड-कहोड-" [हैमोणादिसू० १७२] इत्यडे निपात्यते । "कल्यकारी **काल्यः**" इति क्षीरस्वामी । वेधे अग्र्यः—श्रेष्ठो **वेधाग्र्यः** । गन्धयुक्तं मूलमस्य गन्धमूलः, गन्धो मूले अस्येति वा, के **गन्धमूलकः** । आह च—

कर्चूरको गन्धमूलो द्राविडः काल्य एव च ।
वेधमुख्यो दुर्लभश्च कस्यचित् सम्मता शटी ॥

[धन्व० वर्ग ३ श्लो० ९४] इति ।

अमरोऽपि—

कर्चूरको द्राविडकः काल्यको वेधमुख्यकः ।

[का० २ वर्ग ४ श्लो० १३५] इति ।

एतस्य लोके 'कचूर' इति प्रसिद्धिः ॥२५५॥

अजमोदायां तु मोचा मयूरो लोचमस्तकः ।
खराश्वा कारवी बस्तगन्धा हस्तिमयूरकः ॥२५६॥
दीप्यो वल्ली ब्रह्मदर्भौ[1] लोचमर्कट इत्यपि ।

अजवन्मोदः—गन्धोऽस्याः **अजमोदा**, तस्याम् । मुञ्चति **मोचा**, लिहादित्वादच् । मीनाति अग्निमान्द्यं **मयूरः**, "मी-मसि-" [हैमोणादिसू० ४२७] इत्यूरः । लोच्यते लुच्यते वा मस्तकोऽस्य बर्बराकारत्वाद् **लोचमस्तकः** । खरमश्नुते **खराश्वा**,

---

१ मोचा मस्तव्रजमोदायां मयूरो नि० ॥ २ °दर्भा लोच° नि० ॥

"लटि-खटि-" [हैमोणादिसू० ५०५] इति वः। कारोरियं **कारवी**, कर्मण्येत्यर्थः, "तस्येदम्" [सिद्ध०६.३.१६०] इत्यण्। बस्तस्येव गन्धोऽस्या **बस्तगन्धा**। हस्तिनं मीनाति **हस्तिमयूरकः**, "मी-मसि-"[हैमोणादिसू० ४२७] इत्यूरे स्वार्थिके के च साधुः ॥२५६॥

दीप्यते **दीप्यः** अग्निदीपनः। वल्लीव **वल्ली**। ब्रह्मदर्भ इव **ब्रह्मदर्भः**, तदाभत्वात्। लोच्यते लुच्यते वा मर्कटोऽनेन **लोचमर्कटः**। आह च—

अजमोदा बस्तमोदा दीप्यको लोचमस्तकः।
खराश्वा कारवी वल्ली मोचा हस्तिमयूरकः॥

[धन्व० वर्ग २ श्लो० ९८] इति।

चन्द्रोऽप्याह—

अजमोदा ब्रह्मकुशा खराश्वा लोचमर्कटः।
वल्ली मोदा बस्तमोदा सैव हस्तिमयूरकः॥

[ ] इति।

एतस्या लोके "अजमोद" इति प्रसिद्धिः।

यवान्यां स्यादुग्रगन्धा यमानी यवसाह्वया ॥२५७॥

दोषदुष्टो यवो **यवानी**, "यव-यवना-ऽरण्य-हिमाद् दोष-लिप्युरु-महत्त्वे" [सिद्ध० २. ४. ६५] इति ङीः आन् चान्तः, तस्याम्। उग्रो गन्धोऽस्याः **उग्रगन्धा**। यच्छत्यग्निमान्द्यं **यमानी**, "विदन-गगन-" [हैमोणादिसू० २७५] इत्यने निपात्यते। यवस इत्याह्वयोऽस्याः **यवसाह्वया**। आह च—

यवानी दीपको दीप्यो यवसाह्वा यवानिका।
यमानिकोग्रगन्धा च दीपनीया च दीपनी॥

[धन्व० वर्ग २ श्लो० ९१] इति।

एतस्या लोके 'यवानि' इति प्रसिद्धिः ॥२५७॥

सहदेवायां तु दण्डोत्पला गोवन्दनी

सह दीव्यति **सहदेवा**, अजादित्वादाप्, तस्याम्। दण्डाकाराणि उत्पलान्यस्या **दण्डोत्पला**। गवि—भूमौ वन्द्यते **गोवन्दनी**।

च सा।

---

१ 0देव्यां तथा दण्डो0 नि० ॥

गन्धवर्णा सितः पुष्पैः

'चः' पुनः 'सा' सहदेवा 'सितैः पुष्पैः' इति श्वेतकुसुमैः गन्धेन वर्ण्यते **गन्धवर्णा,** उच्यते इति शेषः ।

विश्वदेवा तु साऽरुणैः ॥२५८॥

'तुः' पुनरर्थे । 'सा' सहदेवा 'अरुणैः' इति रक्तैः पुष्पैः विश्वे दीव्यति **विश्वदेवा** उच्यते । एतस्याः 'सहदेवी' इति प्रसिद्धिः ॥२५८॥

पर्पटके वरतिक्तो रजको रजनामकः ।

"पॄश् पालन-पूरणयोः" पृणाति पर्पटः, "कपट-कीकटादयः" [हैमोणादिसू० १४४] इत्यटे निपात्यते, स्वार्थिके के **पर्पटकः,** तत्र । व्रियते **वरः,** वरश्चासौ तिक्तश्च **वरतिक्तः** । द्वे नाम्नी **इत्यपरे** । रजति **रजकः,** "नृत्-खन्-रञ्जः शिल्पिन्यकट्" [सिद्ध० ५.१.६५] इत्यकट् । रजस्य नामाऽस्य **रजनामकः,** अत्र रजशब्दोऽकारान्तः । तेन **रेणुः पांसु**रित्यादीनि । आह च—

पर्पटः स्यात् पर्पटको वरतिक्तश्च नामतः ।
रजो रेणुश्च पांसुश्च कवचश्चर्मकण्टकः ॥
[धन्व० वर्ग १ श्लो० ४५]
कल्याणकश्च विज्ञेयः पर्पटो नामभिर्बुधैः ।
एकपुष्पोऽतिसारश्च चरको ज्वरनाशनः ॥
[ ] इति ।

एतस्य लोके 'पीतपापडा' इति प्रसिद्धिः ।

गोजिह्वायां शृङ्गबेरी दार्विका भूमिकालिका ॥२५९॥

गोजिह्वा गोजिह्वाभपत्रा, तस्याम् । "शॄश् हिंसायाम्" शृणाति रोगान् **शृङ्गबेरी,** "शतेरादयः" [हैमोणादिसू० ४३२] इति केरे निपात्यते; शृङ्गोपलक्षितं बेरं—देहोऽस्या इति वा । दारयति रोगान् दार्वी, दृणाति वा, "कृ-वा-पा-जि-" [हैमोणादिसू० १] इत्युण्, गौरादित्वाद् ङीः, स्वार्थिके के **दार्विका** । भूमौ कालिकेव **भूमिकालिका** । आह च—

गोजिह्वा गोजिका गोभी दार्विका खरपर्णनी ।
[ ] इति ।

---

१ रजः कवचनामकः नि० ॥

एतस्या लोके 'गोभी' इति प्रसिद्धिः ॥२५९॥

बलायां शीतपाकी स्याद् भद्रादन्योदनाह्वया ।
वाटी वाट्यालकः(? लिका) वाट्यपुष्पिका खरयष्टिका ॥२६०॥
काष्ठिका समराह्वा च समाङ्गा च महोदरी ।

"बल प्राणन-धान्यावरोधयोः" बलन्त्यनया **बला**, बलकृत्त्वात्, तस्याम् । शीतेन पाकोऽस्याः **शीतपाकी**, "पाक-कर्ण-पर्ण-" [सिद्ध० २.४.५५] इति ङीः । भद्रमदनमस्या **भद्रादनी** । ओदनस्य आह्वयोऽस्याः **ओदनाह्वया** । "वट वेष्टने" वट्यते **वाटी** । वटति वट्यते वा **वाट्याली**, "चात्वाल-कङ्काल-" [हैमोणादिसू० ४८०] इत्याले निपात्यते, [के **वाटचालिका**] । यच्चन्द्रनन्दनः—

बला भद्रौदनी ह्वया तथा वाट्यालकः
[ ] इति ।

वाटयं—वेष्टनीयं पुष्पमस्याः **वाट्यपुष्पिका** । खरा यष्टिरस्याः **खरयष्टिका** ॥२६०॥

काष्ठमस्त्यस्याः **काष्ठिका**, "अतोऽनेकस्वरात्" [सिद्ध० ७. २. ६] इतीकः । समर इत्याह्वाऽस्याः **समराह्वा** । सममङ्गमस्याः **समाङ्गा** । महद् उदरं—मध्यमस्याः **महोदरी** । आह च—

बला भद्रादनी वाटी समाङ्गा खरयष्टिका ।
महासमाङ्गौदनिका शीतपाक्योदनाह्वया ॥
[धन्व० वर्ग १ श्लो० २८०] इति ।

एतस्या लोके 'बला' इत्येव प्रसिद्धिः ।

महाबलायां बलिका पुष्पिका पीतपुष्पिका ॥२६१॥

देवसहा सहदेवाऽतिबला वाटयपुष्पिका ।
ऋष्यप्रोक्ता ऋक्षगन्धा कङ्कता वर्षपुष्पिका ॥२६२॥

वाटयायनी भूरिबला तिष्या वीर्या बृहद्बला ।
महागन्धा गन्धवल्ली मङ्गल्या च प्रसाधनी ॥२६३॥

---

१ भद्रोदन्योदनाह्वया । वाट्यालकस्तथा वाट्य° नि० ॥ २ वाट्यपुष्पिका नि० ॥ ३ ऋष्यगन्धा नि० ॥ ४ °ल्याऽर्थप्रसा° नि० ॥

महती चासौ बला च **महाबला**, तस्याम् । बला एव **बलिका** । पुष्पाणि सन्त्यस्याः **पुष्पिका**, "अतोऽनेकस्वरात्" [सिद्ध०७.२.६] इतीकः । पीता चासौ पुष्पिका च **पीतपुष्पिका** ॥२६१॥

देवान् सहते **देवसहा** । सह दीव्यति **सहदेवा** । अतिरिक्तं बलमस्याः **अतिबला** । वाटयं—वेष्टनीयं पुष्पमस्याः वाटचपुष्पी, के **वाटचपुष्पिका** । ऋष्यैः—मृगैः प्रोक्ता **ऋष्यप्रोक्ता** । ऋक्षस्य इव गन्धोऽस्याः **ऋक्षगन्धा** । "कंकुङ् गतौ" कङ्कते **कङ्कता**, "दृ-पृ-भृ-मृ-शी-" [हैमोणादिसू० २०७] इत्यादिना किदतः । वर्षे पुष्यति **वर्षपुष्पिका** ॥२६२॥

वाटचमयते **वाटचायनी** । भूरि बलमस्याः **भूरिबला** । **तिष्या** मङ्गल्या । वीरे साध्वी **वीर्या**, "तत्र साधौ" [सिद्ध० ७. १. १५] इति यः । बृहद् बलमस्या **बृहद्बला** । **बृहत्फला** इत्येके । महान् गन्धोऽस्या **महागन्धा** । गन्धस्य वल्ली **गन्धवल्ली** । मङ्गले साधुर्**मङ्गल्या**, "तत्र साधौ" [सिद्ध० ७. १. १५] इति यः । प्रसाध्यति **प्रसाधनी** । आह च—

महाबला वर्षपुष्पी तथा वाटचायनी स्मृता ।
सहदेवी देवसहा पीतपुष्पी बृहत्फला ।
बलिकाऽतिबला ज्ञेया वाटचपुष्पी च कङ्कता ।
ऋष्यप्रोक्ता ऋक्षगन्धा सैव भूरिबला मता ॥

[धन्व० वर्ग १ श्लो० २८२, २८६] इति ।

एतद् बलात्रितयं ज्ञेयम् । यदवाद्येतस्य गुणाधिकारे—

वात-पित्तापहं ग्राहि बल्यं वृष्यं बलात्रयम् ॥

[धन्व० वर्ग १ श्लो० २८७] इति ॥२६३॥

मुसल्यां तु तालमूली दुर्नामारिर्महावृषा ।
वृष्यकन्दा तालपर्णी सुमूला बलदा शिवा ॥२६४॥

"मुसच् खण्डने" दन्त्यान्तः, मुस्यति **मुसली**, "तृपि-वपि-" [हैमोणादिसू० ४६८] इति किदलः, तस्याम् । ताल इव मूलोऽस्याः **तालमूली** । दुष्टो नामः— *नमनमस्या दुर्नामा आबन्तः, अर्शोरुक्, तस्या अरिः— नाशनाद्* **दुर्नामारिः** । महती वृषा **महावृषा** । वृष्यः कन्दोऽस्या **वृष्यकन्दा** । ताले पर्णान्यस्याः

---

१ °ह्वाविषा नि० ॥

तालपर्णी, "पाक-कर्ण-पर्ण-" [सिद्ध० २. ४.५५] इति ङीः। शोभनो **मूलोऽस्याः सुमूला**। बलं ददाति **बलदा**। **शिवा** निरुपद्रवा। आह च—

मुसली खलिनी तालपत्री काञ्चनपुष्पिका।
महावृष्या वृष्यकन्दा खर्जूरी तालमूलिका॥

[ ] इति।

एतस्या लोके 'मुसली' इति प्रसिद्धिः ॥२६४॥

हिङ्गौ जतुक-वाल्हीका-ऽगूढगन्धानि रामठम्।
सहस्रवेधि भूतघ्नं जरणं सूपधूपनम् ॥२६५॥

"हिंट् गति-वृद्ध्योः" हिनोति नासां **हिङ्गुः**, पुं-क्लीबलिङ्गः, "हेर्हिन् च" [हैमोणादिसू० ७६०] इति गुः, तत्र। जायते **जतुकम्**, "कञ्चुकांशुक-" [हैमोणादि-सू० ५७] इत्युके निपात्यते। **वाल्हीके**—उदीच्यदेशे भवं **वाल्हीकम्**, "कोपान्त्यात्" [सिद्ध० ६.३.५६] इत्यण्। अगूढः—अगुप्तो गन्धोऽस्य **अगूढगन्धम्**। **रमठे**—उदीच्यदेशे भवं **रामठम्**, "भवे" [सिद्ध० ६.३.१२३] इत्यण्। सहस्रं—बहु वेधयति **सहस्रवेधि**। भूतान् हन्ति **भूतघ्नम्**। जीर्यतेऽनेन **जरणम्**, क्लीबलिङ्गः। सूपस्य—प्रहितस्य धूपनं **सूपधूपनम्**। आह च—

हिङ्गु रामठमत्युग्रं जन्तुघ्नं भूतनाशनम्।
अगूढगन्धं वाल्हीकं जरणं सूपधूपनम्॥

[धन्व० वर्ग २ श्लो०३६] इति।

एतस्य लोके 'हिङ्गु' इति प्रसिद्धिः ॥२६५॥

हिङ्गुपत्र्यां पृथुः पृथ्वी दीर्घिका वारिपत्रिका।
जतुका रामठी वंशपत्री पिण्डा शिवाटिका॥२६६॥
कारवी कैवरी तन्वी[1] वाष्पिका बिल्विकेत्यपि।

हिङ्गोः पत्री **हिङ्गुपत्री**, तस्याम्। प्रथते **पृथुः**, "रभि-प्रथिभ्यामृच्च रस्य" [हैमोणादिसू० ७३०] इति सूत्रेण " प्रथिष् प्रख्याने " इत्यस्मात् किदुः प्रत्ययो रेफस्य च ऋकारः, "स्वरादुतः-" [सिद्ध०२.४.३५] इति ङ्यां पृथ्वी। **दीर्घिका**

१ करवी तन्वी नि० ॥

प्रलम्बत्वात् । वारि–वालकं तदिव पत्राण्यस्याः वारिपत्री, के **वारिपत्रिका** । **जतुका** प्राग्वत् । **रामठी**त्यत्र "अणजेये-" [सिद्ध० २.४.२०] इति ङीः । **वंशपत्री** वंशपत्राकारा । **पिण्डा** पिण्डत्वात् । शिवमटति **शिवाटिका** ॥२६६॥

कारोरियं **कारवी** संस्कर्त्री, "तस्येदम्" [सिद्ध० ६.३.१६०] इत्यण् । कबर्याकृतित्वात् **कबरी** । **बर्बरी** च **पाठभेदः** । **तन्वी** सूक्ष्मत्वात् । "बाष्पं स्रवति **बाष्पिका**" इति **क्षीरस्वामी** । बिल्वीव **बिल्विका** । आह च—

हिङ्गुपत्री तु कारवी पृथ्वीका पृथुका पृथुः ।
बाष्पिका दीर्घिका तन्वी बिल्विका दारुपत्रिका ॥
नाडी हिङ्गुपलाशा च जतुका रामठी रसा ।
वंशपत्री वेणुपत्री पिण्डा हिङ्गु शिवाटिका ॥
[धन्व० वर्ग २ श्लो० ३८,४०] इति ।

एतस्या लोके 'हिंगुउत्री' इति प्रसिद्धिः ।

काकजङ्घायां तु दासी लोमहीना प्रचीबला ॥२६७॥
नदीकान्ता नद्याख्या च पारापतपदीत्यपि ।

काकस्येव जङ्घा अस्याः **काकजङ्घा**, तस्याम् । "दासृग् दाने" दन्त्यान्तः, दासते **दासी**, अच्, गौरादित्वाद् ङीः । लोमभिर्हीना **लोमहीना** । अत एव **लोमशा** । "चिंगट् चयने" प्रचिनोति **प्रचीबला**, "तुल्वलेल्वलादयः" [हैमोणादिसू० ५००] इति बले निपात्यते ॥२६७॥

नद्यां कान्ता **नदीकान्ता** । नदीत्याख्या अस्याः **नद्याख्या** । पारापत इव पदान्यस्याः **पारापतपदी** । आह च—

काकजङ्घा ध्वाङ्क्षजङ्घा मदध्वाङ्क्षा सुलोमशा ।
पारापतपदी दासी नदीकान्ता प्रचीबला ॥
[धन्व० वर्ग ४ श्लो० २३] इति ।

एतस्या लोके 'कालउघाडउ' इति प्रसिद्धिः ।

काकनासायां सुरङ्गा वायसी वायसाङ्गिका ॥२६८॥
वारुणी तस्करा स्नायुः काकतुण्डफला च सा ।

काकस्येव नासाऽस्याः **काकनासा,** तस्याम् । शोभनो **रङ्गो**ऽस्याः **सुरङ्गा** । वायसस्येयं **वायसी,** "तस्येदम्" [सिद्ध० ६.३.१६०] इत्यण्, तदाभत्वात् । वायसस्येवाङ्गभासारूपं फलमस्याः वायसाङ्गी, स्वार्थिके के **वायसाङ्गिका** ॥२६८॥

वरुणस्येयं **वारुणी,** "तस्येदम्" [सिद्ध०६.३.१६०] इत्यण् । तस्कर इव **तस्करा** । स्नायति–वेष्टयति **स्नायुः,** "कृ-वा-पा-जि-" [हैमोणादिसू० १] इत्युण् । काकतुण्डमिव फलमस्याः **काकतुण्डफला** । आह च—

काकनासा ध्वाङ्क्षनासा काकतुण्डफला च सा ।
सुरङ्गा तस्करा स्नायुर्ध्वाङ्क्षतुण्डफला मता ॥

[धन्व० वर्ग ४ श्लो० २५] इति ।

एतस्या लोके 'कायणी' इति प्रसिद्धिः ।

पाषाणभेदे वृषभः शिलाभिच्चित्रपर्णकः ॥२६९॥

पाषाणो भिद्यतेऽनेन **पाषाणभेदः,** तत्र । वर्षति **वृषभः,** "ऋषि-वृषि-" [हैमोणादिसू० ३३१] इति किदभः । शिलां भिनत्ति **शिलाभित्** । चित्राणि पर्णान्यस्य **चित्रपर्णकः** । आह च—

पाषाणभेदकोऽश्मघ्नः शिलाभेदोऽश्मभेदकः ।
स चैवोपलभेदश्च नगविध्वंसकोऽश्मभित् ॥

[धन्व० वर्ग २ श्लो० १५७] इति ।

एतस्य लोके 'पाषाणभेद' इत्येव प्रसिद्धिः ॥२६९॥

हयुषायां विस्रगन्धा

"हय क्लान्तौ च" हयति **हयुषा,** "ऋ-पृ-नहि-हनि-" [हैमोणादिसू० ५५७] इत्यादिना उषः प्रत्ययः, तस्याम् । विस्रो गन्धोऽस्या **विस्रगन्धा** ।

विगन्धा वपुषा च सा ।

'च' पुनः 'सा' हयुषा 'विगन्धा' गन्धरहिता "टुवपीं बीजसन्ताने" उप्यते **वपुषा,** "ऋ-पृ-नहि-हनि-" [हैमोणादिसू० ५५७] इत्युषः । अनयोर्लोके 'हउंसि' इति प्रसिद्धिः । **धन्वन्तरिस्तु** अभेदेन आह—

हयुषा वपुषा विस्रा विस्रगन्धा विगन्धिका ।
अपरा [धन्व० वर्ग २ श्लो० ९] इति ।

---

१ °णभेदे नगभिच्छिलाभृच्चि° नि० ॥ २ वपुषा मत्स्यगन्धिनी नि० ॥

साऽन्याऽश्वत्थफला ध्वाङ्क्षनासिका कच्छुनाशनी ॥२७०॥

'सा' इति हयुषा 'अन्या' अपरा अश्वत्थाकाराणि फलान्यस्या **अश्वत्थफला**। ध्वाङ्क्षस्येव नासिकाऽस्या **ध्वाङ्क्षनासिका**। कच्छुं नाशयति **कच्छुनाशनी**। **आह च**—

अन्याऽश्वत्थफला कच्छूघ्नी ध्वाङ्क्षनासिका ।
[धन्व० वर्ग २ श्लो० ९] इति ।

हयुषाभेदोऽयम् ॥२७०॥

घण्टारवायां स्यान्माल्यपुष्पिका शणघण्टिका ।
अल्पघण्टा बृहत्पुष्पी शणपुष्पी महाशणः ॥२७१॥

घण्टेव रवोऽस्याः **घण्टारवा**, तस्याम्। माल्यमिव पुष्पाण्यस्या माल्यपुष्पी, के **माल्यपुष्पिका**। शणाकारा घण्टिकेव **शणघण्टिका**। अल्पा चासौ घण्टा च **अल्पघण्टा**। बृहन्ति पुष्पाण्यस्याः **बृहत्पुष्पी**, " असत्काण्ड-प्रान्त-" [सिद्ध० २.४.५६] इति ङीः। शणस्येव पुष्पाण्यस्याः **शणपुष्पी**, "असत्काण्ड-प्रान्त-" [सिद्ध० २.४.५६] इति ङीः। महांश्चासौ शणश्च **महाशणः**। आह च—

शणपुष्पी बृहत्पुष्पी स चोक्तः शणघण्टकः ।
महाशणो माल्यपुष्पी वामनी कटुतिक्तका ॥
[धन्व० वर्ग १ श्लो० २००] इति ।

शणपुष्पीनामानि। लोके तु 'घूघरु' 'शेणहली' इति वा प्रसिद्धिः ॥२७१॥

शणे तु किङ्कणी जाली जन्तुतन्तुर्महाशणः ।
शीघ्रप्ररोही बलवान् सुपुष्पः क्षेत्रमण्डनः ॥२७२॥

"शण् श्रण् मदने" इति **कविकल्पद्रुम**धातुपाठोक्तेः शणयति **शणः**, तत्र। कङ्कते—याति **किङ्कणिः**, "कङ्केरिच्चास्य वा" [हैमोणादिसू० ६३९] इति अणिः, धातोरकारस्य चेकारः, विकल्पेन ङ्यां **किङ्कणी**। जालमस्त्यस्या **जाली**। जन्तुमयास्तन्तवोऽस्य **जन्तुतन्तुः**। द्वे नाम्नी इत्येके। महांश्चासौ शणश्च **महाशणः**। शीघ्रं प्ररोहति अवश्यं **शीघ्रप्ररोही**, "णिन् चावश्यका-" [सिद्ध० ५.४.३६] इति णिन्। बलं विद्यतेऽस्य **बलवान्**। शोभनानि पुष्पाण्यस्य **सुपुष्पः**। क्षेत्रं मण्डयति **क्षेत्रमण्डनः**। आह च—

शणे तु किङ्किणी जाली [ ] इति ।

[शणनामानि । एतस्य लोके 'शण' इति प्रसिद्धिः] ॥२७२॥

कुसुम्भेऽग्निशिख-महारजने कमलोत्तरम् ।

"कुसुच् श्लेषे" कुस्यति **कुसुम्भम्**, "का-कुसिभ्यां कुम्भः" [हैमोणादि-सू० ३३७] इति किदुम्भः; सुम्भिः सौत्रः, कौ सुम्भ्यते–निकुटचते वा [**कुसुम्भः**], पुं-क्लीबलिङ्गः, तत्र । अग्नेरिव शिखाऽस्य **अग्निशिखम्** । रज्यतेऽनेन **रजनम्**, "तुदादि-जिवृरञ्जि-" [हैमोणादिसू० २७३] इति किदनः, महच्च तद् रजनं च **महारजनम्**, क्लीबलिङ्गः । कमलेभ्य उत्तरं–प्रधानं **कमलोत्तरम्**, वर्णाधिक्यात् । आह **चामरः**—

अथ कमलोत्तरम् ।

स्यात् कुसुम्भं वह्निशिखं महारजनमित्यपि ॥

[का० २ वर्ग ९ श्लो० १०६] इति ।

एतस्य लोके 'कुसुंभउ' इति प्रसिद्धिः ।

शालपर्ण्यां दीर्घमूला त्रिपर्णी पीतनी ध्रुवा ॥२७३॥
विदारिगन्धाऽतिगुहा स्थिरा[1] शून्यांशुमत्यपि ।

शालस्येव पर्णान्यस्याः **शालपर्णी**, "पाक-कर्ण-पर्ण-" [सिद्ध० २. ४. ५५] इति ङीः, तस्याम् । दीर्घो मूलोऽस्याः **दीर्घमूला** । त्रीणि पर्णान्यस्याः **त्रिपर्णी** । पीतयति **पीतनी**, "ध्रंत् गति-स्थैर्ययोः" ध्रुवति **ध्रुवा**, अच् ॥२७३॥

विदार्या गन्धोऽस्या **विदारिगन्धा** । "गुहौग् संवरणे" अत्यर्थं गूहति **अतिगुहा**, "नाम्युपान्त्य-" [सिद्ध० ५. १. ५४] इति कः । तिष्ठति **स्थिरा**, "शुषीषि-" [हैमोणादिसू० ४१६] इति किदिरः । शुने हिता **शून्या** "शुनो वश्चोदूत्" [सिद्ध० ७. १. ३३] इति यः । अंशवः सन्त्यस्या **अंशुमती**, दीर्घमूलत्वात् । आह च—

शालपर्णी स्थिरा सौम्या त्रिपर्ण्यतिगुहा ध्रुवा ॥
विदारिगन्धांशुमती दीर्घमूला च पीतनी ।
सर्वानुकारिणी तन्वी दीर्घपर्णी च पर्णिका ।

[धन्व० वर्ग १ श्लोक ८७, ८८, ९१] इति ।

एतस्या लोके 'सावनील' इति प्रसिद्धिः ।

---

१ स्थिरा भौमांशु° नि० ॥

भार्ग्यौ बर्बरकः पद्मा वर्दकोऽङ्गारवल्लिका ॥२७४॥
गर्दभशाक-ब्राह्मण्यौ हञ्जी ब्राह्मणयष्टिका ।
आवर्तक्या चर्मरङ्गा विभाण्डी [1]पीठिका लता ॥२७५॥
रक्तपुष्पी बिन्दुकिनी स्यान्महाजालिनी च सा ।

"भृज्जति **भार्गी**" इति **क्षीरस्वामी**; "भृगुजा" इत्येके, तस्याम् । "वृणोति वर्वरः" इति **क्षीरस्वामी**, "बर्ब् गतौ, बर्बरः" इत्यन्ये, "ऋच्छि-चटि-वटि-" [हैमोणादिसू० ३९७] इत्यरः, स्वार्थिके के **बर्बरकः** । **पद्मा** पद्माभपुष्पा । "वृगृट् वरणे" वृणोति वर्दः, "शा-शपि-मनि-कनिभ्यो दः" [हैमोणादिसू० २३७] इति बहुवचनाद् दः, स्वार्थिके के **वर्दकः** । अङ्गाराभा वल्ल्योऽस्या अङ्गारवल्ली, स्वार्थिके के **अङ्गारवल्लिका** ॥२७४॥

गर्दभानां शाक इव **गर्दभशाकः**, गर्दभानां उपभोग्यत्वात् । **ब्राह्मणी** पवित्रत्वात् । हन्ति रोगं **हञ्जी**, "उटजादयः" [हैमोणादिसू० १३४] इत्यजे निपात्यते । ब्राह्मणानां यष्टिका **ब्राह्मणयष्टिका** । आवर्तके साध्वी **आवर्तक्या**, "तत्र साधौ" [सिद्ध० ७. १. १५] इति यः । चर्मेव रङ्गोऽस्याः **चर्मरङ्गा** । विभायुक्तान्यण्डान्यस्या **विभाण्डी** । पीठोऽस्त्यस्याः **पीठिका** । लाति **लता**, "पृषिरञ्जि-"[हैमोणादिसू० २०८] इति किदतः ॥२७५॥

रक्तानि पुष्पाण्यस्या **रक्तपुष्पी**, "असत्काण्ड-प्रान्त-" [सिद्ध० २. ४. ५६] इति ङीः । बिन्दुकाः सन्त्यस्याः **बिन्दुकिनी** । महाजालोऽस्त्यस्याः **महाजालिनी** । आह च—

भार्गी गर्दभशाकश्च पद्मा ब्राह्मणयष्टिका ।
अङ्गारवल्ली हञ्जी च वर्दो बर्बरकस्तथा ॥
शुक्रमाता च कासघ्नी भृगुजा भार्गवपर्णिनी ।
[धन्व० वर्ग १ श्लोक ६८-६९] इति ।

तथा च—

हञ्जिका ब्राह्मणी पद्मा भार्गी ब्राह्मणयष्टिका ॥
अङ्गारवल्ली वालेयशाक-वर्वर-वर्दकाः ।
[अमर० का० २ वर्ग ४ श्लो० ८९–९०] इति ।

एतस्या लोके 'भाडंगि' इति प्रसिद्धिः ।

---

१ वन्दको नि० ॥ २ पिच्छिका नि० ॥

नाकुल्यां स्यादक्षिपीडा नेत्रपीडा विसर्पणी ॥२७६॥
शङ्खिनी दृढपादा च यवतिक्ता यशस्करी ।

नकुलस्येयं **नाकुली**, "तस्येदम्" [सिद्ध० ६. ३. १६०] इत्यण् ; न आकुलयति वा, नखादित्वात् साधुः, तस्याम् । अक्ष्णः पीडा अस्याः **अक्षिपीडा** । एवं **नेत्रपीडा** । "सृप्लृं गतौ" विसर्पति **विसर्पणी**, अनट् ॥२७६॥

शङ्खो विद्यतेऽस्याः **शङ्खिनी** । दृढः पादो मूलेऽस्याः **दृढपादा** । यवाः तिक्ता अस्याः **यवतिक्ता** । यशः करोति **यशस्करी** । आह च—

यवतिक्ता शङ्खिनी च दृढपादा विसर्पणी ।
नाकुली चाक्षिपिण्डा च चित्रमाला यशस्करी ॥
[धन्व० वर्ग १ श्लो० २५६] इति ।

एतस्या लोके 'जवासी' इति प्रसिद्धिः ।

तेजस्विन्यां पारिजाता शीताऽश्वघ्नी महौजसी ॥२७७॥
तेजोवती तेजनी च तेजोह्वा वल्कलेति च ।

तेजो विद्यतेऽस्याः **तेजस्विनी** , तस्याम् । पारिणः—पारवतोऽब्धेर्जाता **पारिजाता** । श्यायते स्म **शीता**, "श्यः शीर्द्रव-मूर्ति-" [सिद्ध० ४.१.९७] इति शीरादेशः । अश्वं हन्ति **अश्वघ्नी**, "अचित्ते टक्" [सिद्ध० ५.१. ८३] इति टक् । महद् ओजोऽस्या **महौजसी** ॥२७७॥

तेजो विद्यतेऽस्याः **तेजोवती** । तेजयति **तेजनी** । "ह्वेङ् आह्वाने" तेजःशब्देन ह्वयते **तेजोह्वा** । "वलि वल्लि संवरणे" वलते **वल्कला**, "वलि-पुषेः कलक्" [हैमोणादिसू० ४९६] इति कित् कलः प्रत्ययः । आह च—

तेजस्विनी तेजवती तेजोह्वा तेजनी तिजा ।
अश्वघ्नी वल्कला शीता पारिजाता महौजसी ॥
[धन्व० वर्ग १ श्लो० २५६] इति ।

एतस्या लोके 'तेजवती' इति प्रसिद्धिः ।

मिस्रेयायां तालपर्णी छत्रा शीतशिवो मिसिः ॥२७८॥
शालेयो मधुरिका च शालीनस्तालकर्ण्यपि ।

---

१ °डा नेत्रमूला विस° नि० ॥ २ वृद्धपादा च यवतिक्ताऽऽयसोश्वरा नि० ॥ ३ पीताऽश्वघ्ना नि० ॥ ४ °ल्कलेत्यपि नि० ॥

मस्यति–परिणमति **मिस्रेया,** "गय-हृदयादयः" [हैमोणादिसू० ३७०] इत्यये निपात्यते, तस्याम् । ताल इव पर्णान्यस्या **तालपर्णी,** "पाक-कर्ण-पर्ण-" [सिद्ध० २.४. ५५] इति ङीः । छत्राभपत्रत्वात् **छत्रा** । शीतं शिनोति **शीतशिवः,** "प्रह्लाह्ल-" [हैमोणादिसू० ५१४] इति वे निपात्यते । "मिश मश रोषे च" मिश्यते **मिसिः,** "नाम्युपान्त्य-" [हैमोणादिसू० ६०९] इति किः, "पृषोदरादित्वाद् दन्त्यः सकारः । "मस्यति–परिणमते **मिसिः**" इति **क्षीरस्वामी** ॥२७८॥

शालायां भवः **शालेयः,** गुप्तत्वात् , "भवे"[सिद्ध० ६. ३. १२३] इत्येयण्, शालते इति वा, "गय-हृदयादयः" [हैमोणादिसू० ३७०] इत्यये निपात्यते । मधु विद्यतेऽत्र मधुरा, "मध्वादिभ्यो रः" [सिद्ध० ७.२. २६] इति रः; माद्यत्यनया वा, "श्वशुर-कुकुन्दुर-" [हैमोणादिसू० ४२६] इत्युरे निपात्यते, स्वार्थिके के **मधुरिका** । शालाप्रवेशनमर्हति **शालीनः,** "शालीन-कौपीन-" [सिद्ध० ६.४. १८५] इति निपात्यते । ताल इव कर्णः–पत्रमस्याः **तालकर्णी,** "पाक-कर्ण-पर्ण-" [सिद्ध० २.४.५५] इति ङीः । आह च—

मिस्रेया तालकर्णी च तालपर्णी मिसिस्तथा ।
शालेयः स च शालीनो नाम्ना शीतशिवो मतः ॥
[धन्व० वर्ग २ श्लो० ४] इति ।

एतस्या लोके 'व्रीहाली' इति प्रसिद्धिः ।

पथिकायां तु तुलसी तालपत्री लवङ्गकम् ॥२७९॥
कन्दपत्री त्वचं पत्री तलपत्रकमुन्दुरा ।

पथोऽस्त्यस्याः **पथिका,** 'अतोऽनेकस्वरात्" [सिद्ध० ७.२. ६] **इतीकः,** तस्याम् । "तुलण् उन्माने" तोल्यते **तुलसी,** "फनस-" [हैमोणादिसू० ५७३] इति निपात्यते । ताल इव पत्राण्यस्यास्**तालपत्री** । लवङ्गप्रतिकृति **लवङ्गकम्** , "तस्य तुल्ये कः संज्ञा-प्रतिकृत्योः" [सिद्ध० ७.१. १०८] इति कः ॥२७९॥

कन्दाकाराणि पत्राण्यस्याः **कन्दपत्री** । त्वचति–वृणोति **त्वचम्** , अच् । पतति **पत्री,** "नी-दाव्-" [सिद्ध० ५.२. ८८] इति त्रट् । तल इव पत्रमस्य तलपत्रम्, के **तलपत्रकम्** । "उदैप् क्लेदने" उनत्ति **उन्दुरा,** "वाश्यसि-वासि-" [हैमोणादिसू० ४२३] इत्युरः । आह च—

१ कन्दपत्रत्वचं पत्राऽमलपत्रकमुत्तरा नि० ॥

तालीसकं तु तालीसं पत्रं तालीसपत्रकम् ।
तद्वदामलकीपत्रं पत्राढ्यं च सुखादनम् ॥
[धन्व० वर्ग २ श्लो० ५३] इति ।
पथिका तुलसी पत्री कालपत्री त्वचं तथा ।
लवङ्गपत्री कन्दा स्यादुन्दुरा नलपत्रकम् ॥
[ ] इति ।

एतस्य लोके 'तालीसपत्र' इति प्रसिद्धिः । **अन्ये** तु भेदं मन्यन्ते । आह च—

तालीसपत्रं तालीसं धात्रीपर्णं शुकोदरम् ।
अपरं पथिकापत्रं पत्राढ्यं तुलसी छदम् ॥
[ ] इति ।

मांस्यां पेशी कृष्णजटा नलदा जटिला जटा ॥२८०॥
तपस्विन्यामिषी हिंस्रा क्रव्यादी पिशिता च सा ।

"समांसत्वाद् **मांसी**" इति **क्षीरस्वामी**, तस्याम् । "पिशंत् अवयवे" पिंशति पेशिः, "किलि-पिलि-" [हैमोणादिसू० ६०८] इति इः, ङ्यां **पेशी** । कृष्णा जटा अस्याः **कृष्णजटा** । नलं वति **नलदा**, "आतो डो-" [सिद्ध० ५.१.७६] इति डः । जटाः सन्त्यस्याः **जटिला**, "काला-जटा-घाटात् क्षेपे" [सिद्ध० ७.२.२३] इतीलः । अभ्रादित्वादप्रत्यये **जटा** ॥२८०॥

अत एव तपो विद्यते अस्याः **तपस्विनी**, "अस्-तपो-माया-मेधा-" [सिद्ध० ७.२.४७] इति विन् प्रत्ययः । मांसयुक्तत्वाद् **आमिषी**; अम्यते वा **आमिषी**, "अमि-मृभ्यां णित्" [हैमोणादिसू० ५४९] इतीषः । **हिंस्रा**, हिंसकत्वात् । क्रव्यमत्ति **क्रव्यादी** । पिंशति **पिशिता**, "कुशि-पिशि-" [हैमोणादिसू० २१२] इति किदितः । आह च—

मांसी कृष्णजटा हिंस्रा नलदा जटिलाऽऽमिषी ।
जटा च पिशिता मेषी क्रव्यादी च तपस्विनी ॥
[धन्व० वर्ग ३ श्लो० ४५] इति ।

एतस्या लोके 'छड' इति प्रसिद्धिः ।

गन्धमांस्यां पुनः केशी भूतकेशी पिशाचिका ॥२८१॥
सुलोमशा भूतजटा पूतना केशिकेत्यपि ।

गन्धोपलक्षिता मांसी **गन्धमांसी**, तस्याम् । **केशी** केशाकारत्वात् । क्लिश्यति वा **केशी**, "क्लिशः के च" [हैमोणादिसू० ५३०] इति शः ।

भूतोपलक्षिता केशी **भूतकेशी** । पिशाचाः सन्त्यस्यां **पिशाचिका,** "अतोऽनेकस्वरात्" [सिद्ध० ७.२.६] इतीकः ॥२८१॥

सुतरां लोमानि श्यति **सुलोमशा** । भूत इव भूतानां वा जटा अस्या **भूतजटा** । "पूग्श् पवने" पूयते **पूतना,** "पू-पूभ्यां कित्" [हैमोणादिसू० २९३] इति कित् तनः । केशाः सन्त्यस्यां **केशिका,** "अतोऽनेकस्वरात्" [सिद्ध० ७.२.६] इतीकः । आह च—

द्वितीया गन्धमांसी च केशी भूतजटा स्मृता ।
पैशाची पूतना केशी भूतकेशी सुलोमशा ॥
[धन्व० वर्ग ३ श्लो० ४७] इति ।

मांसीभेदोऽयम् । कृष्णेयम् । आह च—

मांसी जटा भूतकेशी क्रव्यादा नलदा शिवा ।
कृष्णाऽन्या पूतना केशी गन्धमांसी पिशाचिका ॥
[ ] इति ।

सुरायां सुरभिर्दैत्या गन्धाढ्या गन्धमादनी ॥२८२॥
भूरिगन्धा गन्धवती कुटी गन्धकुटी च सा ।

"सुरत् वेष्टने" सुरति **सुरा,** दैत्याख्यत्वात्, "नाम्युपान्त्य-" [सिद्ध० ५.१.५४] इति कः, तस्याम् । सुतरां रमते **सुरभिः,** "पदि-पठि-" [हैमोणादिसू० ६०७] इत्यादिना इः । दैत्ये साधुः **दैत्या** । यद् **विश्वः**—

दैत्योऽसुरे सुरायां तु दैत्या चण्डौषधावपि ।
[ ] इति ।

गन्धेन आढ्या **गन्धाढ्या** । गन्धेन मदयति **गन्धमादनी,** रम्यादित्वादनटि बाहुलकाद् ह्रस्वाभावः, टित्वाद् ङीः ॥२८२॥

भूरिः—प्रचुरो गन्धोऽस्याः **भूरिगन्धा** । गन्धो विद्यतेऽस्यां **गन्धवती** । "कुटत् कौटिल्ये" कुटति **कुटी,** गौरादित्वाद् ङीः । गन्धस्य कुटी—घटी **गन्धकुटी** । आह च—

मुरा गन्धवती दैत्या गन्धाढ्या गन्धमादनी ।
सुरभिर्भूरिगन्धा च कुटी गन्धकुटी स्मृता ॥
[धन्व० वर्ग ३ श्लो० ६७] इति ।

एतस्या लोके 'एकांगी' इति प्रसिद्धिः ।

प्रपुण्डरीके पौण्डर्यं सानुजं पौण्डरीयकम् ॥२८३॥
प्रपौण्डरीकं चक्षुष्यं सत्पुष्पं सानुमानकम् ।

प्रकर्षेण पुणति पुण्ड्यते वा **प्रपुण्डरीकम्**, "सृणीका-ऽस्तीक-" [हैमोणादिसू० ५०] इतीके निपात्यते, तत्र । पुण्डरीकशब्दस्यैकदेशानुकाराद् लोपे पुण्डरीकस्येदं **पौण्डर्यम्**, दाहहत्त्वात् । सानौ जातं **सानुजम्**, "क्वचित्" [सिद्ध० ५.१.१७१] इति डः । पुण्डरीकस्येदं पौण्डरीयम्, के **पौण्डरीयकम्** ॥२८३॥

प्रकर्षेण पुण्डरीकस्येदं **प्रपौण्डरीकम्**, दाहहत्त्वात्, "तस्येदम्" [सिद्ध० ६.३.१६०] इत्यण् । चक्षुषे हितं **चक्षुष्यम्**, "प्राण्यङ्ग-" [सिद्ध० ७.१,३७] इति यः । सन्ति पुष्पाण्यस्य **सत्पुष्पम्** । सानौ मान्यते सानुमानम्, के **सानुमानकम्** । आह च—

प्रपौण्डरीकं चक्षुष्यं पौण्डर्यं पुण्डरीयकम् ।
पौण्डरीकं शतपुष्पं सुपुष्पं सानुमानकम् ॥
[धन्व० वर्ग ३ श्लो० ९२] इति ।

एतस्य लोके 'पद्म' इति प्रसिद्धिः । "स्थलपद्मम्" इति **गौडः** ।

जतूकायां तु जतुका जतुकृच्चक्रवर्तनी ॥२८४॥
जन्तुका जतुकारी च संस्पर्शा जननी जनी ।

जतु करोति **जतूका**, "क्वचित्" [सिद्ध० ५.१.१७१] इति डः, पृषोदरादित्वाद् दीर्घः, तस्याम् । जायतेऽस्याः जतु, "मनि-जनिभ्यां ध-तौ च" [हैमोणादिसू० ७२१] इत्युः तकारश्च, जत्वेव **जतुका** । जतु करोति **जतुकृत्** । चक्रेण वर्तते **चक्रवर्तनी** ॥२८४॥

जायते जन्तुः, "कृसि-कम्यमि-" [हैमोणादिसू० ७७३] इति तुन्, स्वार्थिके के **जन्तुका** । जतु करोति **जतुकारी**, कर्मण्यण् । सङ्गतः स्पर्शोऽस्याः **संस्पर्शा** । जायतेऽस्यां **जननी**, "करणाऽऽधारे" [सिद्ध० ५.३.१२९] इत्यनट् । जायतेऽस्यां **जनी**, गौरादित्वाद् ङीः । आह च—

जन्तुवारा जन्तुकृष्णा जतुका रजनी स्मृता ।
जननी चैव संस्पर्शा जतुका चक्रवर्तनी ॥
[धन्व० वर्ग ४ श्लो० ८८] इति ।

एतस्या लोके 'जंतुवार' इति प्रसिद्धिः ।

मांसरोहायां विकसा वृन्ता चर्मकशा रुहा ॥२८५॥

मांसे रोहः—प्ररोहोऽस्याः **मांसरोहा**, तस्याम् । विकसति **विकसा** । वृणोति **वृन्ता**, "पुत-पित्त-" [हैमोणादिसू० २०४] इति ते निपात्यते । चर्मकशेव **चर्मकशा** । रोहति—प्रादुर्भवति **रुहा**, "नाम्युपान्त्य-" [सिद्ध० ५.१.५४] इति कः ।

आह च—

मांसरोहिण्यतिरुहा वृन्ता चर्मकशा कशा ।
विकसा मांसरोहा च रुहा रक्ता प्रकीर्तिता ॥
[धन्व० वर्ग ४ श्लो० ९४] इति ।

एतस्या लोके 'रोहा' इति प्रसिद्धिः ॥२८५॥

रक्तपाद्यां नमस्कारी समाङ्गाऽञ्जलिकारिका ।
गण्डकाली शमीपत्रा रास्ना खदिरिका च सा ॥२८६॥

रक्तः पादोऽस्याः **रक्तपादी**, तस्याम् । नमस्करोति **नमस्कारी** । समान्यङ्गान्यस्याः **समाङ्गा** । अञ्जलिं कारयति **अञ्जलिकारिका**, अञ्जलितपत्रत्वात्, णके आप् । गण्डेषु—ग्रन्थिषु काली **गण्डकाली** । शम्याकाराणि पत्राण्यस्याः **शमीपत्रा** । रसत्यनया **रास्ना**, "रसेर्वा" [हैमोणादिसू० २६०] इति विकल्पेन णिद् नः । "खद हिंसायाम्" खदति खदिरी, "मदि-मन्दि-" [हैमोणादिसू० ४१२] इति इरः, गौरादित्वाद् ङीः, स्वार्थिके के **खदिरिका** । आह च—

रक्तपादी शमीपत्रा समाङ्गाऽञ्जलिकारिका ।
नमस्कारी गण्डकाली नाम्ना(? रास्ना) खदिरिका मता ॥
[धन्व० वर्ग ४ श्लो० १०९] इति ।

एतस्या लोके 'खयरी' इति प्रसिद्धिः ॥२८६॥

तद्विशेषस्त्रिपादी स्यात् सुपादी हंसपादिका ।
विषग्रन्थिर्हंसपदी घृतमण्डलकोऽपि च ॥२८७॥

तस्याः—रक्तपाद्या विशेषस्तद्विशेषः 'स्याद्' भवेत् त्रयः पादा अस्याः **त्रिपादी** । शोभनाः पादा अस्याः **सुपादी** । हंस इव पादा अस्या हंसपादी, के **हंसपादिका** । विषयुक्तो ग्रन्थिरस्या **विषग्रन्थिः** । हंस इव पदमस्या **हंसपदी** । घृतस्य मण्डलकः **घृतमण्डलकः** । आह च—

---

१ वृत्ता चर्मकषा रुहा नि० ॥ २ °मण्डलिकाऽपि नि० ॥

रक्तपाद्यपरा प्रोक्ता विषग्रन्थिस्त्रिपाद्यपि ।
हंसपादी हंसपदी घृतमण्डलकश्च सा ॥
[धन्व० वर्ग ४ श्लो० १११] इति ।

एतस्या लोके 'हंसपदी' इति प्रसिद्धिः ॥२८७॥

अथ स्याज्जलपिप्पल्यां शारदी शकुलादनी ।
मत्स्यादनी मत्स्यगन्धा लाङ्गली तोयपिप्पली ॥२८८॥

जलस्य पिप्पली **जलपिप्पली**, तस्याम् । शरदि—ऋतुविशेषे भवा **शारदी**, "भर्तु-सन्ध्यादेरण्" [सिद्ध० ६. ३.८९] इत्यण् , "अणञेये-" [सिद्ध० २.४.२०] इति ङीः । **शकुलादनी**, मत्स्यभक्षणात् । अत एव **मत्स्यादनी** । मत्स्यस्येव गन्धोऽस्या **मत्स्यगन्धा** । **लाङ्गली** हलाकारत्वात् । तोयस्य पिप्पली **तोयपिप्पली** । **अम्बु-पिप्पल्यपि** । आह च—

जलपिप्पल्यभिहिता शारदी तोयपिप्पली ।
मत्स्यादनी मत्स्यगन्धा लाङ्गली शकुलादनी ।
[धन्व० वर्ग ४ श्लो० ६४] इति ।

एतस्या लोके 'जलपिंपली' इति प्रसिद्धिः ॥२८८॥

शिवमल्ल्यां पाशुपतः सुव्रतो वसुको बुकः ।
कुलपुष्पः किण्वमूलः पाण्डुराङ्गः[1] प्रियः कुलः ॥२८९॥

शिवप्रिया मल्ली **शिवमल्ली** । उक्तं च—

बुकं बिल्वं सधुत्तूरं सुमना पाटला तथा ।
पद्ममुत्पल-गोसूर्यमष्टौ पुष्पाणि शङ्करे ॥
[ ] इति ।

तस्याम् । पशुपतेः प्रियोऽयं **पाशुपतः**, "तस्येदम्" [सिद्ध० ६-३.१६०] इत्यण् । शोभनो व्रतोऽस्य **सुव्रतः** । वस्ते—छादयति वसुः, "भृ-मृ-तॄ-त्सरि-" [हैमोणादिसू० ७१६] इत्युः, स्वार्थिके के **वसुकः** । "वसति **वसुकः**" **इत्यपरे**, "कञ्चुकांशुक-" [हैमोणादिसू० ५७] इत्युके निपात्यते । "वांक् गति-गन्धनयोः" **वाति बुकः**, "कञ्चुकांशुक-" [हैमोणादिसू० ५७] इत्युके निपातनात् साधुः । "वेकः" इति **प्राच्याः** प्रोचुः । कुले पुष्पति **कुलपुष्पः** । किण्वं मूलेऽस्य **किण्व-**

---

१ पाण्डुरोगप्रियः नि० ॥

मूलः। पाण्डुरमङ्गमस्य **पाण्डुराङ्गः**। प्रीणाति **प्रियः**, "नाम्युपान्त्य-" [सिद्ध० ५.१.५४] इति कः। "कुल बन्धु-सन्तानयोः" कोलति "**कुलः**, "नाम्युपान्त्य-" [सिद्ध० ५.१.५४] इति कः। आह च—

बुको वसुक इत्युक्तः शिवाङ्कः शिवशेखरः।
महापाशुपतश्चैव सुव्रतः शिवमल्लिका ॥
[धन्व० वर्ग ४ श्लो० १९] इति।

एतस्य लोके 'बूअ' इति प्रसिद्धिः ॥२८९॥

अतिविषायां तु विश्वा भङ्गुरा श्वेतकन्दिका।
उपविषा श्यामकन्दा शृङ्गी प्रतिविषा विषा ॥२९०॥

अतिक्रान्ता विषाद् **अतिविषा**, तस्याम्। "विशंत् प्रवेशने" विशति अन्तः **विश्वा**, "निघृषि-" [हैमोणादिसू० ५११] इति किद् वः। भज्यते इत्येवंशीला **भङ्गुरा**, "भञ्जि-भासि-मिदो घुरः" [सिद्ध० ५. २.७४] इति घुरः। श्वेतः कन्दोऽस्याः **श्वेतकन्दा**, स्वार्थिके के **श्वेतकन्दिका**। उप—समीपे विषमस्या **उपविषा**। श्यामः कन्दोऽस्याः **श्यामकन्दा**। "शृङ्गयुक्तत्वात् **शृङ्गी**" इति क्षीरस्वामी। "शृणाति रोगान् **शृङ्गी**" **इत्यपरे**, "शृङ्ग-शार्ङ्गादयः" [हैमोणादिसू० ९६] इति गे निपात्यते, गौरादित्वाद् ङीः। प्रतीपा विषस्य **प्रतिविषा**, अगदत्वात्। वेवेष्टि **विषा**। आह च—

अतिविषा शुक्लकन्दा ज्ञेया विश्वा च भङ्गुरा।
श्यामकन्दा प्रतिविषा शृङ्गी चोपविषा विषा ॥
[धन्व० वर्ग १ श्लो० १०] इति।

एतस्या लोके 'अतिविसु' इति प्रसिद्धिः ॥२९०॥

मेदायां स्यान्मणिच्छिद्रा मधुरा शालपर्ण्यपि।

"मिदि मिदक् स्निहि" इति **कविकल्पद्रुम**धातुपाठोक्तेः मेदयति **मेदा**, तस्याम्। मणीनां छिद्रमस्या **मणिच्छिद्रा**। मधु विद्यते अस्या **मधुरा**, "मध्वादिभ्यो रः" [सिद्ध० ७.२.२६] इति रः; माद्यति अनया वा, "श्वशुर-कुकुन्दुर-" [हैमोणादिसू० ४२६] इत्युरे निपात्यते। शाल इव पर्णान्यस्याः **शालपर्णी**, "पाक-कर्ण-पर्ण-" [सिद्ध० २.४.५५] इति ङीः।

महामेदायां तु वसुच्छिद्रा देवमणिर्वसुः ॥२९१॥

॥ इत्याचार्यश्रीहेमचन्द्रविरचिते निघण्टुशेषे
द्वितीयो गुल्मकाण्डः ॥२॥

---

१ °विषाऽरुणा नि० ॥

महती चासौ मेदा च **महामेदा**, तस्याम् । वसूनां छिद्रमस्या **वसुच्छिद्रा** । देवश्चासौ मणिश्च **देवमणिः** । वसति **वसुः**, "भृ-मृ-तृ-त्सरि-" [हैमोणादिसू० ७१६] इत्युः । आह च—

मेदा ज्ञेया मणिच्छिद्रा माल्यवर्णाऽधराऽपि च ।
महामेदा देवमणिर्वसुच्छिद्रा प्रकीर्तिता ॥
[धन्व० वर्ग० १ श्लो० १२७] इति ।

मेदाविशेषोऽयम् । अनयोर्लोके 'मेद' इति प्रसिद्धिः ॥२९१॥

॥ इति श्रीमद्बृहत्खरतरगच्छे श्रीजिनराजसूरिशिष्यश्रीजयसागर-
महोपाध्यायपट्टानुक्रमायातवाचनाचार्य-
श्रीभानुमेरुगणिशिष्यसमस्त-
प्रशस्तग्रन्थावलि-
विचक्षणश्रीज्ञानविमलोपाध्याय-
शिष्यवाचनाचार्यश्रीश्रीवल्लभगणिविरचितायां
श्रीहेमचन्द्राचार्यकृतनिघण्टुशेषटीकायां गुल्मकाण्डो द्वितीयः
समाप्तः ॥२॥



३

[तृतीयो लताकाण्डः]

॥ अर्हम् ॥ अथ तृतीयं लताकाण्डं व्याख्यायते —

गुञ्जायां कृष्णला काकचिञ्चिका काकनिन्दिका ।
काकादनी काकनखी रक्तिका काकनन्तिका ॥२९२॥

काकपीलुश्चक्रशल्या दुर्मेषा ताम्रिकोच्चटा ।
चूडामणिर्द्रुमोद्घा[1] च शीतपाकी शिखण्डिनी ॥२९३॥

"क्षीज कूज गुज गुजु अव्यक्ते शब्दे" गुञ्जति शिम्ब्यां **गुञ्जा,** तस्याम् । कृष्णं प्रान्ते लाति **कृष्णला** । काकपर्णा चिञ्ची—प्रान्तोऽस्याः काकचिञ्ची, स्वार्थिके के **काकचिञ्चिका** । काक इव निन्द्यते श्यामवर्णेन **काकनिन्दिका** । काकैरद्यते **काकादनी** । काकस्येव नखोऽस्याः **काकनखी** । रक्तो वर्णोऽस्त्यस्या **रक्तिका,** "अतोऽनेकस्वरात्" [सिद्ध० ७.२.६] इतीकः । काकान् अन्तयति **काकनन्तिका,** पृषोदरादित्वात् ॥२९२॥

काकानां पीलुरिव **काकपीलुः** । चक्राकारं शल्यमस्याः **चक्रशल्या** । दुष्टो मेषोऽस्या **दुर्मेषा** । ताम्रो वर्णोऽस्त्यस्याः **ताम्रिका,** "अतोऽनेकस्वरात्" [सिद्ध० ७.२.६] इतीकः । "चट् च भेदे" उच्चटति **उच्चटा** । चूडायां मणिः **चूडामणिः** । द्रुमेषु उद्घा **द्रुमोद्घा** । शीतेन पाकोऽस्याः **शीतपाकी,** "पाक-कर्ण-पर्ण-" [सिद्ध० २. ४-५५] इति ङीः । शिखण्डोऽस्त्यस्याः **शिखण्डिनी** । आह च—

काकादनी काकपीलुः काकशिम्बिश्च रक्तिका ।
चक्रशल्या ध्वाङ्क्षनखी द्रुमोद्घा काकनन्तिका ॥

चूडामणिः शीतपाकी शिखण्डा कृष्णला मता ।
उच्चटा ताम्रिका गुञ्जा [चटकी काकसाह्वया] ॥
[धन्व० वर्ग ४ श्लो० २७,२९] इति ।

एतस्या लोके 'चिणउठी' इति प्रसिद्धिः ॥२९३॥

---

१ °द्रुमौघा च शतपाकी नि० ॥

पाठायां श्रेयसी पापचेलिका [1]विद्धकर्णिका।
वृकतिक्ता [2]वनतिक्ता प्राचीना स्थापनी वृकी ॥२९४॥
एकाष्ठीला रसाऽम्बष्ठाऽम्बष्ठकी वृकदन्तिका।

पाठ्यते **पाठा**, तस्याम्। अतिशयेन प्रशस्या **श्रेयसी**, "गुणाङ्गाद्वेष्ठेयसू" [सिद्ध० ७.३.९] इति ईयसौ प्रत्यये "प्रशस्यस्य श्रः" [सिद्ध० ७.४.३४] इति श्रादेशः। पापा चासौ चेली च पापचेली, वृकीत्वात्, "निन्द्यं कुत्सनैरपापाद्यैः" [सिद्ध० ३.१.१००] इति समासः, स्वार्थिके के **पापचेलिका**। बिद्धौ कर्णौ यया सा विद्धकर्णी, शास्त्रे श्रूयमाणत्वात्, स्वार्थिके के **विद्धकर्णिका**। वृक इव तिक्तरसा **वृकतिक्ता**। वने तिक्तरसा **वनतिक्ता**। प्राचि भवा **प्राचीना**। स्थाप्यते **स्थापनी**, बस्तिकर्मोपयोग्या। "कुकि वृकि आदाने" वर्कते **वृकी**, 'नाम्युपान्त्य-" [सिद्ध० ५.१.५४] इति कः। वृणातीति वा, "विचिपुषि-" [हैमोणादिसू० २२] इति कित् कः ॥२९४॥

एकः अष्ठीलः—मज्जा अस्या **एकाष्ठीला**। रस्यते **रसा**। अमति **अम्बष्ठा**। "पष्ठैधिठादयः" [हैमोणादिसू० १६६] इति ठे निपात्यते, "कीचक-पेचक-" [हैमोणादिसू० ३३] इत्यके निपातनाद् **अम्बष्ठकी**। वृकस्य इव दन्ता अस्या वृकदन्ती के **वृकदन्तिका**। आह च—

पाठाऽम्बष्ठाऽम्बष्ठकी च प्राचीना पापचेलिका।
वृकतिक्ता वनतिक्ता पापिका स्थापनी वृकी ॥

[धन्व० वर्ग १ श्लो० ७०] इति।

एतस्या लोके 'पाठ' इति प्रसिद्धिः।

शतावर्यौ बहुसुता पीवरीन्दीवरी वरी ॥२९५॥
[3]शतमूली शतपदी शतवीर्या मधुस्रवा।
नारायणी द्वीप[4]शत्रुर्द्वीपिकाऽभीरुपत्रिका ॥२९६॥
महापुरुषदत्तोर्ध्वकण्टका वरकण्टका।
सहस्रवीर्या तुङ्गिन्यभीरुः संवरणीत्यपि ॥२९७॥

शतेन आवृणोति **शतावरी**, तस्याम्। बहुधा सुवति **बहुसुता**, "सुसि-तनितुसेर्दीर्घश्च वा" [हैमोणादिसू० २०३] इति कित् तः प्रत्ययः। पीयते **पीवरी**,

१ वृद्धकर्णिका नि० ॥ २ वरतिक्ता नि० ॥ ३ शतमूला नि० ॥ ४ द्विपिशत्रु० नि० ॥

"तीवर-धीवर-" [हैमोणादिसू० ४४४] इति वरटि निपात्यते। "प्यैङ् वृद्धौ" प्यायते वा **पीवरी**, "ध्या-प्योर्धी पी च" [हैमोणादिसू० ९०८] इति कनिप् प्रत्ययः पी इत्यादेशश्च। **इन्दीवरी**, उत्पलपुष्पत्वात्। वृणोति **वरी** ॥२९५॥

शतं—बहूनि मूलान्यस्याः **शतमूली**। शतं—बहूनि पदान्यस्याः **शतपदी**। शतं—बहु वीर्यमस्याः **शतवीर्या**। मधु स्रवति **मधुस्रवा**। नारायणस्येयं **नारायणी** विष्णुजाता, "तस्येदम्" [सिद्ध० ६.३.१६०] इत्यण्। द्वीपिनः शत्रुरिव **द्वीपिशत्रुः**। द्वीपो विद्यतेऽस्या **द्वीपिका**। न भीरूणि पत्राण्यस्याः अभीरुपत्री, स्वार्थिके के **अभीरुपत्रिका** ॥२९६॥

महापुरुषेण दत्ता **महापुरुषदत्ता**। ऊर्ध्वं कण्टकान्यस्या **ऊर्ध्वकण्टका**। वराः कण्टका अस्या **वरकण्टका**। सहस्रं—बहु वीर्यमस्या **सहस्रवीर्या**। तुङ्गो विद्यतेऽस्याः **तुङ्गिनी**। न भीरुः **अभीरुः** स्थिरपत्रा। संव्रियते **संवरणी**। आह च—

शतावरी शतपदी पीवरीन्दीवरी वरी।
ऋक्षप्रोक्ता द्वीपिशत्रुर्द्वीपिका वरकण्टका ॥
सह[स्र]वीर्याऽभीरुश्च तुङ्गिनी बहुपत्रिका।
महापुरुषदत्ता च शतावर्यूर्ध्वकण्टका ॥
[धन्व० वर्ग १ श्लो० २९१, २९३] इति।

एतस्या लोके 'शतावरी' इति प्रसिद्धिः ॥२९७॥

कटुकायां मत्स्यपित्ता रोहिणी कटुरोहिणी।
अशोकरोहिणी कृष्णभेदा तिलकरोहिणी ॥२९८॥
कटम्बरा काण्डरुहा रास्ना तिक्तकरोहिणी।
तिक्ताऽरिष्टा कटुर्मत्स्या चक्राङ्गी शकुलादनी ॥२९९॥

कटति **कटुः**, "भृ-मृ-तॄ-त्सरि-" [हैमोणादिसू० ७१६] इत्युः, स्वार्थिके के **कटुका**, तस्याम्। मत्स्यपित्तास्वादा मत्स्यानां पित्तं—जीवितं वा **मत्स्यपित्ता**। रोहत्यङ्गं **रोहिणी**। कटुश्चासौ रोहिणी च **कटुरोहिणी**। नास्ति शोकोऽस्या अशोका, सा चासौ रोहिणी च **अशोकरोहिणी**। **शोकरोहिणी**त्यपि। कृष्णो भेदः—छेदोऽस्याः **कृष्णभेदा**। तिलकं रोहयति **तिलकरोहिणी** ॥२९८॥

कटति—आवृणोति गलं **कटम्बरा**, "जठर-क्रकर-" [हैमोणादिसू० ४०३] इत्यरे निपात्यते। काण्डे रोहति **काण्डरुहा**, "नाम्युपान्त्य-" [सिद्ध० ५.१.५४]

१ कटम्भरा नि० ॥

इति कः। रसति **रास्ना**, "रसेर्वा" [हैमोणादिसू० २६०] इति नः। तिक्तकस्य रोहिणी **तिक्तकरोहिणी**। तेजयति **तिक्ता**, "पुत-पित्त-" [हैमोणादिसू० २०४] इति ते निपात्यते। न रिष्यते– न हिंस्यते **अरिष्टा**, "शी-री-" [हैमोणादिसू० २०१] इति बहुवचनात् कित् तः। **कटु**शब्दसाधनाऽत्रैव प्रागुक्ता। **मत्स्या** मत्स्यपित्तत्वात्। चक्राकारमङ्गमस्याः **चक्राङ्गी**। शकुलैरद्यते **शकुलादनी**। आह च—

कटुका मत्स्यशकुला मत्स्यपित्ता च रोहिणी।
कृष्णभेदा चन्द्ररुहा नाम्ना(? रास्ना) कटुकरोहिणी॥
अशोका रोहिणी तिक्ता चक्राङ्गी शकुलादनी।
कटुरोहिण्यरिष्टा च प्रोक्ता तिक्तकरोहिणी॥

[धन्व० वर्ग १ श्लो० ३७–३८] इति।

एतस्या लोके 'कडू' इति प्रसिद्धिः॥२९९॥

कपिकच्छूरात्मगुप्ता कण्डुरा दुरभिग्रहा।
अजहा मर्कटी व्यण्डा कच्छुरा कपिकच्छुरा॥३००॥
ऋष्यप्रोक्ता शूकशिम्बिर्लाङ्गली प्रावृषायणी।
[2]ऋषभी वह्निपर्याया कपिरोमा दुरालभा॥३०१॥

कपीन् कषति **कपिकच्छूः**, स्त्रीलिङ्गः, "कषेर्ण्ड-छौ च षः" [हैमोणादिसू० ८३१] इति, "कष हिंसायाम्" इत्यस्माद् ऊः प्रत्ययः षकारस्य च छादेशः, तस्याम्। आत्मना गुप्ता स्पर्शाविषयत्वाद् **आत्मगुप्ता**। कण्डूं राति **कण्डुरा**, "क्वचित्" [सिद्ध०५.१.१७१] इति डे पृषोदरादित्वाद् ह्रस्वे च साधुः। दुःखेन अभिगृह्यते **दुरभिग्रहा**। न जहाति शूकान् **अजहा**। मर्कटीव **मर्कटी**, कपिरोमफलत्वात्। विगतोऽण्डोऽस्या **व्यण्डा**। "न विगताण्डा **अव्यण्डा**" इति **क्षीरस्वामी**। कच्छूरस्यस्याः **कच्छुरा**, "कच्छ्वा डुरः" [सिद्ध० ७.२.३९] इति डुरः। कपीनां कच्छुरा **कपिकच्छुरा**॥३००॥

ऋष्यैः—मृगैः प्रोक्ता—दर्शिता **ऋष्यप्रोक्ता**। "ऋषिभिरप्रोक्ता वा, हेयत्वात्" इ-त्येके। शूकप्रधाना—सकण्टका शिम्बिरस्याः **शूकशिम्बिः**। लाङ्गलीव **लाङ्गली**, हलाकारत्वात्। प्रावृषि भवा **प्रावृषायणी**। "ऋषत् गतौ" ऋषति **ऋषभी**, "ऋषि वृषि-" [हैमोणादिसू० ३३१] इति किदभः। यदाह—

---

१ °कच्छा मध्यगुप्ता नि० ॥ २ आर्यभी नि० ॥

ऋषभी तु शूकशिम्ब्याम् [ ] इति ।

वह्नेः पर्यायोऽस्या **वह्निपर्याया**। कपीनां रोमेव रोमास्याः **कपिरोमा** । अत एव **कपिरोमफला**। दुःखेन आलभ्यते **दुरालभा**। आह **चेन्दुः**—

ऋष्यप्रोक्ता स्वयंगुप्ता कपिकच्छूश्च कण्डुरा ।
आत्मगुप्ता दुरालम्भा लाङ्गली दुरभिग्रहा ॥
अन्यण्डा वृषभी गुप्ता कण्डूरा शूकशिम्बिका ।
कपिरोमफला चैव समाना सुविषायणी ॥
ज्ञेया जाङ्गलिका सैव साऽजहा प्रावृषायणी ॥
[ ] इति ।

एतस्या लोके 'कउंछि' इति प्रसिद्धिः ॥३०१॥

मञ्जिष्ठायां रक्तयष्टिः समङ्गा विकसाऽरुणा ।
भण्डीरी मञ्जुका भण्डी मञ्जिर्योजनवल्लिका ॥३०२॥
कालमेषी कालगोष्ठी मण्डूकपर्णिकाऽपि च ।

मञ्जौ—मनोज्ञे वर्णे तिष्ठति **मञ्जिष्ठा**, "गो-ऽम्बा-ऽम्ब-" [सिद्ध० २.३.३०] इति षत्वम्, पृषोदरादित्वादुकारस्य इत्वम्। "**मञ्जि**रिति इकारान्तोऽयम्" इत्यपरे। रक्ता यष्टिरस्याः **रक्तयष्टिः**। समन्ताद् अङ्गति—गच्छति **समङ्गा**। विकसति दूरं **विकसा**। **अरुणा** रक्तत्वात्; इयर्ति अर्यते वा, "ऋ-कॄ-वॄ-धॄ-दारिभ्य उणः" इत्युणः। "भडुङ् परिभाषणे" भण्ड्यते **भण्डीरी**, "जम्बीरा-ऽभीर-" [हैमोणादिसू० १९६] इतीरे निपात्यते। मञ्जुवर्णत्वाद् **मञ्जुका**। भण्ड्यते **भण्डी**। "मजि ध्वनौ" सौत्रः, मञ्जति **मञ्जिः**, "पदि-पठि-पचि-" [हैमोणादिसू० ६०७] इति आदिशब्दादिः। योजनस्य वल्लिका **योजनवल्लिका**, दूरप्रसरेत्यर्थः ॥३०२॥

काले मिष्यते—झटचते **कालमेषी**, घञ् प्रत्ययः। कालस्य गोष्ठी **कालगोष्ठी**। मण्डूक इव पर्णान्यस्या मण्डूकपर्णी, स्वार्थिके के **मण्डूकपर्णिका**। आह च—

मञ्जिष्ठा कालमेषी च समङ्गा विकसाऽरुणा ।
मञ्जुला रक्तयष्टिश्च भण्डी योजनवल्ल्यपि ॥
[धन्व० वर्ग १ श्लो० १७] इति ।

आहेन्दुः—

विकसा कालमेषी च कालगोष्ठी च जिङ्गिका ।

---

१ जिङ्गी योजनवल्ल्यपि नि० ॥

रक्ता भण्डीरिका च [ ] इति ।

एतस्या लोके 'मजीठि' इति प्रसिद्धिः ।

मरिचे मलिनं कृष्णं वेल्लजं धार्मपत्तनम् ॥३०३॥
यवनेष्टं शिरोवृत्तमूषणं कोलकं च तत् ।

म्रियते जिह्वा अनेन **मरिचम्**, "मृ-त्रपिभ्यामिचः" [हैमोणादिसू० ११७] इतीचः, तत्र । **मलिनं** वर्णेन । **कृष्णं** वर्णेन; कर्षति तैक्ष्ण्याद्वा "घृ-वी-ह्वा-" [हैमोणादिसू० १८३] इति किद् णः । वेल्ले–वेल्लातटे जायते **वेल्लजम्** । "**विल्लाख्यः** शाखी" **इत्येके** । धर्मपत्तने भवं **धार्मपत्तनम्**, "भवे" [सिद्ध० ६.३.१२३] इत्यण् ॥३०३॥

यवनानामिष्टं–प्रियं **यवनेष्टम्** । **यवनप्रियमपि** । शिरसि वृत्तं–वृत्ताकारं **शिरोवृत्तम्** । ऊषति–रुजति **ऊषणम्** । कोलति–संस्त्यायति **कोलकम्** । आह च—

मरिचं मलिनं श्यामं वेल्लजं कृष्णमूषणम् ।
यवनेष्टं शिरोवृत्तं कोलकं धार्मपत्तनम् ॥
[धन्व० वर्ग २ श्लो० ८८] इति ।

एतस्य लोके 'मिरी' इति प्रसिद्धिः ।

पिप्पल्यां चपला कृष्णा वैदेही मागधी कणा ॥३०४॥
शौण्डी श्यामोषणा कोलोपकुल्या कृष्णतण्डुला ।

पलति आतुरं **पिप्पली**, "पॄ-पलिभ्यां टित् पिप् च पूर्वस्य" [हैमोणादिसू० ११] इति अः प्रत्ययः, तस्याम् । "चप सान्त्वने" चपति **चपला**, "मृदि-कन्दि-" [हैमोणादिसू० ४६५] इत्यादिना अलः । कर्षति [कर्फं] **कृष्णा** तैक्ष्ण्यात्, "घृ-वी-ह्वा-" [हैमोणादिसू० १८३] इति किद् णः; श्यामत्वाद्वा । **विदेह**देशे भवा **वैदेही**, "भवे" [सिद्ध०६.३.१२३] इत्यण् । **मगध**देशे भवा **मागधी**, "भवे" [सिद्ध०६.३.१२३] इत्यण् । कणाः सन्त्यस्याः **कणा**, अभ्रादित्वादः ॥३०४॥

शौण्डीव **शौण्डी**, शक्तत्वात् । **श्यामा** वर्णेन; "श्यैङ् गतौ" श्यायते वा, "विलि-भिलि-"[हैमोणादिसू० ३४०] इति किन्मः । उषति–रुजति **उषणा** पञ्चमस्वरादिः । **ओषणा**ऽपि, त्रयोदशस्वरादिरयम् । "कुल संस्त्याने" कोलति **कोला** । उपकोलति–संस्त्यायति **उपकुल्या**, "कुलेर्ड् च वा" [हैमोणादिसू०३६२] इत्यनेन "कुल बन्धु-संस्त्यानयोः" इत्यस्मात् किद् यः प्रत्ययः । कृष्णाः तण्डुला अस्याः **कृष्णतण्डुला** ।

१ °बृन्तमूषणं नि० ॥

आह च—

पिप्पली मागधी कृष्णा चपला तीक्ष्णतण्डुला ।
उपकुल्या कणा श्यामा कोला शौण्डी तथोषणा ॥
[धन्व० वर्ग २ श्लो० ७३] इति ।

इन्दुश्च—

पिप्पली तण्डुलफला वैदेही कृष्णतण्डुला ।
[ ] इति ।

एतस्या लोके 'पींपलि' इति प्रसिद्धिः ।

तन्मूलं ग्रन्थिकं सर्वग्रन्थिकं चटकाशिरः ॥३०५॥
[2]सुमूलकं कोलमूलं कटुग्रन्थिकं[3]मोषणम् ।

'तन्मूलं' पिप्पलीमूलं ग्रन्थिप्रतिकृति **ग्रन्थिकम्**, "तस्य तुल्ये कः संज्ञा-प्रतिकृत्योः-" [सिद्ध०७.१.१०८] इति कः । सर्वे ग्रन्थयोऽत्र **सर्वग्रन्थिकम्** । चटकाशिरोरूपत्वात् **चटकाशिरः** ॥३०५॥

शोभनो मूलोऽस्य सुमूलम्, स्वार्थिके के **सुमूलकम्** । कोलायाः मूलं **कोलमूलम्**, पृषोदरादित्वाद् ह्रस्वः । कटु च तद् ग्रन्थिकं च **कटुग्रन्थिकम्** । "उष दाहे" सौत्रः, ओषति **ओषणम्**, नन्द्यादित्वादनः । आह च—

मूलं च पिप्पलीमूलं ग्रन्थिकं चटकाशिरः ।
कोलमूलं कटुग्रन्थि सर्वग्रन्थिकमूलकम् ॥
[धन्व० वर्ग २ श्लो० ७५] इति ।

एतस्य लोके 'पींपलीमूल' इति प्रसिद्धिः ।

चविकायाँ[4] पुनश्चव्यं चवनं कोलवल्ल्यपि ॥३०६॥

च्यव्यते **चविका**, तस्याम्, "शिक्या-ऽऽस्याद्य-" [हैमोणादिसू०३६४] इति ये निपातनात् **चव्यम्**, च्यवते वा **चव्यम्**, स्त्री-क्लीबलिङ्गोऽयम् । अनटि **चवनम्** । कोलस्य—संस्त्यानस्य वल्ली **कोलवल्ली** । आह च—

चविका कोलवल्ली च चव्यं चवनमेव च ।
[धन्व० वर्ग २ श्लो० ७६] इति ।

एतस्या लोके 'चविक' इति प्रसिद्धिः ॥३०६॥

---

१ अभिधानचिन्तामणौ तत्स्वोपज्ञटीकायां च 'चटिकाशिरः' इति दृश्यते ॥ २ समूलकं नि० ॥ ३ °कमूषणम् नि० ॥ ४ °यां तथा चव्यं चवनं काल° नि० ॥

तत्फले वशिरो हस्तिपिप्पली श्रेयसीत्यपि ।

तस्याः—चविकायाः फलं तत्फलम्, तत्र । "वशक् कान्तौ" उश्यते **वशिरः,** पुंल्लिङ्गः, 'क्लीबोऽयम्', **इत्यपरे,** "स्थविर-पिठिर-" [हैमोणादिसू० ४१७] इतीरे निपात्यते । हस्तिनः पिप्पली **हस्तिपिप्पली** । अतिशयेन प्रशस्या **श्रेयसी,** [सिद्ध० ७. ४. ३४] "गुणाङ्गाद्वेष्ठेयसू" [सिद्ध०७.३.९] इति ईयसौ "प्रशस्यस्य श्रः" [सिद्ध० ७. ४.३४] इति श्रादेश; आह च—

तस्याः फलं विनिर्दिष्टं श्रेयसी हस्तिपिप्पली ।
[धन्व० वर्ग २ श्लो० ७८] इति ।

एतस्या लोके 'गजपींपली' इति प्रसिद्धिः। **चन्द्रनन्दन**स्तु सामान्येनाऽऽह—

चव्या कोलाऽथ चविका श्रेयसी गजपिप्पली ।
च्यवनं कोलवल्ली तु चव्यं कुञ्जरपिप्पली ॥
[ ] इति ।

स्यादु गिरिकर्ण्यामास्फोता[1] विष्णुक्रान्ताऽपराजिता ॥३०७॥

गिरिः—अस्मेव कर्णोऽस्याः **गिरिकर्णी,** "पाक-कर्ण-पर्ण-" [सिद्ध०२.४.५५.] इति ङीः, तस्याम् । आ-समन्तात् स्फुटति **आस्फोता,** पृषोदरादित्वात् तकारः । विष्णुना क्रम्यते **विष्णुक्रान्ता** । अत एव रक्षाहेतुत्वाद् **अपराजिता** अप्रतिहता ।

एतस्या लोके 'गिरणई' इति प्रसिद्धिः ॥३०७॥

सा तु श्वेता श्वेतनामा कटभी श्वेतनामिका[2] ।
श्वेतस्यन्दाऽश्वखुरश्च

'तुः' अत्र पुनरर्थे । 'सा' गिरिकर्णिका 'श्वेता' निर्मला । श्वेत इति नाम अस्याः **श्वेतनामा** । "कटे वर्षा-ऽऽवरणयोः" कटति **कटभी,** 'कृ-शृ-गृ-शलि-" [हैमोणादिसू० ३२९] इत्यादिनाऽभः । श्वेतनामैव **श्वेतनामिका** । श्वेतः स्यन्दोऽस्याः **श्वेतस्यन्दा** । अश्वखुर इव **अश्वखुरः** ।

एतस्या लोके 'श्वेतगिरणई' इति प्रसिद्धिः ।

कृष्णा त्वव्यक्तगन्धिका ॥३०८॥

नीलस्यन्दा नीलपुष्पी महाश्वेता[3] गवादनी ।

'तुः' पुनरर्थे । कृष्णा गिरिकर्णी अव्यक्तो गन्धोऽस्याः **अव्यक्तगन्धिका** ॥३०८॥ नीलः स्यन्दोऽस्याः **नीलस्यन्दा** । नीलवर्णानि पुष्पाण्यस्याः **नीलपुष्पी** ।

---

१ गिरिपर्ण्यामरस्फोता नि० ॥ २ श्वेतपुष्पिका नि० ॥ ३ °ताऽङ्गवन्दना नि० ॥

महती चासौ श्वेता च **महाश्वेता**। गावोऽदन्त्यस्यां **गवादनी**, अनटि "स्वरे वाऽनक्षे" [सिद्ध० १.२.२९] इत्यवादेशः।

एतस्या लोके 'काली गिरणई' इति प्रसिद्धिः। आह च—

अश्वखुरः श्वेतपुष्पी श्वेता च गिरिकर्णिका।
कटभी श्वेतनामा च श्वेतस्यन्दाऽपराजिता॥
नीलपुष्पी महाश्वेता गिरिकर्णी गवादनी।
वेशी चात्युग्रगन्धा च नीलस्यन्दा प्रकीर्तिता॥
[धन्व० वर्ग ४ श्लोक ८४–८५] इति।

एतानि सर्वाणि "स्याद् गिरिकर्ण्यामास्फोता" [श्लो० ३०७] इत्याद्यारभ्य गिरिकर्णीनामानि ज्ञेयानि।

स्यादिन्द्रवारुण्यां[1] चैन्द्री विषादनी गवादनी ॥३०९॥
इन्द्रैर्वारुः क्षुद्रफला गोडुम्बा[2] च गवाक्ष्यपि।

इन्द्रवद् अक्षैर्वृणोति **इन्द्रवारुणी**, "ऋ-कृ-वृ-" [हैमोणादिसू० १९६] इत्यादिना उणः, पृषोदरादित्वाद् दीर्घः, तस्याम्। इन्द्रस्येयम् **ऐन्द्री**। विषोऽद्यतेऽनया **विषादनी**। गावोऽदन्त्यस्यां **गवादनी**, "करणा-ऽऽधारे [सिद्ध० ५.३.१२९] इत्यनट्, "स्वरे वाऽनक्षे" [सिद्ध० १.२.२९] इत्यवादेशः ॥३०९॥

इन्द्रस्य एर्वारुरिव **इन्द्रैर्वारुः**। क्षुद्राणि फलान्यस्याः **क्षुद्रफला**। गावोऽदन्ति **गोडुम्बा**, "तुम्ब-स्तम्बादयः" [हैमोणादिसू० ३२०] इति वान्तो निपात्यते। गोरक्षीव **गवाक्षः**, "अक्ष्णोऽप्राण्यङ्गे" [सिद्ध० ७.३.८५] इत्यत् समासान्तः। "गोरिवाक्ष्यस्याः" **इत्यन्ये**, "सक्थ्यक्ष्णः स्वाङ्गे" [सिद्ध० ७.३.१२६] इति टः प्रत्ययः, ["अणञेये-" सिद्ध० २.४.२० इति ङ्यां **गवाक्षी**]। आह च—

ऐन्द्रीन्द्रवारुणीन्द्राह्वा इन्द्रैर्वारुर्विषादनी।
गवादनी क्षुद्रफला विशालाक्षी गवाक्ष्यपि॥
[धन्व० वर्ग १ श्लो० २४८] इति।

एतस्या लोके 'इन्द्रवारुणी' इति प्रसिद्धिः।

द्वितीयेन्द्रवारुण्यां तु चित्रफला महाफला ॥३१०॥
आत्मरक्षा विशाला च त्रपुसी तुम्बसीत्यपि।

'तुः' पुनरर्थे। द्वितीयेन्द्रवारुण्यां चित्राणि फलान्यस्याः **चित्रफला**। महान्ति फलान्यस्याः **महाफला** ॥३१०॥

---

१ °रुणी त्वैन्द्री नि० ॥ २ गोद्गुबा च नि० ॥

आत्मानं रक्षति **आत्मरक्षा** । **विशाला** महाफलत्वात् । "त्रपौषि लज्जायाम्" त्रपते इव **त्रपुसी**, "त्रपेरुसः" [हैमोणादिसू० ५७८] इत्युसः, विधानसामर्थ्यात् षत्वाभावः । 'तुबु अर्दने" तुम्ब्यतेऽनया **तुम्बसी**, "फनस-तामरसादयः" [हैमोणादिसू० ५७३] इत्यसे निपात्यते । आह च—

अन्येन्द्रवारुणी प्रोक्ता विशाला तु महाफला ।
आत्मरक्षा चित्रफला तुम्बसी त्रपुसी च सा ॥
श्वेतपुष्पा मृगाक्षी च मृगेर्वारुर्मृगादनी ।
हस्तिदन्ती नागदन्ती वारुणी गजचिर्भिटी ॥
[धन्व० वर्ग १ श्लो० २५०, २५२] इति ।

वचायामुग्रगन्धोग्रा जटिला शतपर्विका ॥३११॥
इक्षुकर्णिका गोलोमी लोमशा भूतनाशनी ।

वक्त्यनया **वचा**, वाक्पाटवकृत्, भिदादित्वादङ्, तस्याम् । उग्रो गन्धोऽस्या **उग्रगन्धा** । उच्यतेऽनया ओषति—दहति जिह्वामिति वा **उग्रा**, "खुर-क्षुर-" [हैमोणादिसू० ३९६] इति रे निपात्यते । जटाः सन्त्यस्या **जटिला**, "काला-जटा-घाटात् क्षेपे" [सिद्ध० ७.२.२३] इतीलः । शतं—बहूनि पर्वाण्यस्याः **शतपर्विका** ॥३११॥

इक्षुरिव कर्णाः—पत्रमस्या इक्षुकर्णी, "पाक-कर्ण-पर्ण-" [सिद्ध० २.४.५५] इति ङीः, के **इक्षुकर्णिका** । गोरिव लोमान्यस्याः **गोलोमी**, पृषोदरादित्वात् । लोमानि श्यति **लोमशा** । भूतानि नाशयति **भूतनाशनी** ।

एतस्या लोके 'वज' इति प्रसिद्धिः ।

अन्या श्वेतवचा मेध्या षड्ग्रन्था हैमवत्यपि ॥३१२॥

'अन्या' अपरा श्वेता चासौ वचा च **श्वेतवचा** । मेधायां साध्वी **मेध्या**, "तत्र साधौ" [सिद्ध० ७.१.१५] इति यः । षड् ग्रन्थयः—पर्वाण्यस्याः **षड्ग्रन्था**। हिमवत इयं **हैमवती**, "तस्येदम्" [सिद्ध० ६.३.१६०] इत्यण् । श्वेतवचेयम् । आह च—

वचोग्रगन्धा गोलोमी षड्ग्रन्था जटिला तथा ।
जटिला शतपर्वाऽन्या लोमशा हैमवत्यपि ॥
[धन्व० वर्ग २ श्लो० ६] इति ॥३१२॥

---

१ सूतनाशनी नि० ॥

शारिवायां गोपकन्या गोपवल्ली प्रतानिका ।
गोप्यास्फोता लता श्वेता शारदी काष्ठशारिवा ॥३१३॥

नागजिह्वा

शीर्यन्तनया दोषा **शारिवा,** "कैरव-भैरव-" [हैमोणादिसू० ५१९] इत्यवे निपात्यते, तस्याम् । गोपानां कन्येव **गोपकन्या** । गोपानां वल्ली **गोपवल्ली** । प्रतानो विद्यतेऽस्याः **प्रतानिका** । "गुपू रक्षणे" गोपायति **गोपी** । आस्फुटति **आस्फोता,** पृषोदरादित्वात् तकारः । लाति लायते वा **लता,** "पुत-पित्त-" [हैमोणादिसू०२०४] इति ते निपात्यते । श्वेतते **श्वेता** शुक्ला । शरदि भवा **शारदी** । काष्ठस्य शारिवा **काष्ठशारिवा** ॥३१३॥

नागस्य जिह्वा **नागजिह्वा** । आह च—

शारिवा शारदी गोपी गोपवल्ली प्रतानिका ।
गोपकन्या लता सीता श्वेतोक्ता काष्ठशारिवा ॥
[धन्व० वर्ग १ श्लो० १६१] इति ।

तथा च—

शारिवा फणिजिह्वा च गोप्यास्फोताऽथ चन्दना ।
[ ] इति ।

उत्पलशारिवानाम ।

अथ सा कृष्णा भद्रा चन्दनशारिवा ।
भद्रवल्ली कृष्णवल्ली चन्दनोत्पलशारिवा ॥३१४॥

'सा' उत्पलशारिवा 'कृष्णा' श्यामवर्णत्वाद् भन्दते **भद्रा,** "भन्देर्वा" [हैमोणादिसू० ३९१] इति रो नलोपश्च । चन्दनस्य शारिवा **[चन्दनशारिवा]** । भद्रा चासौ वल्ली च **भद्रवल्ली** । कृष्णा चासौ वल्ली च **कृष्णवल्ली** । "चदु दीप्याह्लादनयोः" चन्दति **चन्दना,** "ष्वसि-रसि-" [हैमोणादिसू० २६९] इत्यनः । उत्पलाभपत्रा **उत्पलशारिवा** । आह च—

शारिवाऽन्या कृष्णमूला कृष्णा चन्दनशारिवा ।
भद्रा चन्दनगोपी च चन्दना कृष्णवल्ल्यपि ॥
[धन्व० वर्ग१ श्लो० १६२] इति ।

एतस्या लोके 'चन्दनशारिवा' इति प्रसिद्धिः ॥३१४॥

मूर्वायां मोरटा देवी मधुश्रेणी मधूलिका ।
देवश्रेणी मधुरसा गोकर्णी तेजनी स्रवा ॥३१५॥
धनुःश्रेणी चापगुणा पीलुनी तिक्तवल्कला ।
पीलुपर्णी स्निग्धपर्णी पृथक्त्वग् मधुमत्यपि ॥३१६॥

मूर्वति—बध्नाति **मूर्वा** । अत एव अस्या विकारो **मौर्वी**, तस्याम् । मुरति—संवेष्टयति **मोरटा**, "कपट-कीकटादयः" [हैमोणादिसू० १४४] इत्यटे निपात्यते । दीव्यति **देवी**, गौरादित्वाद् ङीः । मधूनां श्रेणी—पङ्क्तिर्**मधुश्रेणी** । **मधूलिका** माधुर्यात् । देवानां श्रेणी **देवश्रेणी** । मधुः—मधुरो रसोऽस्या **मधुरसा** । गोकर्णाभपत्रत्वाद् **गोकर्णी**, "पाके-कर्ण-पर्ण-" [सिद्ध० २.४.५५] इति ङीः । "तेजयत्यग्निं **तेजनी**" इति **क्षीरस्वामी** । स्रवति रसं **स्रवा**, अच् । "**स्रुवा**" इत्येके ॥३१५॥

धनुषः श्रेणी अस्या **धनुःश्रेणी** । चापस्य गुणः—मौर्व्यास्योऽस्याः **चापगुणा** । "पील प्रतिष्टम्भे" पील्यतेऽनया **पीलुनी**, "पिशि-मिथि-क्षुधिभ्यः कित्" [हैमोणादिसू० २९०] इति बहुवचनात् किदुनः । तिक्तं वल्कलमस्याः **तिक्तवल्कला** । पीलोरिव पर्णान्यस्याः **पीलुपर्णी**, स्निग्धानि पर्णान्यस्याः **स्निग्धपर्णी**, उभयत्र "पाक-कर्ण-पर्ण-" [सिद्ध० २.४.५५] इति ङीः । पृथक् त्वग् विद्यतेऽस्याः **पृथक्त्वग्**। मधु विद्यतेऽस्याः **मधुमती** । आह च—

मूर्वा मधुरसा देवी पृथक्त्वग् पीलुपर्ण्यपि ।
देवश्रेणी स्वादुरसा स्निग्धपर्णी च मोरटा ॥
[धन्व० वर्ग १ श्लो० १३] इति ।

तथा **चेन्दुः**—

स्निग्धच्छदा मधुश्रेणी पृथक्त्वग् रसवाहिनी ।
देवश्रेणी मधुमती सुभङ्गी द्विजमेखला ॥
आतोलनी योगवहा मोरटा च मधुस्रवा ।
सुखोषिता स्निग्धपर्णी गोकर्णी सा मधूलिका ।
पीलुपर्णी कर्मकरी तथा मधुमतीति च ।
[ ] इति ।

एतस्या लोके 'पीलउनी' इति प्रसिद्धिः ॥३१६॥

लाङ्गल्यां हलिनी नन्दा विशल्या गर्भपातनी ।
अनन्ताऽग्निमुखी[1] सैरी दुष्पुष्पी कलिकारिका ॥३१७॥

---

१ °ग्निशिखा शक्रपुष्पिका कलि° नि० ॥

लङ्गति **लाङ्गली**, "नहि-लङ्गेर्दीर्घश्च" [हैमोणादिसू० ४६६] इत्यलः; लाङ्गल इव भेदनाद् वा, तस्याम् । हलो विद्यतेऽस्याः **हलिनी** । नन्दति **नन्दा** । विगतं शल्यमस्या द्रावकत्वाद् **विशल्या**; "शल गतौ" विशलति वा, "स्था-छा-मा-" [हैमोणादिसू० ३५६] इति यः । गर्भं पातयति **गर्भपातनी** । नास्ति अन्तोऽस्या **अनन्ता** । अग्नेरिव मुखमस्या **अग्निमुखी** सोढुमशक्यत्वात् । **अग्निशिखेत्येके** । यदाह—

स्याल्लाङ्गलिक्यग्निशिखा [अमर० का० २ वर्ग ४ श्लो० ११८] इति ।

सीरस्य–हलस्य इयं **सैरी**, भेदनात्, "तस्येदम्" [सिद्ध० ६.३.१६०] इत्यण् । दुष्टानि पुष्पाण्यस्याः **दुष्पुष्पी** । कलिं–कलहं करोति कलिकारी, स्वार्थिके के **कलिकारिका** । आह च—

कलिकारी तु हलिनी विशल्या गर्भपातनी ।
लाङ्गल्यग्निमुखी सैरी दीप्ताऽनन्तेन्द्रपुष्पिका ॥

[धन्व० वर्ग ४ श्लो० ९] इति ।

एतस्या लोके 'राडागारी' इति प्रसिद्धिः ॥३१७॥

गुडूच्यामृता सोमवल्ली वत्सादनी धरा ।
छिन्नोद्भवा छिन्नरुहा विषघ्नी देवनिर्मिता ॥३१८॥

विशल्या कुण्डली लम्बा तन्त्रिका चक्रलक्षणा ।
देव्यनन्ता मधुपर्णी जीवन्त्यमृतवल्ल्यपि ॥३१९॥

गुडति–रक्षति [कफं] **गुडूची**, "गुडेरूचट्" [हैमोणादिसू० १२०] इत्यूचट्, तस्याम् । नास्ति मृतमस्या **अमृता** । सोमस्य वल्ली **सोमवल्ली** । वत्सानामदनं **वत्सादनी** । धरति रसं **धरा**, अच् । छिन्ना सती उद्भवति–प्रकटीभवति **छिन्नोद्भवा** । छिन्ना सती रोहति **छिन्नरुहा**, "नाम्युपान्त्य-" [सिद्ध० ५.१.५४] इति कः । विषं हन्ति **विषघ्नी**, "अचित्ते टक्" [सिद्ध० ५.१.८३] इति टक् । देवैर्निर्मिता **देवनिर्मिता** ॥३१८॥

विगतं शल्यमस्या **विशल्या** । "कुडुङ् दाहे" कुण्डते **कुण्डली**, "मृदि-कन्दि-" [हैमोणादिसू० ४६५] इत्यलः, गौरादित्वाद् ङीः । "लबुङ् अवस्रंसने च" चकाराच्छब्दे, लम्बते **लम्बा** । तन्त्रयते–धारयत्यायुस्तन्त्रिका, णके आप् । चक्रैर्लक्ष्यते **चक्रलक्षणा** । दीव्यति **देवी** । नास्ति अन्तोऽस्या **अनन्ता** । मधूनि पर्णा-

---

१ °ली छचा त° नि० ॥

न्यस्याः **मधुपर्णी** । जीवनाद् **जीवन्ती**, "रुहि-नन्दि-जीवि-प्राणिभ्यष्टिदाशिषि" [हैमोणादिसू० २२०] इति आशिषि टिदन्तः । अमृतस्य वल्ली **अमृतवल्ली** । आह च—

गुडुच्यमृतवल्ली च छिन्ना छिन्नरुहाऽमृता ।
छिन्नोद्भवाऽमृतलता धरा वत्सादनी स्मृता ॥
सैवोक्ता सोमवल्ली च कुण्डली चक्रलक्षणा ।
जीवन्ती मधुपर्णी च तन्त्रिका देवनिर्मिता ॥
वयस्था कुण्डली सौम्या विशल्याऽमृतसम्भवा ।
पिण्डाऽमृता बहुच्छिन्ना सा चोक्ता कन्दरोहिणी ॥
रसायनी कृत्तरुहा स्वरदा ज्वरनाशनी ।
[धन्व० वर्ग १ श्लो० १–४]

मधुपर्णी दाहहरा भिषजां च निवेदिता ।
द्वितीया स्वर्णजीवन्ती तैलपर्णी च कथ्यते ॥
घुणप्रियाऽतिसारघ्नी [ ] इति ।

एतस्या लोके 'गुडूची' इत्येव प्रसिद्धिः ॥३१९॥

देवताडे देवताली वृत्तकोशो गरागरी ।
जीमूतकस्तालकश्च वेण्याखुविषघातिनी ॥३२०॥

देवानां ताडो **देवताडः**, तत्र । देवानां ताली **देवताली** । वृत्तः कोशोऽस्य **वृत्तकोशः** । गरं–विषम् आगिरति **गरागरी**, मूषकविषघ्नत्वात्, स्त्रीलिङ्गः । जीवति जीमूतः "जीवेर्मश्च" [हैमोणादिसू० २१६] इत्यूतः मश्चान्तादेशः, स्वार्थिके के **जीमूतकः** । ताडयते ताडः, ऋफिडादित्वाल्लत्वे तालः, स्वार्थिके के **तालकः** । वेणीव **वेणी** । आखुविषं घातयति **आखुविषघातिनी** । आह च—

जीमूतको देवताडो वृत्तकोशो गरागरी ।
प्रोक्ताऽऽखुविषहा वेणी देवताडी च ताडकः ॥
[धन्व० वर्ग १ श्लो० १७३] इति ।

एतस्य लोके 'देवदाली' इति प्रसिद्धिः ॥३२०॥

कोशातक्यां [2]कृष्णच्छत्रा जाली घोषा सुतिक्तिका ।
मृदङ्गफलिका क्ष्वेडा घण्टाली [3]कृतवेधना ॥३२१॥

---

१ देवदाली वृत्तकोशा नि० ॥ २ कृतच्छत्रा नि० ॥ ३ रक्तवेधना नि० ॥

धामार्गवः पीतपुष्पो महाजाली[1] महाफली ।
कर्कोटकी कोशफली[2] राजकोशातकीति च ॥३२२॥

"अत सातत्यगमने" कोशमतति–गच्छति **कोशातकी**, गौरादित्वाद् ङीः, तस्याम् । कृष्णं छत्रमस्याः **कृष्णच्छत्रा** । जालोऽस्यास्ति **जाली** । "घुषृ शब्दे" घोषति **घोषा** । सुतरां तिक्ता सुतिक्ता, के **सुतिक्तिका** । मृदङ्गाकाराणि फलान्यस्या मृदङ्गफली, के **मृदङ्गफलिका** । क्ष्वेडते **क्ष्वेडा** । घण्टामलति **घण्टाली** । कृतं वेधनमनया **कृतवेधना** ॥३२१॥

धाम इयर्ति **धामार्गवः**, "कैरव-भैरव-" [हैमोणादिसू० ५१९] इत्यवे निपात्यते । पीतानि पुष्पाण्यस्य **पीतपुष्पः** । महांश्चासौ जाली च **महाजाली** जलवितानः । महान्ति फलान्यस्या **महाफली**, "असम्-भस्त्रा-ऽजिनैक-शण-पिण्डात् फलात्" [सिद्ध० २.४.५७] इति ङीः । करोति कर्कोटः, "कपोट-बकोट-" [हैमोणादिसू० १६१] इत्योटे निपात्यते, के **कर्कोटकी** । कोशे–मध्ये फलान्यस्य **कोशफलः** । राज्ञी चासौ कोशातकी च **राजकोशातकी** । आह च—

कोशातकी कृतच्छिद्रा जालिनी कृतवेधना ।
क्ष्वेडा सुतिक्ता घण्टाली मृदङ्गफलिका मता ॥
[धन्व० वर्ग १ श्लो० १९२] इति ।

तथा च—

धामार्गवः कोशफलो राजकोशातकी तथा ।
कर्कोटकी पीतपुष्पी महाजाली तथोच्यते ॥
[धन्व० वर्ग १ श्लो० १८९] इति ।

एतस्या लोके 'कडूई' 'विसाली' 'घींसोडी' इति प्रसिद्धिः ॥३२२॥

हस्तिकोशातकी त्वैभी विशाला कर्कटच्छदा ।

हस्तिनः कोशातकी **हस्तिकोशातकी** । 'तुः' इति पुनरर्थेऽत्र । इभस्येयं **ऐभी**, "तस्येदम्" [सिद्ध० ६.३.१६०] इत्यण् । **विशाला** विस्तीर्णा । कर्कट-स्येव च्छदोऽस्याः **कर्कटच्छदा** ।

क्षीरिण्यां स्यात् पटुपर्णी धर्षणी पीतदुग्धिका ॥३२३॥
फेनक्षीरा हेमक्षीरा पीतक्षीरा करीषिणी ।
हेमाह्वया हेमशिखा हैमवती हिमावती ॥३२४॥

---

१ महाजला महाफला नि० ॥ २ °फला राज° नि० ॥

क्षीरमस्त्यस्याः **क्षीरिणी**, तस्याम् । पट्वनि पर्णान्यस्याः **पटुपर्णी** । धृष्यते अनया **धर्षणी**, "करणाऽऽधारे" [सिद्ध०५.३.१२९] इत्यनट् । पीतं दुग्धमस्याः पीतदुग्धा, स्वार्थिके के **पीतदुग्धिका** ॥३२३॥

फेनयुक्तं क्षीरमस्याः **फेनक्षीरा** । हेमवर्णं क्षीरमस्याः **हेमक्षीरा** । पीतं क्षीरमस्याः **पीतक्षीरा** । करीषाः सन्त्यस्याः **करीषिणी** । हेम्नः आह्वयोऽस्या **हेमाह्वया** । हेम्नः शिखाऽस्याः **हेमशिखा** । हिमवत इयं **हैमवती**, "तस्येदम्" [सिद्ध०६.३.१६०] इत्यण् । हिमो विद्यतेऽस्याः **हिमावती**, "अनजिरादिबहुस्वरशरादीनां मतौ" [सिद्ध०३.२.७८] इति मतौ प्रत्यये दीर्घः । आह च—

क्षीरिणी काञ्चनी क्षीरी पटुपर्णी च धर्षणी ।
तिक्तदुग्धा हैमवती हेमदुग्धा हिमावती ॥
स्वर्णक्षीरी स्वर्णदुग्धा सुवर्णक्षीरिकाऽपि च ।
हिमाह्वा कनकक्षीरी हेमक्षीरा च काञ्चनी ॥
[धन्व० वर्ग १ श्लो० २४०,२४२] इति

एतस्या लोके 'क्षीरिणी' 'स्वर्णक्षीरिणी' च प्रसिद्धिः ॥३२४॥

शङ्खिन्यां स्याद् धनहरी तस्करी चोरपुष्पिका ।
केशिनी ग्रन्थिका चण्डा श्वेतबुध्ना निशाचरी ॥३२५॥

शङ्खोऽस्त्यस्याः **शङ्खिनी**, शौक्ल्यात्, तस्याम् । धनं हरति **धनहरी** । अत एव **तस्करी** । चोरस्य पुष्पं चोरपुष्पी, धनहरीत्वात्, रात्रौ विकासाद् वा, के **चोरपुष्पिका** । केशाः सन्त्यस्याः **केशिनी** । ग्रन्थिरत्रास्ति **ग्रन्थिका**, व्रीह्यादित्वादिकः । चमति अतीव धनं **चण्डा**, "पञ्चमाद् डः"[हैमोणादिसू० १६८] इति डः; चण्डते वा । श्वेतो बुध्नोऽस्याः **श्वेतबुध्ना** । निशायां चरति **निशाचरी**, रात्रौ विकासात् । आह च **चन्द्रनन्दनो**ऽत्र—

चण्डा धनहरी चौरी चोरपुष्पी च तस्करी ।
तथा निशाचरी च स्यात् केशिनी ग्रन्थिकेत्यपि ॥
[ ] इति ।

शङ्खिनीनामानि ॥३२५॥

आखुपर्ण्यां पुष्पश्रेणी [1]न्यग्रोधी शम्बरी वृषा ।
चित्रोपचित्रा [2]रण्डा च प्रत्यक्श्रेणी द्रवन्त्यपि ॥३२६॥

---

१ न्यग्रोधा नि० ॥ २ रण्डाख्युः प्र० नि० ॥

आखुकर्णाभपत्रत्वाद् **आखुपर्णी**, "पाक-कर्ण-पर्ण-" [सिद्ध० २.४.५५] इति ङीः । आखोः कर्ण इव कर्णः– पत्रं यस्याः सा **आखुकर्णी**त्यपि, "पाक-कर्ण-" [सिद्ध० २.४.५५] इति ङीः, तस्याम् । पुष्पाणां श्रेणी अस्याः **पुष्पश्रेणी** । न्यग् रोहति रुणद्धि वा बहुमूलत्वात् **न्यग्रोधी**, लिहादित्वादचि "वीरुन्न्यग्रोधौ" [सिद्ध०४.१.१२१] इति साधुः । शं वृणोति **शम्बरी**, अच्, गौरादित्वाद् ङीः । वर्षति **वृषा**, "नाम्युपान्त्य-" [सिद्ध० ५.१.५४] इति कः । "वृणोति वा" इति **क्षीरस्वामी**, पृषोदरादित्वात् साधुः । **वृषपर्णी**त्यपि । **चित्रा** अनेकवर्णपत्रा । उप–समीपे चित्राण्यस्या **उपचित्रा** । रम्यते रमते वा **रण्डा**, "पञ्चमाद् डः" [हैमो-णादिसू० १६८] इति डः । **"चण्डा"** इत्यमरः । प्रतीची श्रेणी अस्याः **प्रत्य-क्श्रेणी** । द्रवति **द्रवन्ती**, शतृप्रत्ययः । आह च—

द्रवन्ती शम्बरी चित्रा न्यग्रोधी मूषकाह्वया ।
प्रत्यक्श्रेणी वृषा रण्डा पुत्रश्रेण्याखुपर्णिका ॥
[धन्व० वर्ग १ श्लो० २२९] इति ।

तथा च—

चित्रोपचित्रा न्यग्रोधी द्रवन्ती शम्बरी वृषा ॥
प्रत्यक्श्रेणी सुतश्रेणी चण्डा मूषकपर्ण्यपि ।
[अमर० का० २ वर्ग ४ श्लो० ८७–८८] इति ।

एतस्या लोके 'उंदिरकनी' इति प्रसिद्धिः ॥३२६॥

पद्मिन्यां तु महावल्ली बिशिनी बिशवत्यपि ।
पलाशिनी नालीकिनी नलिनी पुटकिन्यपि ॥३२७॥

पद्ममस्त्यस्याः **पद्मिनी**, "मन्-मा-ऽब्जादेर्नाम्नि" [सिद्ध० ७.२.६७] इति इन् प्रत्ययः, तस्याम् । महती चासौ वल्ली च **महावल्ली** । बिशमस्त्यस्याः **बिशिनी** । बिशं विद्यतेऽस्याः **बिशवती** । पलाशाः सन्त्यस्यां **पलाशिनी** । नालीक-मस्त्यस्या **नालीकिनी** । नलिनमस्त्यस्या **नलिनी** । पुटकमस्त्यस्याः **पुटकिनी** । सर्वेऽप्येते "मन्-मा-ऽब्जादेर्नाम्नि" [सिद्ध० ७.२.६७] इति इन्प्रत्यये साधवः । आह च—

पद्मिनी स्यात् पुटकिनी नलिनी च कुमुद्वती ।
पलाशिनी पद्मवती वनखण्डं स चाऽऽकरः ॥
[धन्व० वर्ग ४ श्लो० १५७] इति ।

एतस्या लोके 'पोयणि' इति प्रसिद्धिः ॥३२७॥

कमले नलिनं पद्ममरविन्दं कुशेशयम् ।
परं शत-सहस्राभ्यां पत्रं राजीव-पुष्करे ॥३२८॥
बिसप्रसूतं नालीकं तामरसं महोत्पलम् ।
तज्जलात् सरसः पङ्कात् परै रुड्-रुह-जन्म-जैः ॥३२९॥

काम्यते श्रिया **कमलम्**, "मृदि-कन्दि-" [हैमोणादिसू० ४६५] इत्यलः; कम्– अम्भः अलति भूषयति वा; केन शिरसा मल्यते–धार्यते इति वा, तत्र । "णल गन्धे" नलति **नलिनम्**, "श्या-कठि-खलि-नलि-" [हैमोणादिसू० २८२] इत्यादिना इनः । पद्यते भृङ्गैः **पद्मम्**, "अर्तीरि-" [हैमोणादिसू० ३३८] इति मः । एते पुं-क्लीबलिङ्गाः । अरान् विन्दति **अरविन्दम्**, "नि-गवादेर्नाम्नि" [सिद्ध० ५.१.६१] इति शः । कुशे–जले शेते **कुशेशयम्**, "शय-वासि-वासेष्वकालात्" [सिद्ध० ३.२.२५] इति सप्तम्यलुप् । शत-सहस्रशब्दाभ्यां **परं पत्रम्**, शत-सहस्रे बहूपलक्षणम्, शतं सहस्रं च पत्राण्यस्य **शत्रपत्रम् सहस्रपत्रम्** । राज्यः–रेखाः सन्त्यस्य **राजीवम्**, मण्यादित्वाद् वः । "पुषंच् पुष्टौ" पुष्यति जले **पुष्करम्**, "सू-पुषिभ्यां कित्" [हैमोणादिसू० ४३६] इति कित् करः ॥ ३२८॥

बिसात् प्रसूतं **बिसप्रसूतम्** । **बिसप्रसून**मपि । "णल गन्धे" नलति **नालीकम्**, पुं-क्लीबलिङ्गः, "सृणीका-ऽस्तीक-" [हैमोणादिसू० ५०] इतीके निपात्यते । "तमूच् काङ्क्षायाम्" तम्यते **तामरसम्**, "फनस-तामरसादयः" [हैमोणादिसू० ५७३] इत्यसे निपात्यते; तामः–सप्रकर्षो रसोऽस्येति वा, तामः प्रकर्षार्थः, तारतम्यवत्; ताम्यद्भिः–भृङ्गैरस्यते वा । महच्च तदुत्पलं च **महोत्पलम्** । 'तत्' इति कमलम् जलशब्दात् सरःशब्दात् पङ्कशब्दाच्च परै रुडादिभिरुच्यते इत्यर्थः । **जलरुट् जलरुहं जलजन्म जलजम्, सरोरुट् सरोरुहं सरोजन्म सरोजम्, पङ्करुट् पङ्करुहं पङ्कजन्म पङ्कजम्** । यौगिकत्वाद् **वारिरुड्-वारिज-सरसीरुहा-**दयोऽवसेयाः । आह च—

कमलं श्वेतमम्भोजं सारसं सरसीरुहम् ।
सहस्रपत्रं श्रीगेहं शतपत्रं कुशेशयम् ॥
पङ्केरुहं तामरसं राजीवं पुष्करं कुहम् ।
अब्जमम्भोरुहं पद्मं पुण्डरीकं च पङ्कजम् ॥

नलं सरोजं नलिनमरविन्दं महोत्पलम् ।

[ ] इति ।

एतस्य लोके 'श्वेतकमल' इति प्रसिद्धिः ॥३२९॥

पुण्डरीकं सिताम्भोजं

"पुणत् शुभे" पुणति **पुण्डरीकम्**, पुण्डते वा, "सृणीका-ऽस्तीक-" [हैमोणादिसू० ५०] इतीके निपात्यते । सितं—श्वेतमम्भोजं **सिताम्भोजम्** ।

अथ रक्तसरोरुहे ।

रक्तोत्पलं कोकनदं

रक्तं च तत् सरोरुहं च **रक्तसरोरुहम्**, तत्र । रक्तं—शोणमुत्पलं **रक्तोत्पलम्** । कोकैः—चक्रवाकैर्नदति **कोकनदम्** । "कोकाः— चक्राह्वा नदन्त्यस्मिन्" इति **क्षीरस्वामी** । आहुश्च—

रक्ताब्जे रक्तकुमुदे बुधैः कोकनदं स्मृतम् ।

[शाश्वत० श्लो० ५४०] इति ।

कैरविण्यां कुमुद्वती ॥३३०॥

कैरवाणि सन्त्यस्यां **कैरविणी**, तत्र । कुमुदानि सन्त्यस्यां **कुमुद्वती**, "नड-कुमुद-" [सिद्ध० ६.२.७४] इति डिद् मतुः प्रत्ययः; व्यञ्जनान्तात् कुमुच्छब्दाद्वा "तदस्यास्त्यस्मिन्निति मतुः" [सिद्ध०७.२.१] इति मतुः । **कुमुदिनी**त्यपि ॥३३०॥

उत्पले स्यात् कुवलयं कुवेलं कुवलं कुवम् ।

उत्पिबति **उत्पलम्**, पुं-क्लीबलिङ्गः, "मुरलोरल-" [हैमोणादिसू० ४७४] इत्यले निपात्यते; उत्पलतीति वा, तत्र । कौ वलति—प्राणिति **कुवलयम्**, "कु-गु-वलि-" [हैमोणादिसू० ३६५] इत्ययः; कुत्सितं बहिर्वलयं—पत्रवेष्टनमस्य वा । "वेल्ट चलने" कौ वेलति **कुवेलम्** । "कुङ् शब्दे" कवते भृङ्गारावैः **कुवलम्**, पुं-क्लीबलिङ्गः, "कोर्वा" [हैमोणादिसू० ४६९] इति किदलः; कौ वलतीति वा । "वांक् गति-गन्धनयोः" कुत्सितं वातीति **कुवम्**, "क्वचित्" [सिद्ध० ५.१.१७१] इति डः । अस्य विशेषानाह—

श्वेते तु तत्र कुमुदं कैरवं गर्दभाह्वयम् ॥३३१॥

'तत्र' उत्पले श्वेते काम्यते **कुमुदम्**, पुं-क्लीबलिङ्गः, "कुमुद-" [हैमोणादिसू० २४४] इत्युदे निपात्यते; कौ मोदते इति वा । **कुमुद्** इत्यपि । करोति

सुखं **कैरवम्** "कैरव-भैरव-" [हैमोणादिसू० ५१९] इत्यवे निपात्यते; के **रौति**–शब्दायते केरवः–हंसः, तस्येदं प्रियमिति वा । गर्दभस्याऽऽह्वयोऽस्य **गर्दभाह्वयम्** ॥३३१॥

नीले तु स्यादिन्दीवरं

'तुः' अत्र पुनरर्थे । नीले उत्पले इन्दति श्रिया **इन्दीवरम्**, "तीवर-धीवर-" [हैमोणादिसू० ४४४] इति वरटि निपात्यते ।

हल्लकं रक्तसन्ध्यके ।

हलति–घूर्णते **हल्लकम्** . "कीचक-पेचक-" [हैमोणादिसू० ३३] इत्यकान्तो निपात्यते । रक्तान् सन्धीन् अकति–याति प्राप्नोति **रक्तसन्ध्यकम्**, रक्तं सन्ध्येव वा, तत्र । रक्तोत्पलं चैतत् ।

सौगन्धिके तु कह्लारं

सुगन्धः प्रयोजनमस्य **सौगन्धिकः**, "प्रयोजनम्" [सिद्ध० ६.४.११७] इतीकण् । कल्यते **कह्लारम्** . "द्वार-श्रृङ्गार-" [हैमोणादिसू० ४११] इत्यारे निपात्यते; के ह्लादते वा, पृषोदरादित्वात् साधुः । शारदं शुक्लं चैतत् ।

बीजकोशे वराटकः ॥३३२॥

कर्णिका

बीजानां–पद्माक्षनाम्नां कोशो **बीजकोशः**, तत्र । वरमटति **वराटकः** । यत् **शाश्वतः**—

बीजकोशे सरोजस्य कपर्दे च वराटकः ।
[श्लो० १८०] इति ॥३३२॥

असत्यपि कर्णभवत्वे रूढत्वात् कर्णे भवा **कर्णिका**, "कर्ण-ललाटात्-" [सिद्ध० ६.३.१४१] इति कल् ।

पद्मनाले तु मृणालं तन्तुलं बिसम् ।

पद्मस्य नालं **पद्मनालम्**, तत्र । "मृणत् हिंसायाम्" मृण्यते–अर्द्यते **मृणालम्**, त्रिलिङ्गः, "कुलि-पिलि-" [हैमोणादिसू० ४७६] इति किदालः; मृदमालीयते वा, "क्वचित्" [सिद्ध० ५ १.१७१] इति डे पृषोदरादित्वात् साधुः । तन्तून् लाति **तन्तुलम्**, "क्वचित्" [सिद्ध० ५.१.१७१] इति डः । "वींक् प्रजनादिषु" वेति **बिसम्**, "पटि-वीभ्याम्-" [हैमोणादिसू० ५७९] इति डिसः; विस्यते–प्रेर्यते वा ।

आह च—

बिसं मृणालं बिसिनी मृणाला स्यान्मृणालिका ।
मृणालं पद्मनालं तु तन्तुलं नलिनीरुहम् ॥
[धन्व० वर्ग ४ श्लो० १६१] इति ।

एतस्य लोके 'बिसु' इति प्रसिद्धिः ।

किञ्जल्के केसरं

किञ्चिद् जलति **किञ्जल्कम्**; किं—कुत्सितं जीर्यते वा, "निष्क-तुरुष्क-" [हैमोणादिसू० २६] इति के निपात्यते, तत्र । के सरति, **केसरम्** । पुं-क्लीबलिङ्गावेतौ । आह च—

पद्मकेसरमापीतं किञ्जल्कं किञ्जमेव च ।
मकरन्दं तथा तुङ्गं गौरं काञ्चनमेव च ॥
[धन्व० वर्ग ४ श्लो० १६५] इति ।

एतस्य लोके 'केसर' इति प्रसिद्धिः ।

नव्यदले संवर्तिका भवेत् ॥३३३॥

नव्यदलं—पद्मादीनां नवोद्भिन्नं दलं सैरयन्त्रकाख्यम्[1], तत्र । संवर्त्तयति—वेष्टयति **संवर्तिका**, णके आप्, 'भवेद' इति स्यात् ॥३३३॥

कन्दे पाद्मे करहाट-शिफे

कनति—दीप्यते कन्दः, "शा-शपि-" [हैमोणादिसू० २३७] इति दः; कन्द्यते—अन्विष्यते वा, पुं-क्लीबलिङ्गः, तत्र । पद्मस्यायं पाद्मः, "तस्येदम्" [सिद्ध० ६.३.१६०] इत्यण्, तत्र 'पाद्मे' पद्मसम्बन्धिनि । कं रहयन्ति कराहाः—पद्मादयो जलोत्थाः, तान् अटति—प्राप्नोति **करहाटः**; कीर्यते वा, "कपाट-विराट-" [हैमोणादिसू० १४८] इत्याटे निपात्यते । शिनोति—दारयति क्ष्मां **शिफा**, तालव्यादिः, "शफ-कफ-शिफा-शोफादयः' [हैमोणादिसू० ३१६] इति फप्रत्यये निपात्यते ।

शालूकमौत्पले ।

"शल गतौ" शलति **शालूकम्**, "शल्यणेर्णित्" [हैमोणादिसू० ५९] इत्यूकः । उत्पलानामिदम**ौत्पलम्**—उत्पलसम्बन्धि, तत्र । आह च—

पद्ममूलं तु शालूकं शकलं करहाटकम् ।
शालीनं पद्मकन्दं तु जलालूकं निगद्यते ॥
[धन्व० वर्ग ४ श्लो० १६३] इति ।

अनयोर्लोके 'पद्ममूल' इति प्रसिद्धिः ।

---

१ 'शरयन्त्रकाख्यम्' इति अभिधानचिन्तामणिस्वोपज्ञटीकायाम् ॥

पद्मबीजे तु पद्माख्यं पद्मकर्कटिकेत्यपि ॥३३४॥

पद्मानां बीजं **पद्मबीजम्**, तत्र । पद्ममित्याख्याऽस्य **पद्माख्यम्** । पद्मानां कर्कटी पद्मकर्कटी, स्वार्थिके के **पद्मकर्कटिका** । आह च—

पद्मबीजं तु गालोडचं पद्माह्वं पद्मकर्कटी ।
[धन्व० वर्ग ४ श्लो० १५९] इति । 5

एतस्य लोके 'गंठ' इति प्रसिद्धिः ॥३३४॥

वारिपर्ण्यां तु पानीया पृष्ठगा कुम्भिका हठः ।

वारि पिपर्त्ति **वारिपर्णी**, "चिक्कण-कुक्कण-" [हैमोणादिसू० १९०] इत्यणे निपात्यते, तस्याम् । पीयते **पानीया** । पृष्ठं गच्छति **पृष्ठगा** । कुम्भोऽस्यस्याः **कुम्भिका**, "अतोऽनेकस्वरात्" [सिद्ध० ७.२.६] इतीकः । 10

"कुम्भीको वारिपर्णः स्यात्" । [ ] **इत्येके** ।

"हठ बलात्कारे" हठति **हठः**, अच् । यदाह—

"हठोऽम्बुपर्ण्यां प्रसभे" [हैमानेका० श्लो० १२४] इति ।

'फंगा' नाम शाकम् । 'शूषा' **इत्येके** ।

जलशूके जलनीली नीली शैवाल-शैवले ॥३३५॥ 15

॥ इत्याचार्यश्रीहेमचन्द्रविरचिते निघण्टुशेषे
तृतीयो लताकाण्डः ॥

जलस्य शूकमिव **जलशूकम्**, पुं-क्लीबलिङ्गः, तत्र । जलं नीलयति **जलनीली**, अण् प्रत्ययः ; "णील वर्णे" नीलति **नीली**, अच् , गौरादित्वाद् ङीः; नीलवर्णा वा । शेते अम्भसि **शैवालम् शैवलम्**, "शीङस्तलक्-पाल-वालण्-वलण्-वलाः" [हैमो- 20 णादिसू० ५०१] इत्यनेन वालण्-वलण्प्रत्ययौ । **शेवालमिति** तु **शैपालेत्यस्य** जपादित्वाद् वत्वे साधु । **शैवलं शेपालं शैवलं** च नीलिकाख्येयम् ॥३३५॥

॥ इति श्रीमद्बृहत्खरतरगच्छे श्रीजिनराजसूरिशिष्यश्रीजयसागरमहोपाध्यायपट्टानुक्रमवाचनाचार्यधुर्यश्रीभानुमेरुगणिशिष्यसमस्तप्रशस्तग्रन्थावलीविचक्षणश्रीज्ञानविमलोपाध्यायशिष्य- 25
वाचनाचार्यश्रीश्रीवल्लभगणिविरचितायां
श्रीहेमचन्द्राचार्यकृतनिघण्टुशेषटीकायां लताकाण्डः
तृतीयः समाप्तः ॥३॥

४

[चतुर्थः शाककाण्डः]

॥ अर्हम् ॥ अथ चतुर्थं प्रस्तावप्राप्तं शाककाण्डं व्याक्रियते—

शतपुष्पायां तु घोषा शताह्वा माधवी मिसिः[1]।
अतिच्छत्रा छत्रपुष्प्यवाक्पुष्पा कारवी सहा ॥३३६॥

शतं—बहूनि पुष्पाण्यस्याः **शतपुष्पा,** "असत्काण्ड-प्रान्त-शतैकाऽञ्चः पुष्पात्" [सिद्ध० २.४.५६] इति अञ्चो वर्जनाद् ङीर्न भवति, तस्याम् । घोषति **घोषा** । शतमित्याह्वाऽस्याः **शताह्वा** । मधुन इयं **माधवी,** "तस्येदम्" [सिद्ध० ६.३. १६०] इत्यण् । "मिश मश रोषे च" तालव्यान्ताविमौ, मिश्यते **मिसिः,** "नाम्युपान्त्य-"[हैमोणादिसू० ६०९] इति किदिः, पृषोदरादित्वाद् दन्त्यः सकारः, स्त्रीलिङ्गः । छत्रमतिक्रान्ता **अतिच्छत्रा** । **शतच्छत्रा**ऽपि । छत्राकाराणि पुष्पाण्यस्याः **छत्रपुष्पी,** "असत्काण्ड-प्रान्त-" [सिद्ध० २.४.५६] इति ङीः । अवाञ्चि—अधोमुखानि पुष्पाण्यस्याः **अवाक्पुष्पा,** "असत्काण्ड-प्रान्त-शतैकाऽञ्चः पुष्पात्" [सिद्ध० २.४.५६] इति सूत्रेण अञ्चो वर्जनाद् ङ्यभावः । आबन्त एवायम् । कारोरियं **कारवी** कर्मण्या, "तस्येदम्" [सिद्ध० ६.३. १६०] इत्यण् । सहते **सहा** । आह च—

शतपुष्पा मिसिर्घोषा शिफका माधवी शिफा ।
अतिच्छत्रा त्ववाक्पुष्पा शताह्वा कारवी स्मृता ॥
[धन्व० वर्ग २ श्लो० १] इति ।

तथा च—

शतपुष्पा शतच्छत्रा[ऽतिच्छत्रा] मधुरा मिसिः ।
अवाक्पुष्पा कारवी च [अमर० का० २ वर्ग ४ श्लो० १५२] इति ।

एतस्या लोके 'सोआ' इति प्रसिद्धिः ॥३३६॥

जीरके तु कणाऽजाजी जरणः कणजीरकः ।

---

१ मिषिः नि० ॥ २ °पुष्पाऽवाक्पु° नि० ॥

जयति मन्दाग्नित्वं जीरः "चि-जि-शुसि-" [हैमोणादिसू० ३९२] इति रो दीर्घत्वं च, स्वार्थिके के **जीरकः**, पुं-क्लीबलिङ्गः, तत्र । कणाः सन्त्यस्यां **कणा**, स्त्रीलिङ्गोऽयम् । अजं–स्वाभाविकं मन्दाग्नित्वमजति–क्षिपति **अजाजी**, लिहादित्वादच्चि अजेर्वी न भवति, स्त्रीलिङ्गः । जीर्यते अनेन **जरणः**, पुंल्लिङ्गः । कणोपलक्षितो जीरकः **कणजीरकः** । आह च—

शुक्लाऽजाजी कणाऽऽख्याता दीर्घकः कणजीरकः ।
[ ] इति ।

एतस्य लोके 'श्वेतजीरा' इति प्रसिद्धिः ।

कृष्णेऽस्मिन् कारवी पृथ्वी सुगन्धा सुषवी[1] पृथुः ॥३३७॥
कुञ्ची कालोपकालोपकुञ्चिकोत्कुञ्चिकाऽपि च ।

'कृष्णे' श्यामे 'अस्मिन्' जीरके कारोरियं **कारवी**, "तस्येदम्" [सिद्ध० ६.३.१६०] इत्यण् । **पृथ्वी** बृहत्कणा । शोभनो गन्धोऽस्याः **सुगन्धा** । सुष्ठु सुवति **सुषवी**,अचि गौरादित्वाद् ङीः । **पृथुः** बृहत्कणत्वात् ॥३३७॥

"कुञ्च च कौटिल्या-ऽल्पीभावयोः" कुञ्चति **कुञ्ची** । **काला** वर्णेन । उपकालयति **उपकाला** । उपकुञ्चति–अल्पीकरोति **उपकुञ्चिका** । उत्कुञ्चति **उत्कुञ्चिका** । आह च—

कुञ्चिका चोपकुञ्ची च कालिका चोपकालिका ।
सुषवी कुञ्चिका कुञ्ची पृथ्वी कृष्णे च जीरके ॥
[धन्व० वर्ग २ श्लो० ५९] इति ।

एतस्य लोके 'कालउ जीरउ' इति प्रसिद्धिः ।

रसोने लशुनो म्लेच्छकन्दोऽरिष्टो महौषधम् ॥३३८॥
महाकन्दः ।

अम्लेन रसेन ऊनो **रसोनः**, पञ्चरसत्वात् । यद् **व्याडिः**—

ऊनोऽम्लेन रसेनेति रसोनस्तेन कीर्तितः ।
[ ] इति ।

तत्र । लश्यते–अभिलश्यते **लशुनः**, "लषेः श च" [हैमोणादिसू० २८९] इत्युनः प्रत्ययः तालव्यः शकारश्चान्तादेशः । [पुं-क्लीबलिङ्गावेतौ ।] म्लेच्छानां प्रियः कन्दो **म्लेच्छकन्दः** । न रिष्यते **अरिष्टः** । **महौषधं** रोगजित्वात् ॥३३८॥

---

१ तुषवी नि० ॥ २ उपकुञ्ची कुञ्चिका च कालोपकुञ्चिकाऽपि च नि० ॥

महांश्चासौ कन्दश्च **महाकन्दः**। आह च—

अथ महौषधम्।

लशुनं गृञ्जनारिष्ट-महाकन्द-रसोनकाः॥

[अमर० का० २ वर्ग ४ श्लो० १४८] इति।

एतस्य लोके 'ल्हसणु' इति प्रसिद्धिः।

अपरोऽप्येष गृञ्जनो दीर्घपत्रकः।

'अपरः' अन्यः 'एषः' रसोनः गृज्यते—कुत्सितः शब्द्यते **गृञ्जनः**, पुं-क्लीब-लिङ्गः। दीर्घं पत्रमस्य दीर्घपत्रः, के **दीर्घपत्रकः**।

पलाण्डौ यवनेष्टः स्यात् सुकन्दो [1]वक्त्रदूषणः ॥३३९॥

[2]हरणः

पिपर्त्ति धातून् **पलाण्डुः**, "केवयु-भुरण्यु-" [हैमोणादिसू०७४६] इति उप्रत्यये निपात्यते; "पल गतौ" पलति वा **पलाण्डुः**, "पलि-मृभ्यामाण्डु-कण्डुकौ" [हैमोणादि-सू०७६७] इत्याण्डुः प्रत्ययः, तत्र। यवनानाम् इष्टो **यवनेष्टः**। शोभनः कन्दोऽस्य **सुकन्दः**। वक्त्रं दूषयति **वक्त्रदूषणः** ॥३३९॥

हरति **हरणः**। आहुश्च—

पलाण्डुर्यवनेष्टश्च सुकन्दो मुखदूषणः।

हरणः [धन्व० वर्ग ४ श्लो०७१] इति।

एतस्य लोके 'डूंगली' इति प्रसिद्धिः।

स तु हरितो लताकों दुर्द्रुमोऽपि च।

'तुः' पुनरर्थे। 'सः' पलाण्डुः 'हरितः' नीलः **लताकों** लताकाख्यः। दुष्टो द्रुमो **दुर्द्रुमः**, अपवित्रत्वात्। आह च—

अन्यः पलाण्डुस्तु लताकों दुर्द्रुमश्च सः।

[धन्व० वर्ग ४ श्लो० ७१] इति।

सुश्रुतस्त्वाह—

लशुनो दीर्घपत्रश्च पिच्छागन्धो महौषधम्।

फरण्यश्च पलाण्डुश्च लवतर्का पराकिका।

गृञ्जनं यवनेष्टश्च पलाण्डोर्दश जातयः॥

[ ] इति।

---

१ वक्त्रभूषणः नि० ॥ २ करणः नि० ॥

सप्तलायां बहुफेना सातला विमला मता ॥३४०॥
सारी मरालिका दीप्ता फेना चर्मकसा यवा ।

सपति–समवैति **सप्तला**, "मुरलोरल-" [हैमोणादिसू० ४७४] इत्यले निपात्यते, तस्याम् । बहवः फेनाभा बिन्दवोऽस्याः **बहुफेना** । सातं–सुखं लाति **सातला**, "क्वचित्" [सिद्ध० ५.१.१७१] इति डः । विगतो मलोऽस्या **विमला** ॥३४०॥

सारयति **सारी** । मरालिका(? ली)–हंसी, सैव **मरालिका** । अत एव **दीप्ता** । फेनाभा बिन्दवः सन्त्यस्यां **फेना** । चर्मणि कसा अस्याः **चर्मकसा** । यूयते **यवा** । आह च––

सातला सप्तला सारी विपुला विमलाऽमला ।
बहुफेना चर्मकसा फेना दीप्ता रसालिका ॥
[धन्व० वर्ग १ श्लो० २३८] इति ।

एतस्या लोके 'साथरि' इति प्रसिद्धिः ।

प्रसारण्यां चारुपर्णी भद्रपर्णी प्रतानिका ॥३४१॥
भद्रबला भद्रलता भद्रकाली महाबला ।
सारणा सरणा सुप्रसरा राजबला च सा ॥३४२॥

प्रसार्यतेऽनया **प्रसारणी**, "करणा-ऽऽधारे" [सिद्ध० ५.३.१२९] इत्यनट्, तस्याम् । चारूणि पर्णान्यस्याः **चारुपर्णी** । भद्राणि पर्णान्यस्याः **भद्रपर्णी** । प्रतानोऽस्त्यस्याः **प्रतानिका**, "अतोऽनेकस्वरात्" [सिद्ध० ७.२.६] इतीकः ॥३४१॥

भद्रं बलमस्या **भद्रबला** । [भद्रा चासौ लता च] **भद्रलता** । भद्रा चासौ काली च **भद्रकाली** । महद्बलमस्या **महाबला** । सारयति **सारणा** । सरतीव अम्भः सङ्कोचाद् निवर्तते गमनया **सरणा** । "**सरणी**' इति युक्तः पाठः" इति **क्षीरस्वामी** । शोभनः प्रसरोऽस्याः **सुप्रसरा** । राजरूपा–मुख्या बला–बलकृद् **राजबला** । आह च–

प्रसारणी सुप्रसरा सरणी सारणी च सा ।
चारुपर्णी राजबला भद्रपर्णी प्रतानिका ॥
[धन्व० वर्ग १ श्लो० २८९] इति ।

एतस्या लोके 'प्रसारणी' इति प्रसिद्धिः ॥३४२॥

---

१ बिन्दुलामली नि० ॥ २ चर्माकसा नि० ॥ ३ सारणी सुप्रसारा च राजबला च साऽपि च नि० ॥

ब्राह्म्यां वयःस्था मत्स्याक्षी ब्राह्मणी सोमवल्लरी ।
सरस्वती सत्यवती सुस्वरा ब्रह्मचारिणी ॥३४३॥

ब्राह्मीव **ब्राह्मी,** पावनत्वात्, तस्याम् । वयसि तिष्ठति **वयःस्था,** "स्था-पा-स्ना-त्रः-" [सिद्ध० ५.१ १४२] इति कः, वयसः स्थैर्यकृत् । **मत्स्याक्षी** मत्स्याक्षिपुष्पी । ब्रह्मण इयं **ब्राह्मणी,** "तस्येदम्" [सिद्ध० ६.३.१६०] इत्यण् । सोमस्य वल्लरी **सोमवल्लरी** । सरः—प्रसरणमस्त्यस्याः **सरस्वती** । सत्यमस्त्यस्याः **सत्यवती** । शोभनः स्वरोऽस्याः **सुस्वरा,** "ओस्वृ शब्दोपतापयोः" सुष्ठु सुतरां वा स्वरति **सुस्वरा** इति वा । ब्रह्म चरतीत्येवंशीला **ब्रह्मचारिणी** । आह च—

ब्राह्मी सरस्वती सोमा सत्याह्वा ब्रह्मचारिणी ।
[ ] इति ।

एतस्या लोके 'ब्राह्मी' इति प्रसिद्धिः ॥३४३॥

सूरणे कण्डुरः कन्दोऽर्शोघाती चित्रदण्डकः ।

सूयते—प्रेर्यते **सूरणः,** "चिक्कण-कुक्कण-" [हैमोणादिसू० १९०] इत्यणे निपात्यते, तत्र । कण्डूं राति **कण्डुरः,** पृषोदरादित्वात् साधुः । कन्द्यते—इष्यते **कन्दः,** [पुं-क्लीबलिङ्गः] । अर्शो घातयति **अर्शोघाती** । चित्रो दण्डोऽस्य चित्रदण्डः, स्वार्थिके के **चित्रदण्डकः** । एतस्य लोके 'सूरणकन्द' इति प्रसिद्धिः ।

वृद्धदारके त्वावेगी जीर्णवालक-जुङ्गकौ ॥३४४॥
अजाण्डी[1] च ऋक्षगन्धा स्यादन्तःकोटपुष्प्यपि ।

वृद्धं—वृद्धत्वं दारयति **वृद्धदारकः** ; वृद्धं दारकीकुरुते इति वा, पृषोदरादित्वात्, तत्र । आ—समन्ताद् वेगोऽस्त्यस्या **आवेगी,** वृद्धत्वात्, उद्वेजको वा । जीर्णा वाला अस्य जीर्णवालः, स्वार्थिके के **जीर्णवालकः** । "युगु जुगु वुगु वर्जने" चवर्गीयादिरयम्, जुङ्गति जुङ्गः, अच्, स्वार्थिके के **जुङ्गकः** ॥३४४॥

अजस्येव अण्डानि—अस्थीन्यस्याः **अजाण्डी** । **छगलाण्डी**त्यपि । ऋक्षवद् गन्धयति **ऋक्षगन्धा** । "**वृक्षगन्धा**" इति च **पाठभेदः**" इति **क्षीरस्वामी** । अन्तःकोटे पुष्पाण्यस्याः **अन्तःकोटपुष्पी** । आह च—

---

१ °बालुक° नि० ॥ २ अजाण्टी ऋक्षगन्धा स्यादन्तकोटकपुष्प्यपि नि० ॥

वृद्धदारक आवेगी जुङ्गको जीर्णबालकः ।
अन्तःकोटरपुष्पी स्यादजाण्डी छागलाण्ड्यपि ॥
[धन्व० वर्ग ४ श्लो० १०७] इति ।

एतस्य लोके 'वृद्धारा' इति प्रसिद्धिः ।

सुवर्चलायां मण्डूकी बदराऽऽदित्यवल्लभा ॥३४५॥
मण्डूकपर्ण्यर्कभक्ताऽऽदित्यवल्ली सुखोद्भवा ।

सुष्ठु वर्चते **सुवर्चला**, "मुरलोरल-" [हैमोणादिसू० ४७४] इत्यले निपात्यते; सुष्ठु वर्चते सुवर्चः—अग्निर्दीपनम्, तल्लातीति वा, तस्याम् । मण्डति मण्ड्यते वा **मण्डूकी**, "मृ-मन्यञ्जि-" [हैमोणादिसू० ५८] इत्यूकः, गौरादित्वाद् ङीः । "बद स्थैर्ये" बदति **बदरा**, "ऋच्छि-चटि-वटि-" [हैमोणादिसू० ३९७] इत्यरः । आदित्यस्य वल्लभा **आदित्यवल्लभा** ॥३४५॥

मण्डूक इव पर्णान्यस्या **मण्डूकपर्णी**, "पाक-कर्ण-पर्ण-" [सिद्ध०२.४.५५] इति ङीः । अर्कस्य भक्ता **अर्कभक्ता** । आदित्यप्रिया वल्ली **आदित्यवल्ली** । सुखमुद्भवति अस्याः **सुखोद्भवा** । आह च—

सुवर्चलाऽऽदित्यकान्ता सूर्यभक्ता सुखोद्भवा ।
मण्डूकपर्णी मण्डूकी बदराऽऽदित्यवल्ल्यपि ॥
[धन्व० वर्ग ४ श्लो० ९८] इति ।

एतस्या लोके 'सूंचलि' इति प्रसिद्धिः ।

भृङ्गराजे भृङ्गरजो भृङ्गारः केशरञ्जनः ॥३४६॥
[2]अङ्गारको भेकरजो भृङ्गो मार्कव इत्यपि ।

भृङ्गवद् राजते **भृङ्गराजः**, तत्र । भृङ्गवद् रञ्जयति—कृष्णीकरोति **भृङ्गरजः**, अचि प्रत्यये पृषोदरादित्वान्नलोपः । भृङ्गान् इयर्ति **भृङ्गारः** । केशान् रञ्जयति **केशरञ्जनः** ॥३४६॥

अङ्गति **अङ्गारकः** "अग्यङ्गि-" [हैमोणादिसू० ४०५] इति आरे स्वार्थिके के च साधुः । भेकवद् रञ्जयति **भेकरजः**, अचि प्रत्यये पृषोदरादित्वात् साधुः । भृङ्गराजैकदेशे **भृङ्गः**, यथा सत्या सत्यभामेत्यादिवत् ; बिभर्ति वा **भृङ्गः**, "भृ-वृभ्यां नोऽन्तश्च" [हैमोणादिसू०९४] इति गः । मर्कति-सम्पृच्यते **मार्कवः** "कैरव-भैरव-" [हैमोणादिसू०५१९] इत्यवे निपात्यते । आह च—

१ सुखोद्भिदा नि० ॥ २ अमारको नि० ॥

भृङ्गराजो भृङ्गरजो मार्कवो भृङ्ग एव च ।
अङ्गारको भेकरजो भृङ्गारः केशरञ्जनः ॥

[धन्व० वर्ग ४ श्लो० ११] इति ।

एतस्य लोके 'भांगरउ' इति प्रसिद्धिः ।

कासमर्दे त्वरिमर्दः कालं [1]कनक-कर्कशौ ॥३४७॥

कासं मर्दयति **कासमर्दः**, तत्र । अरीन् मर्दयति **अरिमर्दः** । **कालं** वर्णन । कनति—दीप्यते **कनकः** । कर्कं श्यति **कर्कशः** । आह च—

कासमर्दोऽरिमर्दश्च कासारिः कर्कशस्तथा ।
कालं कनक इत्युक्तः स च स्यात् कासमर्दकः ॥

[धन्व० वर्ग ४ श्लो० ११८] इति ।

एतस्य लोके 'कासंदउ' इति प्रसिद्धिः ॥३४७॥

वास्तुके तु [2]शाकज्येष्ठः प्रवालः क्षारपत्रकः ।
शाकवीरो वीरशाकस्ताम्रपुष्पः प्रसादकः ॥३४८॥

वसन्त्यस्मिन् गुणा इति **वास्तुकम्**, "कञ्चुकांशुक-" [हैमोणादिसू० ५७] इत्युके निपातनात् साधुः, तत्र । शाकेषु ज्येष्ठः **शाकज्येष्ठः** । प्रवलति **प्रवालः**, "वा ज्वलादि-" [सिद्ध० ५.१.६२] इति णः । क्षारं पत्रमस्य **क्षारपत्रः**, के **क्षारपत्रकः** । शाकानां मध्ये वीर इव प्रधानत्वात् **शाकवीरः** । वीरश्चासौ शाकश्च **वीरशाकः** । ताम्राणि पुष्पाण्यस्य **ताम्रपुष्पः** । प्रसादयति **प्रसादकः** । आह च—

वास्तुकः क्षारपत्रः स्याच्छाकवीरः प्रसादकः ।

[ ] इति ।

एतस्य लोके 'वथुआ' इति प्रसिद्धिः ॥३४८॥

पालङ्क्यायां तु पालक्या क्षुरिका मधुसूदनी ।

पालयति **पालङ्क्या**, "शिक्या-ऽऽस्या-ऽऽढ्य-" [हैमोणादिसू० ३६४] इति ये निपात्यते, तस्याम् । पालके साधुः **पालक्या**, "तत्र साधौ" [सिद्ध० ७.१.१५] इति यः, पाल्यते इति वा, "शिक्या-ऽऽस्या-ऽऽढ्य-" [हैमोणादिसू० ३६४] इति ये निपातनात् साधुः । क्षुरति क्षुरी, के **क्षुरिका**; क्षुरिकेव वा **क्षुरिका** । मधु-माधुर्यं सूदते **मधुसूदनी** । आह च—

---

१ कतककर्कशः नि० ॥ २ शाकश्रेष्ठः नि० ॥

पालङ्क्या वास्तुकाकारा क्षुरिका चीरितच्छदा ।

[ ] इति ।

एतस्या लोके 'पलांक' इति प्रसिद्धिः ।

जीवन्त्यां स्याज्जीवनीया जीवनी जीववर्धनी ॥३४९॥
मङ्गल्यनामधेया च शाकश्रेष्ठा यशस्करी ।

जीवतादिति **जीवन्ती,** "रुहि-नन्दि-" [हैमोणादिसू० २२०] इति टिदन्तः, तस्याम् । जीव्यतेऽनया **जीवनीया,** बाहुलकात् करणेऽप्यनीयः । जीव्यतेऽनया **जीवनी,** "करणाऽऽधारे" [सिद्ध० ५.३.१२९] इत्यनट् । जीवस्य वर्धनी **जीववर्धनी** ॥३४९॥

मङ्गल्यमिति नामधेयमस्या **मङ्गल्यनामधेया** । शाकमध्ये श्रेष्ठा **शाकश्रेठा** । यशः करोति **यशस्करी** । आह च—

जीवन्ती जीवनीया च जीवनी जीववर्धनी ।
मङ्गल्यनामधेया च शाकश्रेष्ठा यशस्करी ॥
[धन्व० वर्ग १ श्लो० १४०] इति ।

एतस्या लोके 'दोडी' इति प्रसिद्धिः ।

स्यादम्ललोणिकायां तु चाङ्गेरी चुक्रिका रसा ॥३५०॥
अम्बष्ठाऽम्बोटिका दन्तशठा लोलाऽम्ललोलिका ।
नरेन्द्रमाला क्षुद्राम्ली चतुष्पर्णी च लोणिका ॥३५१॥

अम्लेन लुनाति **अम्ललोणिका,** पृषोदरादित्वात् साधुः, तस्याम् । चाङ्गं—दन्तपटुत्वमीरयति **चाङ्गेरी** । चुक्रन्ते—व्यथन्तेऽस्याः **चुक्रिका,** णके आप् । रस्यते—आस्वाद्यते **रसा** ॥३५०॥

अम्बे तिष्ठति **अम्बष्ठा,** "गो-ऽम्बा-ऽम्ब-सव्या-ऽप-द्वि-त्रि-" [सिद्ध० २.३.३०] इत्यादिना स्थशब्दसम्बन्धिनः सकारस्य षो भवति, "स्था-पा-स्ना-त्रः कः" [सिद्ध० ४.१.१४२] इति कः प्रत्ययः । अम्बमटति **अम्बोटिका,** पृषोदरादित्वात् साधुः । दन्ताः शठाः अस्याः **दन्तशठा** । "लोडृ उन्मादे" लोडति **लोला,** ड-लयोरैक्यात् । अम्लेन लोला अम्ललोला, के **अम्ललोलिका** । [. . . . .] **नरेन्द्रमाला** । क्षुद्रा चासौ अम्ली च **क्षुद्राम्ली** । चत्वारि पर्णान्यस्याः **चतुष्पर्णी** । लुनाति **लोणिका,** पृषोदरादित्वात् । आह च—

---

१ अम्बष्ठाऽम्लोलिका दन्तशठाटोलाम्लटोलकः । नरेन्द्रमाता नि० ॥

क्षुद्राम्लिका तु चाङ्गेरी लोणिका चाऽम्ललोणिका ।
लोला लोडा चतुष्पर्णी सैव दन्तशठा मता ॥

[धन्व० वर्ग ५ श्लो० ३६] इति ।

तथा च—

चाङ्गेरी चुक्रिका दन्तशठाऽम्बष्ठाऽम्ललोणिका ।

[अमर०का०२ वर्ग४ श्लो०१४०] इति ।

एतस्या लोके 'आंबउत्री' इति प्रसिद्धिः ॥३५१॥

तण्डुलीये मेघनादस्तण्डुली तण्डुलेरकः ।
गण्डीरको रक्तकाण्डो विषहार्यल्पमारिषः ॥३५२॥

तण्डुलेभ्यो हितस्तण्डुलीयः, "हविरन्नभेदापूपादेर्यो वा" [सिद्ध०७.१.२९] इतीयः; ताडयति दोषान् इति वा, "गय-हृदयादयः" [हैमोणादिसू०३७०] इत्यये निपात्यते, तत्र । मेघस्येव नादोऽस्मात् **मेघनादः** । तण्डुलाः सन्त्यस्य **तण्डुली** । तण्डुलान् ईरयति द्रावकत्वात् तण्डुलेरः, स्वार्थिके के **तण्डुलेरकः** । गण्डीं—ग्रन्थिम् ईरयति गण्डीरः, स्वार्थिके के **गण्डीरकः** । रक्तः काण्डोऽस्य **रक्तकाण्डः** । विषं हरति **विषहारी** । अल्पं मृणाति-हिनस्ति **अल्पमारिषः**, "अमि-मृभ्यां णित्" [हैमोणादिसू० ५४९] इति इषः । आह च—

तण्डुलीयक उद्दिष्टश्चण्डाला तण्डुलेरकः ।
गण्डीरस्तण्डुली बीजो मेघनादो घनस्वनः ॥

[धन्व० वर्ग ४ श्लो० ११६] इति ।

एतस्य लोके 'तण्डुलेजा' इति प्रसिद्धिः । ॥३५२॥

शमठे तु तोयवृत्तिर्गण्डीरस्तोयमञ्जरी ।
समष्ठिला शोषहरी जलापामार्ग ओलकः ॥३५३॥

शाम्यति **शमठः**, "मृ-जॄ-शॄ-कम्यमि-रमि-रपिभ्योऽठः" [हैमोणादिसू०१६७] इति बहुवचनाद् अठः प्रत्ययः, तत्र । तोये-पानीये वृत्तिः—वर्तनमस्य **तोयवृत्तिः** । गण्डीन्—ग्रन्थीन् ईरयति **गण्डीरः** । तोयस्य मञ्जरी **तोयमञ्जरी** । सम्यगस्थीनि लाति **समष्ठिला** साण्डत्वात्, पृषोदरादित्वात् साधुः । **समष्ठिला**नाम शाकम् । **यन्माला**—

"गण्डीरो नाम समष्ठिला" [ ] इति ।

---

१ °मार्गतुल्यकः नि० ॥

शोषं हरति **शोषहरी** । जले जलस्य वा अपामार्ग इव **जलापामार्गः** । "उल दाहे" सौत्रः, ओलति ओलः, के **ओलकः**, त्रयोदशस्वरादिरयम् ॥३५३॥

अन्यस्तु स्थलगण्डीरः कर्बुरष्टक्कदेशजः ।

'तुः' पुनरर्थे । 'अन्यः' अपरः स्थलस्य गण्डीरः **स्थलगण्डीरः** । **कर्बुरो** वर्णेन । **टक्कदेशे** जातः **टक्कदेशजः** । 5

काकमाच्यां तु कामाची काकसाह्वा[1] च वायसी ॥३५४॥

काकवद् मचते-वर्णेन सम्पृच्यते **काकमाची**, तस्याम् । पृषोदरादित्वान्मध्यक-कारलोपे **कामाची** । काकस इत्याह्वाऽस्याः **काकसाह्वा** । वायसवर्णत्वाद् **वायसी** । आह च—

काकमाची ध्वाङ्क्षमाची काकसाह्वा च वायसी । 10
कट्वी कटुफला चैव रसायनवरा स्मृता ॥
[धन्व० वर्ग ४ श्लो० २१] इति ।

एतस्या लोके 'कमाइ' इति प्रसिद्धिः ॥३५४॥

श्रीहस्तिन्यां तु [2]भूरण्डी कुरण्डी कास्मरीरिपुः ।

हस्तिनी-हस्तिकर्णपत्रा, श्रीयुक्ता हस्तिनी **श्रीहस्तिनी**, तस्याम् । भुवि रोहति 15 **भूरण्डी** "पिचण्डैरण्ड-" [हैमोणादिसू० १७६] इत्यण्डे निपात्यते । **कौ** रोहति **कुरण्डी**, "पिचण्डैरण्ड-" [हैमोणादिसू० १७६] इत्यण्डे निपात्यते । कास्मर्या रिपुः **कास्मरीरिपुः** । श्रीहस्तिनीनामानि ।

सुनिषण्णे सूचिपत्रः स्वस्तिकः शितिवा[3]रकः ॥३५५॥
[4]श्रीवराकः(? श्रीवारकः)शितिवरो वितुन्नः कुक्कुटः शितिः ॥ 20

सुष्ठु सुतरां वा निषीदति स्म **सुनिषण्णः**, तत्र । सूच्याकाराणि पत्राण्यस्य **सूचिपत्रः** । स्वस्ति कायति **स्वस्तिकः** । शितिं वारयति **शितिवारकः** ॥३५५॥

श्रियं वृणीते **श्रीवराकः** (? श्रीवारकः) । शितिं वृणोति **शितिवरः** । वितुद्यते स्म **वितुन्नः** । "कुकि वृकि आदाने" कुक्यते **कुक्कुटः**, "नर्कुट-कुक्कुट-" [हैमोणा-दिसू० १५५] इत्युटे निपात्यते । श्यायते श्यति वा **शितिः** । आह च— 25

शितिवारः सूचिपत्रः शैल्याच(? सूच्याह्वः) सुनिषण्णकः ।
श्रीवासकः शितिवरः स्वस्तिकः कटुकः(? कुक्कुटः) शिखी ॥
[धन्व० वर्ग १ श्लो० १५५] इति ।

---

१ °ह्वा वृषायणी नि० ॥ २ भूरुण्डी कुरुण्डी नि० ॥ ३ शिरिवारकः नि० ॥ ४ श्रीवारकः शिति° नि ॥

एतस्य लोके 'षडकूतिर' इति प्रसिद्धिः ।

मूलके तु महाकन्दो रुचिष्यो हस्तिदन्तकः ॥३५६॥
बस्तिका[1] नीलकण्ठश्च [2]सेकिमो हरिपर्णकः ।

"मूल प्रतिष्ठायां" मूलति मूलम्, मूयते वा "शुक-शी-मूभ्यः कित्" [हैमो-णादिसू० ४६३] इति किल्लः, तदेव **मूलकम्**, पुं-क्लीबलिङ्गः, तत्र । महांश्चासौ कन्दश्च **महाकन्दः** । रोचते **रुचिष्यः**, "रुचि-भुजिभ्यां किष्यः" [हैमोणादिसू० ३८४] इति किदिष्यः । हस्तिदन्तप्रतिकृति **हस्तिदन्तकम्**, पुं-क्लीबलिङ्गः ॥३५६॥

बस्तप्रतिकृति **बस्तिका** । नीलः कण्ठोऽस्य **नीलकण्ठः** । सेकेन निर्वृत्तः **सेकिमः**, "भावादिमः" [सिद्ध० ६.४.२१] इतीमः । हरि–नीलं पर्णमस्य हरि-पर्णः, स्वार्थिके के **हरिपर्णकः** । आह च—

मूलकं हरिपर्णं च बस्तिका क्षारमेव च ।
नीलकन्दं महाकन्दं रुचिष्यं हस्तिदन्तकम् ॥
[धन्व० वर्ग ४ श्लो० ३३] इति ।

एतस्य लोके 'मूला' इति प्रसिद्धिः ।

चाणक्यमूलके शालामर्कटो मरुसम्भवः ॥३५७॥
विष्णुगुप्त-मतो [3]मिश्रो वालेयो मर्कटोऽपि च ।

चाणक्यस्य मूलकं **चाणक्यमूलकम्**, तत्र । शालाया मर्कट इव **शालामर्कटः** । मरौ सम्भवति **मरुसम्भवः** ॥३५७॥

'विष्णुगुप्तमतः' इति विष्णुशब्दाद् गुप्त-मतशब्दौ योज्येते, तेन **विष्णुगुप्तः विष्णुमतः** । "मिश्रण् सम्पर्चने" मिश्रयते **मिश्रः** । वलते **वालेयः**, "गय-हृद-यादयः" [हैमोणादिसू० ३७०] इति साधुः । मर्कः सौत्रो गत्यर्थः, मर्कति **मर्कटः**, "दिव्यवि-" [हैमोणादिसू० १४२] इत्यटः । आह च—

चाणक्यमूलकं चान्यं वालेयं मरुसम्भवम् ।
शालामर्कटमिश्रं च विष्णुगुप्तमनन्तकम् ॥
[धन्व० वर्ग ४ श्लो० ३५] इति ।

बृहन्मूलकोऽयम् ।

हिलमोच्यां शङ्खधरा जलब्राह्मी च मोचिका ॥३५८॥

---

१ बुस्तिका नि० ॥ २ 'सेकिनम्' इत्यभिधानचिन्तामणौ स्वोपज्ञटीकायां च ॥ ३ °मिश्रः स्थालयो नि० ॥

हिलाद्-वीर्याद् मोचयति **हिलमोची**, तस्याम्। शङ्खं धरति **शङ्खधरा**। जलस्य ब्राह्मी **जलब्राह्मी**। मोचयति **मोचिका** ॥३५८॥

कलम्ब्यां तु शतपर्वा [1]कडम्बी वायसी च सा।

कलम्बतेऽस्याः **कलम्बी**, तस्याम्। शतं-बहूनि पर्वाण्यस्याः **शतपर्वा**। "कड मदे" कडति **कडम्बी**, "कृ-कडि-कटि-वटेरम्बः" [हैमोणादिसू० ३२१] इत्यम्बः। **वायसी** वर्णेन।

[2]कारवेल्ले तु सुषवी कटिल्लो मृदुपर्णकः ॥३५९॥

"वेल्ल गतौ" कारेण वेल्लति **कारवेल्लः**, तत्र। सुष्ठु सूयते **सुषवी**, अच्। कटिं लाति **कटिल्लः**, [पृषोदरादित्वात् द्वित्वम्]; कटति-आवृणोति वा, "भिल्ला-ऽच्छभल्ल-" [हैमोणादिसू० ४६४] इति ले निपात्यते। मृदूनि पर्णान्यस्य मृदुपर्णः, के **मृदुपर्णकः**। यदाह—

अथ कारवेल्लः कटिल्लकः ॥

सुषवी च

[अमर० का० २ वर्ग ४ श्लो० १५४-५५] इति।

तथा च—

कारवेल्लं कटिल्लं स्यादुग्रकाण्डं सुकाण्डकम्।
कारेवल्ली वारिवल्ली बृहद्वल्ल्यपरा स्मृता ॥
[ ] इति।

एतस्य लोके 'कारेली' इति प्रसिद्धिः ॥३५९॥

पटोले तु पाण्डुफलः कुलकः कर्कशच्छदः।
[3]राजीफलः कफहरो राजमान्योऽमृताफलः ॥३६०॥

"पट गतौ" पटति इति **पटोलः**; "पटयति सरलत्वात्" इति **क्षीरस्वामी**, "कटि-पटि-" [हैमोणादिसू० ४९३] इत्योलः, पुं-स्त्रीलिङ्गः, तत्र। पाण्डूनि फलान्यस्य **पाण्डुफलः**। कोलति—संस्त्यायति **कुलकः**, "धु-धून्दि-रुचि-तिलि-पुलि-कुलि-" [हैमोणादिसू० २९] इत्यादिना किदकः। कर्कशानि छदान्यस्य **कर्कशच्छदः**। राज्याकारं फलमस्य **राजीफलः**। कफं हरति **कफहरः**। राज्ञां मान्यो **राजमान्यः**। अमृतानि फलान्यस्य **अमृताफलः**, पृषोदरादित्वाद् दीर्घः। आह च—

---

१ केलम्बूर्वायसी नि० ॥ २ कारवेल्ल्यां तु नि० ॥ ३ राजिमानमृता° नि० ॥

पटोलः कुलकः प्रोक्तः पाण्डुरः कर्कशच्छदः ।
राजीफलः पाण्डुफलो राजमान्योऽमृताफलः ॥
[धन्व० वर्ग १ श्लो० ४९] इति ।

एतस्य लोके 'पटोल' इति प्रसिद्धिः ॥३६०॥

कर्कोटे तु किलासघ्नस्तिक्तपत्रः सुगन्धकः ।

करोति किलासहिंसां **कर्कोटः**, "कपोट-बकोट-" [हैमोणादिसू० १६१] इत्योटे निपात्यते, तत्र । किलासं हन्ति **किलासघ्नः** । तिक्तं पत्रमस्य **तिक्तपत्रः** । सुष्ठु गन्धयति **सुगन्धकः**, णकप्रत्ययः ।

एतस्य लोके 'कंकोडा' इति प्रसिद्धिः ।

कूष्माण्डके तु कर्कारुः

"कुषश् निष्कर्षे" कुष्यते कूष्माण्डः, "पिचण्डैरण्ड-" [हैमोणादिसू० १७६] इत्यण्डे निपात्यते, के **कूष्माण्डकः**; कोः उष्मणा अनितीति वा, कुत्सित उष्मा अण्डेषु—बीजेष्वस्य वा, पित्तकारित्वात्, तत्र । कर्किः सौत्रः, कर्कति **कर्कारुः**, पुंल्लिङ्गः, "कर्केरारुः" [हैमोणादिसू० ८१३] इत्यारुः, उकारान्तः; "करोति तृप्तिं **कर्कः**, इयर्त्ति **अरुः**, "रुद्यर्त्ति-" [हैमोणादिसू० ९९७] इत्युस् प्रत्ययः, बस्तिशोधनः सरत्वात्, कर्कश्चासावरुश्चेति वा, उसन्तोयम्" **इत्यपरे** ।

कालिङ्ग्यां बहुपुत्रिका ॥३६१॥

कलिङ्गे भवा **कालिङ्गी**, "भवे" [सिद्ध० ६.३.१२३] इत्यण्; केन आलिङ्गचते वा, तस्याम् । बहवः पुत्रा अस्याः बहुपुत्री, के **बहुपुत्रिका** ॥३६१॥

तुम्ब्यां पिण्डफलेक्ष्वाकुस्तिक्तबीजा महाफला ।
अलाबूः क्षत्रियवरा कटुकालाबुनी च सा ॥३६२॥

ताम्यति **तुम्बी**, "तुम्ब-स्तम्बादयः" [हैमोणादिसू० ३२०] इति बान्तो निपात्यते, तस्याम् । पिण्डाकाराणि फलान्यस्याः **पिण्डफला** । इष्यते **इक्ष्वाकुः**, "इषेः स्वाकुकू" [हैमोणादिसू० ७५७] इत्यनेन "इषत् इच्छायाम्" इत्यस्मात् कित् स्वाकुः प्रत्ययः । तिक्तानि बीजान्यस्याः **तिक्तबीजा** । महान्ति फलान्यस्याः **महाफला** । "लबुड् अवस्रंसने" न लम्बते **अलाबूः**, काक्वाऽत्र नञ्, "नञो लम्बेर्न लुक् च" [हैमोणादिसू० ८३८] इति णिदूः, स्त्री-क्रीबलिङ्गः । क्षत्रियैर्व्रियते **क्षत्रियवरा** । कटुका चासौ अलाबुनी च **कटुकालाबुनी** । आह च—

कटुकालाबुनी तुम्बी लम्बा पिण्डफला तथा।
इक्ष्वाकुः क्षत्रियवरा तिक्तबीजा महाफला॥
[धन्व० वर्ग १ श्लो० १७०] इति।

एतस्या लोके 'त्रूंबिणि' इति प्रसिद्धिः॥३६२॥

चिर्भिटत्रपुसी वालुङ्कथेर्वारुर्व्याडपत्रिका)

ऊर्वारुः कर्कटी मूत्रफला राजादनी लता॥३६३॥

छर्दनी च विपाण्डुश्च

चिरिः सौत्रः स्वादौ। चिरिणोति **चिर्भिटी**, "चिरेरिटो भ च" [हैमोणादिसू० १४९] इति इटः प्रत्ययो भकारश्चान्तादेशः, तस्याम्। "त्रपौषि लज्जायाम्" त्रपते इव **त्रपुसी**, "त्रपेरुसः" [हैमोणादिसू० ५७८] इत्युसः। वलति **वालुङ्की**, "कञ्चुकांशुक-" [हैमोणादिसू० ५७] इत्युके निपात्यते। ऊर्वति-हिनस्त्यर्त्तिम् **एर्वारुः**,पुं-स्त्रीलिङ्गः, 'उर्वेरादेरूदेतौ च" [हैमोणादिसू० ८१४] इति "उर्वै हिंसायाम्" इत्यस्मादारुः प्रत्ययः आदेश्च एकारादेशः। व्याडाकाराणि पत्राण्यस्याः **व्याडपत्रिका**। ऊर्वति **ऊर्वारुः**, "उर्वेरादेरूदेतौ च" [हैमोणादिसू० ८१४] इति आरुः आदेरूकारादेशश्च। कर्कति **कर्कटी**, "दिव्यवि-" [हैमोणादिसू० १४२] इत्यटः; ह्रस्वः कर्कः **कर्कटी** इति वा, ग्रामटीवत्। मूत्रयुतं फलमस्याः **मूत्रफला**। राज्ञामदनं **राजादनी**। लाति लायते वा **लता**, "पृषि-रञ्जि-" [हैमोणादिसू० २०८] इति किदतः॥३६३॥

छर्यते **छर्दनी**। विशिष्टः पाण्डुवर्णोऽस्याः **विपाण्डुः**। आह च—

कटुकं त्रपुसं प्रोक्तं विपाण्डुर्हस्तिपर्णनी।
छर्दापनी मूत्रफला लता कर्कटिकाऽपि च॥
[ ] इति।

एतस्या लोके 'चीभडी' इति प्रसिद्धिः।

तस्याः पक्वफलं स्फुटी।

'तस्याः' चिर्भिट्याः पक्वं फलं पक्वफलं "स्फुटत् विकसने" स्फुटति **स्फुटी**।

कूर्चके शृङ्गकः सर्जो दीर्घायुः कूर्चशीर्षकः॥३६४॥
मङ्गल्यनामधेयश्च जीवकः प्रियजीवकः।
ह्रस्वाङ्गको मधुरकः प्राणकश्चिरजीव्यपि॥३६५॥

कीर्यते कूर्चः, "कूर्च-चूर्चादयः" [हैमोणादिसू० ११३] इति चट्प्रत्यये निपात्यते, स्वार्थिके के **कूर्चकः**, तत्र। शृङ्गप्रतिकृतिः **शृङ्गकः**, "तस्य तुल्ये कः संज्ञा-प्रतिकृत्योः" [सिद्ध०७.१.१०८] इति कः। सृजति रसं **सर्जः**। दीर्घमायुरस्माद् **दीर्घायुः**। कूर्चः शीर्षेऽस्य कूर्चशीर्षः, स्वार्थिके के **कूर्चशीर्षकः** ॥३६४॥

मङ्गल्यं नामधेयमस्य **मङ्गल्यनामधेयः**। जीवयति **जीवकः**, णकः, प्रियश्चासौ जीवकश्च **प्रियजीवकः**। ह्रस्वमङ्गमस्य ह्रस्वाङ्गः, स्वार्थिके के **ह्रस्वाङ्गकः**। मधु विद्यतेऽस्य मधुरः, "मध्वादिभ्यो रः" [सिद्ध० ७.२.२६] इति रः, स्वार्थिके के **मधुरकः**। प्राणिति **प्राणकः**। चिरं जीवतीति **चिरजीवी**। आह च—

जीवकः शृङ्गकः सर्जो दीर्घायुः कूर्चशीर्षकः।
ह्रस्वाङ्गो मधुरः स्वादुः प्राणकश्चिरजीव्यपि ॥
[धन्व० वर्ग १ श्लो० १२३] इति।

एतस्य लोके 'जीवक' इति प्रसिद्धिः ॥३६५॥

पुष्करमूले स्यान्मूलं वीरं पुष्करनामकम्।
पौष्करं पुष्करजटा काश्मीरं पद्मवर्णकम् ॥३६६॥

पुष्करस्य मूलं **पुष्करमूलम्**, तत्र। "मूल प्रतिष्ठायाम्" मूलति **मूलम्**; मूयते वा, "शुक-शी-मूभ्यः कित्" [हैमोणादिसू० ४६३] इति किद् लः। विशेषेण ईरयति–प्रेरयति **वीरम्**। पुष्कर इति नामाऽस्य **पुष्करनामकम्**। पुष्करस्येदं **पौष्करम्**, "तस्येदम्" [सिद्ध० ६.३.१६०] इत्यण्। पुष्करस्य जटा **पुष्करजटा**। **कश्मीरदेशे** भवं **काश्मीरम्**, "भवे" [सिद्ध०६.३.१२३] इत्यण्। पद्मवद् वर्णोऽस्य पद्मवर्णम्, के **पद्मवर्णकम्**। आह च—

मूलं पुष्करमूलं च पौष्करं पुष्कराह्वयम्।
काश्मीरं पुष्करजटा वीरं तत् पद्मवर्णकम् ॥
[धन्व० वर्ग १ श्लो० ६६] इति।

एतस्य लोके 'पुष्करमूल' इति प्रसिद्धिः ॥३६६॥

बस्तगन्धायां सुगन्धा खरपुष्पी शाकम्भरा।
[२]कबरी बर्बरी तुङ्गी पूतिमयूर इत्यपि ॥३६७॥

बस्तस्येव गन्धोऽस्या **बस्तगन्धा**, तस्याम्। शोभनो गन्धोऽस्याः **सुगन्धा**, अभ्रादित्वादः; [सुष्ठु] गन्धयति वा। खराणि पुष्पाण्यस्याः **खरपुष्पी**। शाकं

१ मस्तुगन्धायां तु गन्धा नि० ॥ २ कबरी बर्बरी चुङ्गी नि० ॥

भरति **शकम्भरा**, बाहुलकान्मोऽन्तः। कूयते **कबरी**, "ऋच्छि-चटि-वटि-" [हैमोणादिसू० ३९७] इत्यरः; कबरीव वा। अत एव **बर्बरी**—कुटिल-ह्रस्वकेशाभा। "तमुच् काङ्क्षायाम्" ताम्यति **तुङ्गी**, "कमि-तमि-शमिभ्यो डित्" [हैमोणादिसू० १०७] इति डिदुङ्गः। पूतिश्चासौ मयूरश्च **पूतिमयूरः**। आह च—

अजगन्धा खरपुष्पी बस्तगन्धा सुगन्धिका। 5
कबरी बर्बरी गन्धा तुङ्गी पूतिमयूरकः॥
[धन्व० वर्ग १ श्लो० १००] इति।

एतस्या लोके 'जहारि' इति प्रसिद्धिः॥३६७॥

बिम्ब्यां रक्तफला गोल्हा प्रवालफलघोषिका।
ओष्ठोपमफला तुण्डी तुण्डिका पीलुपर्ण्यपि॥३६८॥ 10

॥ इत्याचार्यश्रीहेमचन्द्रविरचिते निघण्टुशेषे
चतुर्थः शाककाण्डः॥

बध्नाति **बिम्बी**, "डी-नी-बन्धि-" [हैमोणादिसू० ३२५] इति डिदिम्बः, तस्याम्। रक्तं फलमस्याः **रक्तफला**। गोलं जहाति **गोल्हा**, पृषोदरादित्वात् साधुः। प्रवालफलं घोषति **प्रवालफलघोषिका**। ओष्ठोपमानि फलान्यस्या **ओष्ठोपमफला**। 15
"तुणत् कौटिल्ये" तुण्यते **तुण्डी**, "कु-गु-हु-नी-कुणि-तुणि-" [हैमोणादिसू० १७०] इत्यादिना किद् डः प्रत्ययः। तुण्डमस्त्यस्यास्**तुण्डिका**, "अतोऽनेकस्वराद्" [सिद्ध० ७.२.६] इति इकः; तुण्डचेव वा। पीलोरिव पर्णान्यस्याः **पीलुपर्णी**। आह च—

बिम्बी रक्तफला तुण्डी तुण्डकेरफला च सा।
ओष्ठोपमफला गोल्हा पीलुपर्णी च तुण्डिका॥ 20
[धन्व० वर्ग १ श्लो० २०२] इति।

एतस्या लोके 'गोल्ह' इति प्रसिद्धिः। 'टिडूरी' इति देशान्तरे प्रसिद्धिः॥३६८॥

॥ इति श्रीमद्बृहत्खरतरगच्छे श्रीजिनराजसूरिशिष्यश्रीजयसागरमहोपाध्यायपट्टानुक्रमायातवाचनाचार्यधुर्यश्रीभानुमेरुगणिशिष्यसमस्तप्रशस्तग्रन्थावलीविचक्षणश्रीज्ञानविमलोपाध्यायशिष्यवाचनाचार्यश्रीश्रीवल्लभगणिविरचितायां श्रीहेमचन्द्राचार्यकृतनिघण्टुशेषटीकायां शाककाण्डश्चतुर्थः- 25
समाप्तः॥४॥

[पञ्चमस्तृणकाण्डः]

अथ प्रक्रमागतं तृणकाण्डं प्रतन्यते—

[1]रौहिषे श्यामकं पौरं पूतीकं भूरि कत्तृणम् ।
सौगन्धिकं देवजग्धं शकलं ध्याम-पुद्गले ॥३६९॥

यत्र तत्र रोहति **रौहिषम्**, "रुहेर्वृद्धिश्च" [हैमोणादिसू० ५४८] इति इषः वृद्धिश्च, पुं-क्लीबलिङ्गः, तत्र । **श्यामकं** श्यामवर्णत्वात् । पुरे भवं **पौरम्**, "भवे" [सिद्ध० ६.३.१२३] इत्यण् । पुनातीति **पूतीकम्**, "सृणीका-ऽस्तीक-" [हैमोणादिसू० ५०] इतीके निपात्यते । भवति **भूरि**, "भू-सू-कुशि-" [हैमोणादिसू० ६९३] इति किद् रिः । कुत्सितं तृणं **कत्तृणम्**, असारत्वात्, "तृणे जातौ" [सिद्ध० ३.२.१३२] इति कोः कदादेशः । सुगन्धः प्रयोजनमस्य **सौगन्धिकम्**, "प्रयोजनम्" [सिद्ध० ६.४.११७] इतीकण् । देवैर्जग्धमिव अन्तः-शुषिरत्वाद् **देवजग्धम्** । "शक्लृंट् शक्तौ" शक्नोति **शकलम्**, "मृदि-कन्दि-" [हैमोणादिसू० ४६५] इत्यादिना अलः प्रत्ययः । ध्यायते पशुभिर्**ध्यामम्**, "विलि-भिलि-" [हैमोणादिसू० ३४०] इति किन्मः; धूसरवर्णं वा । पूयते पुनाति वा **पुद्गलम्**, "मुरलोरल-" [हैमोणादिसू० ४७४] इति अले निपात्यते । आह च—

कत्तृणं शकलं भूरि पूतीकं रौहिषं मतम् ।
ध्यामकं श्यामकं पौरं पुद्गलं देवजग्धकम् ॥
[धन्व० वर्ग १ श्लो० ८०] इति ।

एतस्य लोके 'रोहीस' इति प्रसिद्धिः ॥३६९॥

भूस्तृणे रौहिषं छत्रोऽतिच्छत्रश्च कुटुम्बकः ।
पूतीकं भूरि पालघ्नं मालातृण-सुगन्धिके ॥३७०॥

भुवस्तृणः **भूस्तृणः**, पारस्करादित्वात् सुट्; भूरव्ययं वा, तत्र । रोहति **रौहिषम्** । छत्राकारस्तृणविशेषश्छत्रः । अतिक्रान्तश्छत्र**मतिच्छत्रः** । **छत्रातिच्छत्रमि-**

---

१ रौहिषं कामकं पौरं भूतिकं भूतिकतृणम् । स्तोगन्धिकं धिकं देवजग्धं शकलि-पुद्गले ॥ नि० ॥ २ भूस्तृणं रोहितं छत्रातिच्छत्रक-कटुम्बके । भूतीकं भूतिकतृणं माला° नि० ॥

त्येके। "कुटत् कौटिल्ये" कुटति कुटुम्बः, "कुटचुन्दि-चुरि-" [हैमोणादिसू० ३२६] इत्यादिना किदुम्बः प्रत्ययः, स्वार्थिके के **कुटुम्बकः**। पुनाति पूयते वा **पूतीकम्**, "सृणीका-ऽस्तीक-" [हैमोणादिसू० ५०] इतीके निपात्यते। भवति **भूरि**, "भू-सू-कुशि-"[हैमोणादिसू० ६९३] इति किद् रिः। "पारुष्यात् पालं हन्ति **पालघ्नम्**" इति **क्षीरस्वामी**। मालारूपाणि तृणान्यस्य **मालातृणम्**। शोभनो गन्धोऽस्यस्य सुगन्धि, के **सुगन्धिकम्**। आह च—

भूस्तृणो रौहिषो भूरिः पूतीकोऽथ कुटुम्बकः।
मालातृणश्च पालघ्नं छत्रकश्छत्रसंज्ञकः॥
[धन्व० वर्ग ४ श्लो० ४७] इति।

एतस्य लोके 'गन्धतृण' इति प्रसिद्धिः॥३७०॥

दर्भे दभ्रः खरो बर्हिर्वीरः सूची कुथः कुशः।
सीरी वानीरजो गुन्द्रः पवित्र-कुतुकावपि॥३७१॥

दृणाति पारुष्याद् **दर्भः**, "गृ-दृ-रमि-" [हैमोणादिसू० ३२७] इति भः, दभ्यतेऽसाविति वा, तत्र। पृषोदरादित्वाद् **दभ्रः**, "खुर-क्षुर-" [हैमोणादिसू० ३९६] इति रे निपातनाद्वा। **खरः** परुषत्वात्। "बृहु शब्दे च" बृंहति **बर्हिः**, पुं-क्लीब-लिङ्गः, "बंहि-बृंहेर्नलुक् च" [हैमोणादिसू० ९९०] इति इस्। विशेषेण ईरयति **वीरः**। सूचीव **सूची**, अग्रे तैक्ष्ण्यात्। "कुन्थश् संक्लेशे" कुथ्नाति **कुथः**, "नाम्युपान्त्य-" [सिद्ध० ५.१.५४] इति कः। कौ शेते **कुशः**, "क्वचित्" [सिद्ध० ५.१.१७१] इति डः, पुं-क्लीबलिङ्गः। सीरोऽस्यस्य **सीरी**, हलाकाराग्रत्वात्। वानीरे जातो **वानीरजः**, "क्वचित्" [सिद्ध० ५.१.१७१] इति डः। गुणैर्दोषा द्रान्ति अस्मिन् **गुन्द्रः**, पृषोदरादित्वात्। पूयतेऽनेन **पवित्रम्**, "ऋषि-नाम्नोः करणे" [सिद्ध० ५.२.८६] इतीत्रः। कुः—भूमिस्तुद्यतेऽनेन **कुतुकः**; कुत्सितं तन्यते वा, "निष्क-तुरुष्क-" [हैमोणादिसू० २६] इति के निपात्यते। आह च—

मृदुदर्भः कुशो बर्हिः सूची वीरस्तु पत्रकः।
खरोऽन्यः पृथुलः सीरी गुन्द्राह्वो नीरजो निशिः॥
[धन्व० वर्ग ४ श्लो० १३३] इति।

एतस्य लोके 'डाभ' इति प्रसिद्धिः॥३७१॥

काशे स्यादिक्षुगन्धेक्षुकाण्ड[२]-श्यामलपुष्पकाः।
वायसेक्षुः पोटगलः कासेक्षुः कोकिलाक्ष[३]कः॥३७२॥

---

१ बर्हिर्वारास्तवीकुघः कुशः। सारीवानी रजो गुन्द्रा पवित्रा कुतसावपि॥ नि०॥
२ °ण्डश्चामरपुष्पकः नि०॥ ३ °किनां क्षकः नि०॥

"काशृङ् दीप्तौ" काशते **काशः**, पुं-क्लीबलिङ्गः, [तत्र]। इक्षोरिव गन्धोऽस्य **इक्षुगन्धः**। इक्षोरिव काण्डोऽस्य **इक्षुकाण्डः**। श्यामलं पुष्पमस्य **श्यामलपुष्पः**, के **श्यामलपुष्पकः**। वायस इव इक्षुः **वायसेक्षुः**। पोटेन—संश्लेषेण गलति **पोटगलः**। काशश्चासौ इक्षुश्च **कासेक्षुः**। कोकिलस्येव अक्षि अस्य कोकिलाक्षः, के **कोकिलाक्षकः**। आह च—

काशः काण्डेक्षुरुद्दिष्टः काकेक्षुर्वायसेक्षुकः।
इक्ष्वारक इक्षुकाण्डः स चैवेक्षुरकः स्मृतः॥
[धन्व० वर्ग ४ श्लो० १३०] इति।

एतस्य लोके 'कासु' इति प्रसिद्धिः॥३७२॥

[1]उलपे बल्वजा बालः केशी दृढलताऽपि च।

वलति **उलपः**, "विशिष्टपोलप-" [हैमोणादिसू० ३०७] इत्यपे निपात्यते, तत्र। वलन्ति **बल्वजाः**, पुंसि बहुवचनान्तः, "बलेर्वोऽन्तश्च वा" [हैमोणादिसू० १३३] इत्यजः। वलति **बालः**, "वा ज्वलादि-" [सिद्ध० ५.१.६२] इति णः। केशाः सन्त्यस्य **केशी**। दृढा लता **दृढलता**।

[2]इक्षौ रसालो गण्डीरी गण्डकी खड्गपत्रकः॥३७३॥

"इषत् इच्छायाम्" इष्यते **इक्षुः**, पुंलिङ्गः, "मस्जीष्यशिभ्यः सुक्" [हैमोणादिसू० ८२६] इति कित् सुप्रत्ययः, तत्र। रसमलति आलाति वा **रसालः**। गण्डीन् ईरयति **गण्डीरी**। गण्डकाः सन्त्यस्य **गण्डकी**। खड्गाकाराणि पत्राण्यस्य खड्गपत्रः, के **[3]खड्गपत्रकः**।

एतस्य लोके 'गांडउ' 'सेलडी' इति वा प्रसिद्धिः॥३७३॥

तस्यैकादश भेदाः स्युः पुण्ड्र-कान्तारकादयः।

'तस्य' इक्षोः 'भेदाः' जातयः एकादश। पुणति पुण्ड्यते वा **पुण्ड्रः**, "खुर-क्षुर-" [हैमोणादिसू० ३९६] इति रे निपात्यते। [4]कम्यते कान्तारः, "द्वार-शृङ्गार-" [हैमोणादिसू० ४११] इत्यारे निपात्यते, [के **कान्तारकः**]। आदिशब्दात् कोषकाराद्याः। यदुवाच **वाचस्पतिः**—

---

१ उलपवल्वजो बालकेशी नि०॥ २ ईक्षू रसालो नि०॥ ३ क्षुद्रपत्रकः नि०॥ ४ "अथेक्षुः स्याद् रसालोऽसिपत्रकः' [अभि० का० ४ श्लो० २६०] इत्यत्र 'असिपत्रक' इति नामापि दृश्यते॥ ५ "कम्यते कान्तारः, कान्तं ऊषमियर्त्तीति वा, कान्ता आराः—भागा अस्येति वा।" इत्यभिधानचिन्तामणिस्वोपज्ञटीकायाम्॥

पुण्ड्रेक्षौ पुण्ड्रकः सेव्यः पौण्ड्रकोऽतिरसो मधुः ।
श्वेतकाण्डो भीरुकस्तु हरितो मधुरो महान् ॥

शून्येश्वरस्तु कान्तारः कोषकारस्तु वंशकः ।
शतघोरस्त्वीषत्क्षारः पीतच्छायोऽथ तापसः ॥

सितनीलोऽथ नेपालो वंशप्रायो महाजलः ।
अन्वर्थस्तु दीर्घपत्रो दीर्घपर्वा कषायवान् ॥

काष्ठेक्षुस्तु स्वैल्पकाण्डो घनग्रन्थिर्वनोद्भवः ।
नीलघोरस्तु सुरसो नील-पीतलराजिवान् ॥

अनूपसम्भवः प्रायः खैनटी[2] त्विक्षुवालिका ।
करङ्कशालिः शाकेक्षुः सूचिपत्रो गुंडेक्षुकः[3] ॥

[ ] इति ।

नले नडः शून्यमध्यो धमनो[4] नर्तको नटः ॥३७४॥
आरण्यनलको[5] रन्ध्री पोटगलो बिभीषणः ।

नलति–अर्दयति **नलः**, तत्र, ड-लयोरैक्ये **नडः**, पुं-क्लीबलिङ्गौ । शून्यो मध्ये **शून्यमध्यः** । धमिः सौत्रः, धमत्यन्तःशुषिरत्वाद् **धमनः** । नृत्यतीव **नर्तकः**, णकः । नटति **नटः** ॥३७४॥

आरण्यश्चासौ नलकश्च **आरण्यनलकः** । रन्ध्रमस्त्यस्य **रन्ध्री** । पोटेन–संश्लेषेण गलति **पोटगलः** । भीषि, बिभीषयते **बिभीषणः**, "नन्द्यादिभ्योऽनः" [सिद्ध० ५.१.५२] इत्यनः । आह च—

नलो नडो नटश्चैव स च पोटगलः स्मृतः ।
धमनी नर्त्तको रन्ध्री शून्यमध्यो बिभीषणः ॥

[धन्व० वर्ग ४ श्लो० १४१] इति ।

एतस्य लोके 'नलु' इति प्रसिद्धिः ।

---

१ 'ह्रस्वकाण्डो' इति **अभिधानचिन्तामणि**स्वोपज्ञटीकायां वाचस्पत्युद्धरणे पत्र ४८२ ॥ २ "खर्वटी" इति अभि०स्वोपज्ञटीकायां वाचस्पत्युद्धरणे पत्र ४८२ ॥ ३ "गुडेक्षवः" इति अभिधान०स्वोपज्ञटीकायां वाचस्पत्युद्धरणे पत्र ४८२ ॥ ४ गमनो नि० ॥ ५ अरण्य° नि० ॥

नली तु ग्रामनलिका नाकुली लेखकाविता ॥३७५॥

गौरादित्वाद् ङ्यां **नली**। 'तुः' पुनरर्थे। ग्रामस्य नलिका **ग्रामनलिका**। नकुलानामियं **नाकुली**, "तस्येदम्" [सिद्ध० ६.३.१६०] इत्यण्; न आकुलयति वा, नखादित्वान्नञोऽदभावः। लेखकैरविता—रक्षिता **लेखकाविता** ॥३७५॥

शरे तु मुञ्जो बाणाख्यः स्थूलदर्भः पितामहः।
गुन्द्रस्तेजनको भद्रमुञ्जो याजनकः क्षुरः ॥३७६॥

शृणाति पारुष्यात् **शरः**, अच्, तत्र। मुञ्जति—शब्दायते वायुना **मुञ्जः**। बाणस्य आख्या अस्य **बाणाख्यः**। स्थूलश्चासौ दर्भश्च **स्थूलदर्भः**। **पितामहः**। गुणैर्दोषा द्रान्त्यस्मिन् **गुन्द्रः**, पृषोदरादित्वात्। "गुन्द्रो दर्भविशेषः रूढः" इति **क्षीरस्वामी**। यदाहुः—

दर्भाणां स्थाने शरैः प्रस्तरितव्यम्।

यदमरश्च—

गुन्द्रस्तेजनकः शरः [का० २ वर्ग ४ श्लो० १६२] इति।

तेजयति—शिनोति तेजनः, स्वार्थिके के **तेजनकः**। भद्रश्चासौ मुञ्जश्च **भद्रमुञ्जः**। **याजनको** यज्ञियत्वात्। क्षुरति **क्षुरः**। आह च—

शरो बाण इक्षुकाण्डः इक्ष्वटः सायकः क्षुरः।
स्थूलोऽन्य इक्षुरः प्रोक्त इक्ष्वारश्च पितामहः॥
[धन्व० वर्ग ४ श्लो० १३५] इति।

एतस्य लोके 'शरकड' इति प्रसिद्धिः ॥३७६॥

मुञ्जस्तु यज्ञियो मेध्यो दृढत्वग् ब्रह्ममेखलः।

'तुः' पुनरर्थे। यज्ञाय हितो यज्ञियो मुञ्जो **मेध्यः**, पवित्रत्वात्। दृढा त्वगस्य **दृढत्वक्**। ब्रह्मणो मेखलेव **ब्रह्ममेखलः**।

अथ बालतृणे शष्पं शुकं शालिकमङ्कुलम् ॥३७७॥

बालं—नवं तृणं **बालतृणम्**, तत्र। "शष हिंसायाम्" शष्यते **शष्पम्**, "शद्लृ शातने" शीयते वा **शष्पम्**, "शदि-बाधि-षनि-हनः ष् च" [हैमोणा-

---

१ °नलिर्ग्राम° नि० ॥ २ लेखकाञ्चिता नि० ॥ ३ गुञ्जस्तजनको नि० ॥ ४ °नकक्षुरः नि० ॥

दिसू० २९९] इति पः प्रत्ययः षश्चान्तादेशः, पुं-क्लीबलिङ्गः । "शुक गतौ" शोकति **शुकम्**, "नाम्युपान्त्य-" [सिद्ध० ५.१.५४] इति कः; शवति वा, "विचि-पुषि-" [हैमोणादिसू० २२] इति कित् कः । **शालिकम्** । "अगु गतौ" अङ्गति **अङ्गुलम्**, "ऋषि-वृषि-" [हैमोणादिसू० ३३१] इति बहुवचनादुलः ॥३७७॥

तृणे स्यादर्जुनं

तरत्यम्भसि **तृणम्**, तृंद्यते—अद्यते पशुभिरिति वा, पुं-क्लीबलिङ्गः, "भ्रूण-तृण-" [हैमोणादिसू० १८६] इति णे निपात्यते, तत्र । अर्ज्यते **अर्जुनम्**, "यम्यजि-शक्यर्जि-" [हैमोणादिसू० १८६] इत्युनः । 'सर्वं च तृणमर्जुनम्" इति **भागुरिः** ।

घासे यवसं चारिरित्यपि ।

घस्यते--अद्यते पशुभि**र्घासः**, घञ् प्रत्ययः, तत्र । यूयते **यवसम्**, "वहि-युभ्यां वा" [हैमोणादिसू० ५७१] इति असः, क्लीबलिङ्गोऽयम् । **वाचस्पतिस्तु**—"अथाऽस्त्री यवसो घासः" इति पुंस्यप्याह । "चर भक्षणे च" चर्यते पशुभिरिति **चारिः**, "कृ-शृ-कुटि-ग्रहि-खन्यणि-" [हैमोणादिसू० ६१९] इत्यादिना णिदिः ।

दूर्वायां तु शतपर्वा भार्गवी विजया जया ॥३७८॥
मङ्गल्या शाद्वलाऽनन्ताऽमरी प्रतानिका रुहा ।

दूर्व्यते–हिंस्यते पशुभिरिति **दूर्वा**; दूरे वाति वा, पृषोदरादित्वात् साधुः, तस्याम् । शतं बहूनि–पर्वाण्यस्याः **शतपर्वा** । भृगोरियं **भार्गवी**, "तस्येदम्" [सिद्ध० ६.३.१६०] इत्यण् । विजयते **विजया** । जयति **जया** ॥३७८॥

मङ्गले साधुः **मङ्गल्या**, "तत्र साधौ" [सिद्ध० ७.१.१५] इति यः । शादाः सन्त्यस्याः **शाद्वला**, "नड-शादाद् वलः" [सिद्ध० ६. २. ७५] इति वलः । नास्ति अन्तोऽस्या **अनन्ता**, दूरप्रसरणात् । न म्रियते **अमरी** । प्रतानोऽस्त्यस्याः **प्रतानिका** । रोहति मूले **रुहा**, "नाम्युपान्त्य-" [सिद्ध० ५.१.५४] इति कः । आह च—

नीली दूर्वा स्मृता शस्या शाद्वलं हरितं तथा ।

---

१ तृण्यते–अद्यते पशुभिरिति वा" इति अभिधानचिन्तामणिस्वोपज्ञटीकायाम् ॥

शतपर्वा शीतवीर्या शीतवल्ल्यसिता लता ॥

[धन्व० वर्ग ४ श्लो० १४३] इति ।

एतस्या लोके 'द्रोअ' इति प्रसिद्धिः । नीलीयम् ।

[सहस्रवीर्या श्यामाङ्गी हरिता हरितालयपि] ॥३७९॥

श्वेतदूर्वा तु गोलोमी शीतवीर्या सिता लता ।

[सहस्रं वीर्याणि अस्याः **सहस्रवीर्या** । श्याममङ्गं अस्याः **श्यामाङ्गी** । **हरिता** नीलवर्णत्वात् । हरितां नीलत्वमलति **हरितालि** ॥३७९॥]

श्वेता दूर्वा **श्वेतदूर्वा** । 'तुः' पुनरर्थे । गोरिव लोमान्यस्या **गोलोमी** । शीतं वीर्यमस्याः **शीतवीर्या** । **सिता** शुक्ला । लाति लायते वा **लता**, "पृषि-रञ्जि-" [हैमोणादिसू० २०८] इति किदतः । आह च—

श्वेतदूर्वा तु गोलोमी श्वेतदण्डी सिता लता ।
सहस्रवीर्याऽनन्ता च दुर्मरा भार्गवी रुहा ॥

[धन्व० वर्ग ४ श्लो० १४४] इति ।

एतस्या लोके 'श्वेतदूर्वा' इति प्रसिद्धिः ।

गण्डदूर्वायां गण्डाली वारुणी शकुलाक्षकः ॥३८०॥

श्वेतदूर्वाविशेषोऽयम् । गण्डैः—ग्रन्थिभिरल्यते **गण्डाली** । [. . . . . **वारुणी** ।] शकुलस्येव अक्षि अस्य शकुलाक्षः, मत्स्याक्षितुल्यग्रन्थिः, स्वार्थिके के **शकुलाक्षकः** । आह च—

गण्डदूर्वा तु गण्डाली तीव्रा मत्स्याक्षिकाऽपि च ।
वल्ली नाडी कलायश्च धारणी शकुलाक्षिका ॥

[धन्व० वर्ग ४ श्लो० १४५] इति ॥३८०॥

मुस्तायाँ मुस्तको भद्रमुस्ता राजकशेरुकः ।
मुस्तो वराहो गाङ्गेयः कुरुविन्दोऽम्बुदाह्वया ॥३८१॥

मुस्यति—खण्डयति रोगान् **मुस्ता**, त्रिलिङ्गः, "शी-री-" [हैमोणादिसू० २०१] इति कित् तः, तत्र । मुस्त एव **मुस्तकः** । भद्रा चासौ मुस्ता च **भद्रमुस्ता** ।

---

१ श्लो० ३७९ श्लोकस्योत्तरार्धं तद्व्याख्या चापि टीकादर्शे नास्ति ॥ २ शतवीर्या नि० ॥ ३ °यां भद्रको भद्रं° नि० ॥ ४ °रुकः । गुन्द्री वरोहो नि० ॥

राजा चासौ कशेरुश्च राजकशेरुः, स्वार्थिके के **राजकशेरुकः** । **मुस्तः** पुंसि । व्रियते वृणोति वा **वराहः**, "वृ-कटि-शमिभ्य आहः" [हैमोणादिसू० ५९१] इत्याहः । गङ्गाया अपत्यमिव **गाङ्गेयः**, शुभ्रादित्वादेयण् । क्लीबेऽप्यन्ये । **कुरून्** देशं विन्दति **कुरुविन्दः** । अम्बुदस्याऽऽह्वयोऽस्या **अम्बुदाह्वया** । आह च—

मुस्तमम्बुधरो मेघो घनो राजकशेरुकः । 5
भद्रमुस्तो वराहोष्ट्रो(ऽऽब्दो) गाङ्गेयः कुरुविन्दकः ॥

[धन्व० वर्ग १ श्लो० ४०] इति ।

एतस्या लोके 'मोथ' इति प्रसिद्धिः ॥३८१॥

कुटन्नटे तु कैवर्तीमुस्तकं जीविताह्वयम् ।
काण्डीरकं जीर्णबुध्नं गोनर्दं गोपुरं[1] प्लवम् ॥३८२॥ 10

शतपुष्पं दाशपुरं[2] वानेयं परिपेलवम् ।
जलमुस्ता मुस्तकाभं शेवालदलसम्भवम् ॥३८३॥

कुटन्—वक्रीभवन् नटति—स्पन्दते **कुटन्नटः**, तत्र । 'तुः' अत्र विशेषार्थेऽव्ययम् । कैवर्त्या मुस्तकं **कैवर्तीमुस्तकम्** । जीवितस्य आह्वयोऽस्य **जीविताह्वयम्** । काण्डीमीरयति **काण्डीरकम्** । जीर्णं बुध्नमस्य **जीर्णबुध्नम्** । गवि नर्दतीव **गोनर्दम्** । 15
अत एव गाः पिपर्त्ति **गोपुरम्** , गुप्यते वा, "श्वशुर-" [हैमोणादिसू० ४२६] इत्युरे निपात्यते । प्लवते लघुत्वात् **प्लवम्** , अच् ॥३८२॥

शतं—बहूनि पुष्पाण्यस्य **शतपुष्पम्** । **दशपुरे** भवं **दाशपुरम्**; दाशान् पिपर्त्ति वा, "श्वशुर-" [हैमोणादिसू० ४२६] इत्युरे साधुः । वने भवं **वानेयम्** , "भवे" [सिद्ध०६.३.१२३] इत्येयण् । "पेल्ल गतौ" परि—सामस्त्येन पेलति 20
परिपेलवम् , "वडि-वटि-पेल्ल-चणि-पणि-पल्लि-वल्लेरवः" [हैमोणादिसू० ५१५] इत्यवः । जलस्य मुस्ता **जलमुस्ता** । मुस्तकस्य आभाऽस्य **मुस्तकाभम्** । शेवालदले सम्भवति **शेवालदलसम्भवम्** । आह च—

परिपेलं प्लवं वन्यं गोपुरं स्यात् कुटन्नटम् ।
शतपुष्पं दाशपुरं गोनर्दं जीर्णबुध्नकम् ॥ 25

[धन्व० वर्ग ३ श्लो० ५५] इति ।

---

१ गोपुरप्लवम् नि० ॥ २ दारपुरं नि० ॥

एतस्य लोके 'काकरहूले' इति प्रसिद्धिः ॥३८३॥

वीरणे तु वीरतरं वीरभद्रं सुमूलकम् ।

वीरयते **वीरणम्** , अनट्, तत्र । अतिशयेन वीरं **वीरतरम्** । वीरं च तद् भद्रं च **वीरभद्रम्** । शोभनं मूलमस्य सुमूलम् , के **सुमूलकम्** ।

मूलेऽस्योशीरमभयं समगन्धि रणप्रियम् ॥३८४॥

'अस्य' वीरणस्य मूले । उश्यते—काम्यते इति **उशीरम्** , "घसि-वशि-" [हैमोणादिसू० ४१९] इति किदीरः, [पुं-क्लीबलिङ्गः] । नास्ति भयमस्मादभयम्, रोगहत्वात् । समो गन्धोऽस्त्यस्य **समगन्धि** । रणस्य प्रियं **रणप्रियम्** ; रणः प्रियोऽस्येति वा । आह च सामान्येन **धन्वन्तरिः**—

उशीरं च मृणालं स्यादभयं समगन्धिकम् ।
रणप्रियं वीरतरं वीरं वीरणमूलकम् ॥
[धन्व० वर्ग ३ श्लो० १४] इति ।

अमरस्तु पृथगाह—

स्याद् वीरणं वीरतरं मूलेऽस्योशीरमस्त्रियाम् ।
अभयम् [का० २ वर्ग ४ श्लो० १६४] इति ।

एतस्य लोके 'उसीर' इति प्रसिद्धिः ॥३८४॥

लामज्जके तु नलदममृणालं लेयं लघु ।
इष्टकापथकं शीघ्रं दीर्घमूलं जलाशयम् ॥३८५॥

॥ इत्याचार्यश्रीहेमचन्द्रविरचिते निघण्टुशेषे
पञ्चमस्तृणकाण्डः ॥५॥

लाति दोषान् ला, मज्जा–सारोऽस्य **लामज्जकम्** , तत्र । नलं द्यति **नलदम्** , अपारुष्यात्; नलति वा । अत एव **अमृणालम्**—अहिंस्रम् । लीयते **लेयम्** । "**लघु** गुणेन" इति **क्षीरस्वामी**; "लङ्घते लघु" इत्यपरे, "रङ्घि-लङ्घि-" [हैमोणादिसू० ७४०] इत्यादिना उः प्रत्ययः नकारस्य च लोपः । इष्टं कापथमस्य, अधोवातकृत्त्वादिति इष्टकापथम्, स्वार्थिके के **इष्टकापथकम्** । **शीघ्रं** लघुत्वात् । दीर्घं मूलमस्य **दीर्घमूलम्** । जले आशेते **जलाशयम्** ; शीतवीर्यत्वाद्वा । आह च—

१ लवं नि० ॥

लामज्जकं सुनालं स्यादमृणालं लयं लघु ।
इष्टकापथकं शीतवीर्यं मूलं जलाशयम् ॥
[धन्व० वर्ग ३ श्लो० ८६] इति ।

अमरोऽप्याह—

नलदं सेव्यममृणालं जलाशयम् ॥
लामज्जकं लघु लयमवदाहेष्टकापथे ।
[का० २ वर्ग ४ श्लो० १६४–६५] इति ।

एतस्य लोके 'लावंजउ' इति प्रसिद्धिः ॥३८५॥

इति श्रीमद्बृहत्खरतरगच्छे श्रीजिनराजसूरिशिष्यश्रीजयसागर-
महोपाध्यायपट्टानुक्रमायातवाचनाचार्यधुर्यश्रीभानुमेरुगणि-
शिष्यसमस्तप्रशस्तग्रन्थावलीविचक्षणश्रीज्ञानविम-
लोपाध्यायशिष्यवाचनाचार्यश्रीश्रीवल्लभ-
गणिविरचितायां श्रीहेमचन्द्राचार्य-
कृतनिघण्टुशेषटीकायां तृण-
काण्डः पञ्चमः
समाप्तः॥५॥

*

६

[षष्ठो धान्यकाण्डः]

अथावसरागतं धान्यकाण्डं षष्ठं विव्रियते–

अथ धान्ये सस्यं सीत्यं व्रीहि-स्तम्बकरी अपि ।

धन्यते **धान्यम्**, ष्यण्; "डुधांग्क् धारणे" धीयते वा धान्यम्, "धाग्-राजि-शृ-रमि-" [हैमोणादिसू० ३७९] इत्यादिना अन्यः व्रीह्यादिः । यदाहुः—

व्रीहिर्यवो मसूरो गोधूमो मुद्ग-माष-तिल-चणकाः ।
अणवः प्रियङ्गु-कोद्रव-मयुष्टकाः शालिराढक्यः ॥
[1]द्वौ च कुलाय-कुलत्थौ शणसप्तदशानि धान्यानि ।
[ ] इति ।

"षसक् स्वप्ने" सस्यते सुखमनेन **सस्यम्**, "स्था-छा-मा-" [हैमोणादिसू० ३५७] इति यः । सीतया सङ्गतं **सीत्यम्**, "सीतया सङ्गते" [सिद्ध० ७.१.२७] इति यः । व्रीयते–याच्यते **व्रीहिः** । "व्रीणाति **व्रीहिः**" इति **क्षीरस्वामी**, "व्रियो हिक्" [हैमोणादिसू० ७१०] इति किद् हिः । स्तम्बं करोति **स्तम्बकरिः**, पुंल्लिङ्गाविमौ, "शकृत्स्तम्बाद् वत्स-व्रीहौ कृगः" [सिद्ध० ५.१.१००] इति इः ।

आशौ स्यात् पाटलो व्रीहिः

अश्नुते अश्यते वा **आशुः**, [पुंल्लिङ्गः], "कृ-वा-पा-जि-" [हैमोणादिसू० १] इत्युण्; शीघ्रपाकत्वाद्वा । यद् **दुर्गः**—

आश्वाख्या शालि-शीघ्रयोः [ ] इति ।

पाटलच्छायः **पाटलः**, पाटयति वा **पाटलः**, 'मृदि कन्दि-" [हैमोणादिसू० ४६५] इत्यलः । "व्री भरणे" व्रीणाति **व्रीहिः**–षष्टिकादिधान्यविशेषः । यदाह—

आशुर्व्रीहिः पाटलः स्यात् [ ] इति ।

गर्भपाकिनि षष्टिकः ॥ ३८६॥

---

१ किञ्च कुलाय° अभिधानचिन्तामणिस्वोपज्ञटीकायां उद्धरणे ॥

गर्भे पच्यते स्वयमेवेत्येवंशीलो **गर्भपाकी**, णिनि प्रत्यये न्यङ्कादित्वात् साधुः, तत्र । षष्टिरात्रेण पच्यते **षष्टिकः**, "यव-यवक-षष्टिकाद् यः" [सिद्ध० ७.१.८१] इत्यत्र षष्टिकेति निर्देशात् साधुः । आह च—

षष्टिकः कङ्गुकः पीत-प्रमोदक-मुकुन्दकाः ।
[ ] इति ॥३८६॥

शालौ तु कलमाद्याः स्युः

शलति **शालिः**, पुंल्लिङ्गः, "कमि-वमि-" [हैमोणादिसू० ६१८] इति णिदिः । कलमः आद्यो येषां ते **कलमाद्याः** ।

कलमे तु कलामकः ।

कडति—माद्यति अनेन **कडमः**, लत्वे **कलमः**, "सृ-पृ-प्रथि-" [हैमोणादिसू० ३४७] इत्यमः, तत्र । कलां—कलनाममति **कलामकः** ।

लोहिते रक्तशालिः स्यात्

लोहितो वर्णेन । रक्तश्चासौ शालिश्च **रक्तशालिः** ।

महाशालौ सुगन्धिकः ॥ ३८७॥

महांश्चासौ शालिश्च **महाशालिः**, तत्र । शोभनो गन्धोऽस्य सुगन्धिः, "सु-पूत्युत्सुरभेः-" [सिद्ध ७.३.१४४] इति इत् समासान्तः, स्वार्थिके के **सुगन्धिकः** । एते सर्वेऽपि शालिविशेषाः । आह च—

रक्तशालिर्लोहितः स्याद् गरुडः शकुनाहृतः ।
पुण्डरीको महाशालिः कलमस्तु कलामकः ॥

रक्तशालिदीर्घशूकः पुण्ड्रो महिषमस्तकः ।
पूर्णचन्द्रो महाशालिः पुण्डरीको प्रमोदनः ॥

पुष्पाण्डकः शीतभीरुः काञ्चनः शकुनाहृतः ।
पाण्डुर्गौरः शारिवाख्यो रोध्रपुष्पः सुगन्धिकः ॥

हायनो दीर्घनालश्च
[ ] इति ॥३८७ ॥

यवे हयप्रियस्तीक्ष्णशूकः

"युक् मिश्रणे" यूयते **यवः**, "युवर्ण-" [सिद्ध० ५.३.२८] इत्यल्, तत्र। हयानां प्रियो **हयप्रियः**। तीक्ष्णः शूकः–किंशारुरस्य **तीक्ष्णशूकः**। आह च—

यवे च तीक्ष्णशूको....निःशूकोऽतियवोऽपरः।

[ ] इति।

एतस्य लोके 'यव' इति प्रसिद्धिः।

तोक्मस्त्वसौ हरित्।

'असौ' यवः 'हरिद्' नीलः तुज्यते **तोक्मः**, "रुक्म-ग्रीष्म-" [हैमोणादिसू० ३४६] इति मे निपात्यते।

मङ्गल्यैके मसूरः स्यात्

मङ्गले साधुर्मङ्गल्यः, "तत्र साधौ" [सिद्ध० ७.१.१५] इति यः, स्वार्थिके के **मङ्गल्यकः**, तत्र। मस्यति–परिणमते **मसूरः**, पुं-स्त्रीलिङ्गः, "मी-मसि-" [हैमोणादिसू० ४२७] इत्यूरः। आह च—

मसूरिका मसूरी स्यान्मङ्गल्या पाण्डुराऽपरा।

[ ] इति।

एतस्य लोके 'मसूर' इति प्रसिद्धिः।

कलाये तु सतीनकः ॥३८८॥

हरेणुः खण्डिकश्च

"कलि शब्द-संख्यानयोः" कल्यते **कलायः**, "कुलि-लुलि-कलि-कषिभ्यः कायः" [हैमोणादिसू० ३७२] इति किदायः; कलम्–अतीसारमयते वा, कं लातीति वा, तत्र। सीदन्त्यनेन सतीनः, "दिन-नग्न-" [हैमोणादिसू० २६८] इति ने निपात्यते, स्वार्थिके के **सतीनकः**। **सतीनो**ऽपि ॥३८८॥

ह्रियते **हरेणुः**, पुंल्लिङ्गः, "कृ-ह्र-भू-" [हैमोणादिसू० ७७२] इत्येणुः। खण्डयते **खण्डिकः**,"कुशिक-" [हैमोणादिसू० ४५] इतीके निपात्यते। आह च—

कलायः खण्डिकः प्रोक्तस्त्रिपुटः क्षुद्रखण्डिकः।

[ ] इति।

---

१ °यस्तार्क्ष्यशुकस्तोक्यस्तुसो हरित् नि० ॥ २ °के स्यान्मसूरः नि० ॥

एतस्य लोके 'कलायरा' इति प्रसिद्धिः ।

अथ चणके हरिमन्थकः ।

"चण शब्दे" चणति दल्यमानः चणकः, 'दृ-कृ-नॄ-" [हैमोणादिसू० २७] इत्यकः, तत्र । हरिभिर्मथ्यते **हरिमन्थकः** । आह च—

चणको हरिमन्थः स्याद् वाजिमन्थोऽश्वजीवकः । 5

[ ] इति ।

एतस्य लोके 'चिणा' इति प्रसिद्धिः ।

माषे तु मदनो नन्दी वृष्यो बीजवरो बली ॥३८९॥

मीयते **माषः**, पुं-क्लीबलिङ्गः, "वृ-कृ-तॄ-मीङ्-माभ्यः षः" [हैमोणादिसू० ५४०] इति षः, तत्र । मदयति वृष्यत्वाद् **मदनः** । नन्दयत्यवश्यं **नन्दी** । वृषाय— 10 मैथुनाय हितो **वृष्यः**, "प्राण्यङ्ग-रथ-" [सिद्ध० ७ १.३७] इति यः, वृष्यते तैलादिनेति "कृ-वृषि-" [सिद्ध० ५.१.४२] इति क्यप् वा । **बीजेषु वरो बीजवरः**; बीजं—शुक्रं वृणोति वा । बलं—रेतोऽस्त्यत्र **बली** । एतस्य लोके "उडद' इति प्रसिद्धिः ॥३८९॥

मुद्गे तु प्रथनो लोभ्यो बलाटो हरितो हरिः । 15

मोदते अनेन **मुद्गः**, "पू-मुदिभ्यां कित्" [हैमोणादिसू० ९३] इति किद् गः, तत्र । प्रथते **प्रथनः** । "लुभच् गार्ध्ये" गार्ध्यम्—अभिकाङ्क्षा, लुभ्यते **लोभ्यः** । बलमटति **बलाटः** । **हरितः**—नीलः । **हरिः** हरिद्वर्णत्वात्, पुंल्लिङ्गः । एतस्य लोके 'मुंग' इति प्रसिद्धिः ।

पीतेऽस्मिन् वसु-खण्डीर-प्रवेल-जय-शारदाः ॥३९०॥ 20

'अस्मिन्' मुद्गे पीतवर्णे वसति चित्ते **वसुः**, पुंल्लिङ्गः, "भृ-मृ-तॄ-त्सरि-" [हैमोणादिसू० ७१६] इत्युः । खँण्ड्यते **खण्डीरः**, "जम्बीरा-ऽऽभीर-" [हैमोणादिसू० ४२२] इतीरे निपात्यते । प्रवेलत्यनेन **प्रवेलः** । जयत्यनेन **जयः** । शरदि भवः **शारदः**, "भर्तु-सन्ध्यादेरण्" [सिद्ध० ६.३. ८९] इत्यण् ॥३९०॥

कृष्णे प्रवर-वासँन्तौ हरिमन्थज-शिम्बिकौ । 25

---

१ °न्दी सरी बीज° नि० ॥ २ प्रघनो लोभ्यो वलाटो नि० ॥ ३ "खन्यते खण्डीरः" इति अभिध ान०स्वोपज्ञटीकायाम् ॥ ४ °सन्त-हरिमन्थज-शिम्बिकाः नि० ॥

कृष्णे मुद्गे प्रवियते **प्रवरः**। वसन्ते भवो **वासन्तः**, "भवे" [सिद्ध० ६.३.१२३] इत्यण्। हरिमन्थाज्जायते **हरिमन्थजः**। [शिम्बाऽस्त्यस्य **शिम्बिकः**, व्रीह्यादित्वादिकः; शिम्बिभिः कायति वा।]

वनमुद्गे तुवरक-निगूढक-कुलीमकाः ॥३९१॥[1]

खण्डी च[2]

वनस्य मुद्गो **वनमुद्गः**, तत्र। तुवरः—कषायः, स एव **तुवरकः**। निगूहति स्म **निगूढकः**। कौ लीयते **कुलीमकः**, 'कीचक-पेचक-" [हैमोणादिसू० ३३] इत्यकान्तो निपात्यते ॥३९१॥

खण्डमस्त्यस्य **खण्डी**। आह च—

मुद्गो वलाटो मङ्गल्यो हरितः शारदोऽपरः।
पीतः प्रचेतो वसुको माधवः प्रवरोऽसितः॥

वनमुद्गस्तुवरको राजमुद्गस्तु मण्डकः।
[ ] इति।

एते मुद्गविशेषाः।

राजमुद्गे तु मकुष्ठक-मयुष्ठकौ।

मुद्गानां राजा प्रधानत्वाद् **राजमुद्गः**, राजदन्तादित्वात् पूर्वनिपातः, तत्र। "मकुङ् मण्डने" मङ्क्तते अनेन मकुष्ठः, मीयतेऽसौ मयुष्ठः, "पष्टैधिठादयः" [हैमोणादिसू० १६६] इति ठे निपात्येते उभौ, [स्वार्थिके के **मकुष्ठकः, मयुष्ठकः**]। आह च—

मकुष्ठको मयुष्ठः स्यान्निष(ष्पा)वो वल्लकः स्मृतः।
[ ] इति।

एतस्य लोके 'मोठ' इति प्रसिद्धिः।

गोधूमे सुमनः

गुध्यति—परिवेष्टयति **गोधूमः**, "कुथि-गुधेरूमः" [हैमोणादिसू० ३५३] इति ऊमः; गां धुनाति वा, "विलि-भिलि-" [हैमोणादिसू० ३४०] इत्यादिना

१ 'कुलीनकाः' अभिधानचिन्तामणौ तत्स्वोपज्ञटीकायां च ॥ २ खण्डिको नि० ॥

"धूग्श् कम्पने" इत्यस्मात् किन्मः प्रत्ययः, तत्र । सुष्ठु मन्यते **सुमनः**, अच् । आह च—

गोधूमः सुमनः क्षुद्रो मधूली तु पिशीतिका ।
नन्दीमुखोऽल्पगोधूमो लोके सा पीसिकोच्यते ॥
[ ] इति ।

एतस्य लोके 'गोहूं' इति प्रसिद्धिः ।

वल्ले निष्पावः श्वेतशिम्बिकः ॥३९२॥

"वलि वल्लि संवरणे" वल्लते **वल्लः**, तत्र । निष्पूयते **निष्पावः**, "निरभेः पू-ल्वः" [सिद्ध० ५.३.२१] इति घञ् । श्वेता शिम्बिरस्य **श्वेतशिम्बिकः** । [२]**सितशिम्बिको**ऽपि ॥३९२॥

कुलत्थे तु कालवृन्तः

कुले तिष्ठति **कुलत्थः**, पृषोदरादित्वात् साधुः, तत्र । कालं वृन्तमस्य **कालवृन्तः** । आह च—

कुलत्थश्चक्रिकश्चक्रः कुलाली
[ ] इति ।

एतस्य लोके 'कुलथी' इति प्रसिद्धिः ।

ताम्रवृन्ता कुलत्थिका ।

ताम्रं वृन्तमस्याः **ताम्रवृन्ता** । ह्रस्वः कुलत्थः **कुलत्थिका** । एतस्य विशेषोऽयम् ।

आढक्यां तूवरी वर्णा

आढौकते **आढकी**, "कीचक-पेचक-" [हैमोणादिसू० ३३] इत्यके निपात्यते, तस्याम् । तूयते **तूवरी**, "नी-मी-कु-तु-चेर्दीर्घश्च" [हैमोणादिसू० ४४३] इति वरट् प्रत्ययः दीर्घश्च ह्रस्वस्य । वर्ण्यते **वर्णा** ।

एतस्या लोके 'तूंअरि' इति प्रसिद्धिः ।

---

१ °वः शितिबिम्बिकः नि० ॥ २ 'शितशिम्बिकः' अभिधानचिन्तामणौ । "शिता शिम्बिरस्य शितशिम्बिकः" इति स्वोपज्ञवृत्तौ ॥

स्यात् [1]कुल्माषे तु यावकः ॥३९३॥

कोलति **कुल्माषः**, "कुलेश्च माषक्" [हैमोणादिसू० ५६३] इत्यनेन "कुल बन्धु-संस्त्यानयोः" इत्यस्मात् किद् माषः प्रत्ययः, तत्र। **कुल्मासो**ऽपि। यौत्यम्भसा **यावकः**, णकः, अर्द्रस्विन्नो माषादिः। "धान्यविशेषः" इत्यन्ये ॥३९३॥

नीवारे तु वनव्रीहिः

नियतैर्व्रियते **नीवारः**, [2]व्युत्पन्नत्वात्, "नेर्वुः" [सिद्ध० ५.३.७४] इति घञ्, तत्र। वनस्य व्रीहिर्**वनव्रीहिः**। आह च—

नीवारश्चन्द्रिका बोडी मुनिव्रीहिर्मुनिप्रियः।
[ ] इति।

एतस्य लोके 'नीवार' इति प्रसिद्धिः।

श्यामाक-श्यामकौ समौ।

श्यायते **श्यामाकः**—जघन्यो व्रीहिः, "मवाक-श्यामाक-" [हैमोणादिसू० ३७] इत्याके निपात्यते। "कीचक-पेचक-" [हैमोणादिसू० ३३] इत्यके निपातनात् **श्यामकः**।

कङ्गौ तु कङ्गुनी कङ्गुः प्रियङ्गुः पीततण्डुला ॥३९४॥

इत आरभ्य सर्वे कङ्गुविशेषा ज्ञेयाः। कायति **कङ्गुः**, "प्री-कै-पै-नीलेरङ्गुक्" [हैमोणादिसू० ७६१] इति किदङ्गुः, तत्र। "कगे रगे लगे सङ्गे" कगति **कङ्गुनी**, "दिन-नग्न-" [हैमोणादिसू० २६८] इति ने निपात्यते। कुत्सितं अमति—गच्छति **कङ्गुः**, "फलि-वल्यमेर्गुः" [हैमोणादिसू० ७५८] इति गुः। "प्रींगृश् तृप्ति-कान्त्योः" प्रीणाति **प्रियङ्गुः**, "प्री-कै-पै-नीलेरङ्गुक्" [हैमोणादिसू० ७६१] इत्यङ्गुक्। पीतास्तण्डुला अस्याः **पीततण्डुला**। एते स्त्रीलिङ्गाः ॥३९४॥

---

१ 'कुल्मासस्तु यावकः' इति दन्त्यसकारमयः पाठोऽभिधानचिन्तामणौ। स्वोपज्ञवृत्तौ "कोलति कुल्मासः, 'कुलेश्च मासक्' [हैमोणादिसू० ५६३]। कुलेन मस्यति-परिणमते वा, पृषोदरादित्वात्। कुल्माषोऽपि।" इत्येवं व्याख्यातमस्ति। एतेनोपलक्षणेनैतद् ज्ञायते यद् आचार्यस्य 'माषक्'प्रत्ययवद् 'मासक्'प्रत्ययोऽप्यभिमतोऽस्तीति॥ २ "मुन्यन्नत्वात्" इत्यभिधानचिन्तामणिस्वोपज्ञटीकायाम्॥

सा कृष्णा मधुका

'सा' कङ्गुः कृष्णवर्णा मन्यते—कल्यते **मधुका**, "कञ्चुकांशुक-" [हैमोणादिसू० ५७] इत्युके निपातनात् साधुः ।

रक्ता शोधिका

रक्तवर्णा कङ्गुः शोधयति **शोधिका** । 5

मुसटी सिता ।

'सिता' श्वेता कङ्गुः मुस्यते—खण्ड्यते **मुसटी**, "कपट-" [हैमोणादिसू० १४४] इत्यटे निपात्यते ।

पीता माधवी

पीतवर्णा कङ्गुः मधुन इवेयं तद्वर्णत्वाद् **माधवी**, "तस्येदम्" [सिद्ध० ६.३.१६०] इत्यण् । 10

अथोद्दाले कोद्रवः कोरदूषकः ॥३९५॥

उद्दाल्यते **उद्दालः**, तत्र । केन—अम्भसा उनत्ति—क्लिद्यते **कोद्रवः**, "कैरव-भैरव-" [हैमोणादिसू० ५१९] इत्यवे निपात्यते; केन उद्दौति वा । "कुरत् शब्दे" कुरन्त्यनेन कोरदूषः, "कोरदूषा ऽऽटरूष-" [हैमोणादिसू० ५६१] इत्यूषे निपात्यते; कोरं— 15 भक्तं दूषयति वा, स्वार्थे के **कोरदूषकः** ॥३९५॥

चीनके तु काककङ्गुः

चीयते चीनः, "दिन-नग्न-" [हैमोणादिसू० २६८] इति ने निपात्यते, के **चीनकः**, तत्र । काकप्रिया कङ्गुः **काककङ्गुः** ।

आह च— 20

पीततण्डुलिका कङ्गुः प्रियङ्गुः कुक्करी मता ।
सितकङ्गुस्तु मुसली रक्तकङ्गुस्तु शोधिका ॥
चीनकः काककङ्गुः स्यात् श्यामाकस्तृणबीजकः ।
रालादयः कङ्गुभेदाः कोद्रवः कोरदूषकः ॥
अन्यो द्वितीयो विख्यात उद्दालो वनकोद्रवः । 25
[ ] इति ।

---

१ शोधिता न० ॥ २ मुशटी नि० ॥

यवनाले तु योनलः ।

जूर्णाह्वयो देवधान्यं जोन्नाला बीजपुष्पिका ॥३९६॥

यवस्येव नालमस्य **यवनालः**, तत्र । यूयते **योनलः**, "मुरलोरल-" [हैमोणादिसू० ४७४] इत्यले निपात्यते । "जूरैचि जरायाम्" जूर्यते जूर्णा, "डीय-श्व्यैदितः-" [सिद्ध० ४.४.६१] इति क्तेऽनिट्त्वम्, जूर्ण इत्याह्वयोऽस्य **जूर्णाह्वयः** । देवप्रियं धान्यं **देवधान्यम्** । जुनद् नालमस्या **जोन्नाला**, पृषोदरादित्वात् । बीजाकारं पुष्पमस्या **बीजपुष्पिका** । एतस्य लोके 'जुवारि' इति प्रसिद्धिः ॥३९६॥

शणे भङ्गा मातुलानी स्यात्

शणति **शणम्**, तत्र । भज्यते **भङ्गा** । मा तोल्यते **मातुलानी**, "मुमुचान-" [हैमोणादिसू० २७८] इत्याने निपात्यते; मायाः—श्रियस्तुलया अनितीति वा । आह च—

शणः प्रोक्तो मातुलानी जन्तुतन्तुर्महाशणः ।
[ ] इति ।

एतस्य लोके 'सण' इति प्रसिद्धिः ।

उमा तु क्षुमाऽतसी ।

अव्यते **उमा**, "अवेर्ह्रस्वश्च-" [हैमोणादिसू० ३४२] इति किति मे साधुः । क्षौत्यनया भुक्तया **क्षुमा**, "क्षु-हिभ्यां वा" [हैमोणादिसू० ३४१] इति किन्मः । अतत्यनया **अतसी**, "तप्यणि-" [हैमोणादिसू० ५६९] इत्यसः, न तस्यतीति वा । आह च—

अतसी मसृणा नीलपुष्पी चेलुरुमा क्षुमा ।
[ ] इति ।

एतस्या लोके 'अलसी' इति प्रसिद्धिः ।

गवेधुकायां गवेधुः

गूयते **गवेधुका**— [मुन्यन्नम्], "गुङ ईधुक-एधुकौ" [हैमोणादिसू० ७४] इत्यनेन एधुकः प्रत्ययः, तस्याम् । [गवा—अम्भसा एधते **गवेधुः**, स्त्रीलिङ्गः,]

१ जोर्णाला नि० ॥

"भृ-मृ-तृ-त्सरि-" [हैमोणादिसू० ७१६] इति बहुवचनादुः । **गवीधुकाऽपि** । आह च—

गवेधुका कर्षणी स्याद् गोजिह्वा कर्षिका मता ।
[ ] इति ।

एतस्या लोके 'गररी' इति प्रसिद्धिः ।

वन्यतिले तु जर्तिलः ॥३९७॥

वन्यः—वनजस्तिलो **वन्यतिलः**, तत्र । जीर्यते **जर्तिलः**, "स्थण्डिल-कर्पिल-" [हैमोणादिसू० ४८४] इतीले निपात्यते । अरण्यजस्तिलोऽयम् ॥३९७॥

षण्ढतिले तिलपिञ्जस्तिलपेजः

षण्ढः—निष्फलस्तिलः **षण्ढतिलः**, तत्र । निष्फलस्तिलः **तिलपिञ्जः** । **तिलपेजः**, "निष्फले तिलात् पिञ्ज-पेजौ" [सिद्ध० ७.२.१५४] इति तिलशब्दाद् निष्फले वर्तमानात् पिञ्ज पेज इत्येतौ प्रत्ययौ । "पिञ्ज-पेजशब्दौ निष्फलार्थाविति तिलविषयौ" इति **चान्द्राः** । आह च—

तिलपूतस्तिलफलस्तिलपिञ्जोऽपरः सितः ।
यस्तिलो वनजातः स्यात् [ ] इति ।

एतयोर्लोके 'श्यामतिल' 'श्वेततिल' इति प्रसिद्धिः ।

अथ सर्षपे ।

कदम्बकस्तन्तुभः

सरति **सर्षपः**, "सर्तेः षपः" [हैमोणादिसू० ३१३] इति षपः प्रत्ययः, तत्र । कुत्सितमम्बते—शब्दायते **कदम्बकः** । तोतुभ्यते **तन्तुभः**, पृषोदरादित्वात् साधुः । आह च—

सर्षपः कटुकः स्नेहो भूतघ्नो राजिकाफलः ।
तन्तुभोऽन्यः समुद्दिष्टः सिद्धार्थः श्वेतसर्षपः ॥
[ ] इति ।

एतस्य लोके 'सरसव' इति प्रसिद्धिः ।

अथ सिद्धार्थः श्वेतसर्षपः ॥३९८॥

सिद्धप्रयोजनो रक्षोघ्नत्वात् **सिद्धार्थः** । श्वेतश्चासौ सर्षपश्च **श्वेतसर्षपः** ॥३९८॥

राजिकायां तीक्ष्णगन्धा क्षुताभिजननः क्षवः ।
असुरी कृष्णिका कृष्णसर्षपो राजसर्षपः ॥३९९॥

राजते **राजिका**, णके आप्, तस्याम् । तीक्ष्णो गन्धोऽस्याः **तीक्ष्णगन्धा** । क्षुतमभिजनयति **क्षुताभिजननः** । क्षौत्यनेन **क्षवः** । अस्यते–क्षिप्यते शाकादिना [? शाकादौ] **असुरी**, "वाश्यसि-" [हैमोणादिसू० ४२३] इत्युरः, असुरस्त्रीव वा । कृष्णैव **कृष्णिका**; वर्णेन कर्षति कृष्णा, "घृ-वी-ह्वा-" [हैमोणादिसू० १८३] इति किण्णः, स्वार्थिके के **कृष्णिका** इति वा । कृष्णश्चासौ सर्षपश्च **कृष्णसर्षपः** । सर्षपाणां राजा **राजसर्षपः**, राजदन्तादित्वात् पूर्वनिपातः । आह च—

राजक्षवक इत्यन्यो राजिका कृष्णसर्षपः ।
क्षुताभिजननश्चैव स चोक्तो राजसर्षपः ॥

[धन्व० वर्ग ४ श्लो० ४३] इति ।

एतस्या लोके 'राई' इति प्रसिद्धिः । "असुरी भिन्ना" इति [? **अन्ये**] मन्यन्ते । यदाह—

असुरी राजिका राजी कृष्णिका रक्तसर्षपः ।
तीक्ष्णगन्धा चातितीक्ष्णा क्षुरकः क्षुवकः क्षवः ॥

[धन्व० वर्ग ४ श्लो० ६०] इति ।

एतस्याश्च लोके 'असुरी' इति प्रसिद्धिः ॥३९९॥

माषादयः शमीधान्यं

माष आदिर्येषां मुद्गादीनां ते माषादयः । शमी–शिम्बा तत्प्रधानं धान्यं **शमीधान्यम्** ।

शूकधान्यं यवादयः ।

---

१ माषादि तु शमी° नि० ॥

शूकप्रधानं धान्यं **शूकधान्यम्**। यव आदिर्येषां गोधूमादीनां ते **यवादयः**।

स्यात् सस्यशूके किंशारुः

शवति शूकम्, पुं-क्लीबलिङ्गः, "घु-यु-हि-" [हैमोणादिसू० २४] इति कः प्रत्ययो दीर्घत्वं च, सस्यस्य शूकं **सस्यशूकम्**, तत्र। कुत्सितं शृणाति **किंशारुः**, पुंल्लिङ्गः, "किमः श्रो णित्" [हैमोणादिसू० ७२५] इत्युः। एतस्य लोके 'ऊंबी' इति प्रसिद्धिः।

कणिशो सस्यशीर्षकम् ॥४००॥

"कण शब्दे" कणति वातेन **कणिशम्**, पुं-क्लीबलिङ्गः, "कुलि-कनि-कणि-" [हैमोणादिसू० ५३५] इति किद् इशः, तत्र। **कनेशमपि**[1]। सस्यमयं शीर्षमिव **सस्यशीर्षकम्**, सस्यमञ्जरीत्यर्थः। लोके 'कणसडा' इति, 'प्रधान सिरा' इत्यर्थः ॥४००॥

स्तम्बे तु गुच्छो धान्यादेः

स्तभ्नाति **स्तम्बः**, "तुम्ब-स्तम्ब-" [हैमोणादिसू० ३२०] इति बान्तो निपात्यते, तत्र। धान्यादेर्यः स्तम्बः स नालं गुध्यति अनेन **गुच्छः**, "गुलुञ्छ-पिलिपिञ्चैधिच्छादयः" [हैमोणादिसू० १२६] इति छप्रत्यये निपात्यते। **उच्यते** इति शेषः।

एतस्य लोके 'गुंछउ' इति प्रसिद्धिः।

नाले काण्डः

"णल गन्धे" नलति **नालम्**, अर्थाद् गुच्छस्य, त्रिलिङ्गः, ज्वलादित्वाद् णः, तत्र। कणति—भज्यमानः शब्दायते **काण्डः**, पुं-क्लीबलिङ्गः, "कण्यणि-" [हैमोणादिसू० १६९] इति णिद् डः। एतस्य लोके 'नाल' इति प्रसिद्धिः, 'धानना कणसडा' इत्यर्थः।

अफले त्विह।

स्यात् पलालः

['अफले' फलरहिते 'तु' पुनः 'इह' नाले] "पल गतौ" पल्यते **पलालः**, "ऋ-कृ-मृ-" [हैमोणादिसू० ४७५] इत्यालः, पुं-क्लीबलिङ्गः। **पलोऽपि**। एतस्य लोके 'पराल' इति प्रसिद्धिः।

धान्यत्वचि तुषः

---

१ अभिधानचिन्तामणिस्वोपज्ञवृत्तौ 'कनिशमपि' इति पाठः ॥

धान्यस्य त्वग् **धान्यत्वक्**, तत्र । तुष्यति अनेन अग्निः **तुषः**, स्थादित्वात् कः । एतस्य लोके 'तुस' इति प्रसिद्धिः ।

बुसे कडङ्गरः ॥४०१॥

॥ इत्याचार्यश्रीहेमचन्द्रविरचिते निघण्टुशेषे
षष्ठो धान्यकाण्डः ॥६॥


॥ इति श्रीहेमचन्द्राचार्यविरचितो निघण्टुशेषः समाप्तः ॥

बुस्यते—उत्सृज्यते **बुसः**, स्थादित्वात् कः, पुं-क्लीबलिङ्गः, तत्र । कडन्ति—माद्यन्त्यनेन पशवः **कडङ्गरः**, "कडेरेवरा-" [हैमोणादिसू० ४४५] इत्यङ्गरः । एतस्य लोके 'भुस' 'ढूंढा' वा इति प्रसिद्धिः ॥४०१॥

॥ इति श्रीमद्बृहत्खरतरगच्छे श्रीजिनराजसूरिशिष्यश्रीजयसागरमहोपाध्यायपट्टानुक्रमायातवाचनाचार्यधुर्यश्रीभानुमेरुगणिशिष्यसमस्तप्रशस्तग्रन्थावलीविचक्षणश्रीज्ञानविमलोपाध्यायशिष्यवाचनाचार्यश्रीश्रीवल्लभगणिविरचितायां श्रीहेमचन्द्राचार्यकृतनिघण्टुशेषटीकायां धान्यकाण्डः षष्ठः समाप्तः ॥ ६ ॥

तत्समाप्तौ च समाप्तेयं
निघण्टुशेषटीका ॥

॥ ग्रन्थाग्रम्- ३५०० ॥



१

प्रथमं परिशिष्टम् ।



हेमचन्द्रीयनिघण्टुशेषमूलग्रन्थस्य पाठभेदाः ।

सङ्केताः

पु १— सटीकस्य निघण्टुशेषस्य ७६ पत्रात्मिका मुनिश्रीपुण्यविजयस्य सम्पूर्णा प्रतिः ।

पु २— सटीकस्य निघण्टुशेषस्य ३२ पत्रात्मिका मुनिश्रीपुण्यविजयस्य अपूर्णा प्रतिः ।

पु०— निघण्टुशेषमूलमात्रस्य टिप्पणीयुता चतुष्पत्रात्मिका मुनिश्रीपुण्यविजयस्य प्रतिः ।

सं०— अणहिल्लपुरपत्तनसङ्घवीपाटकान्तर्गततालपत्रीयज्ञानभण्डारसत्का निघण्टुशेषमूलमात्रस्य पत्र ४तः १४ पत्रपर्यन्ता त्रुटिताऽपूर्णा ताडपत्रीया प्रतिः ।

नि०— निर्णयसागरमुद्रणालयाधिपतिमुद्रिताभिधानसङ्ग्रहद्वितीयभागान्तर्मुद्रितो हेमचन्द्रीयो निघण्टुशेषः ।

पुपा०— पु० आदर्शे मार्जनोल्लिखितं पाठान्तरम् ।

टी०— टीकाकृता टीकायां निर्दिष्टः पाठभेदः ।

(पू०)— श्लोकस्य पूर्वार्द्धम् । **(उ०)**— श्लोकस्योत्तरार्द्धम् ।

*

श्लोक ४(उ०) **पिण्डपुष्पो** स्थाने **पिण्डीपुष्पो** पु० ॥ ५(पू०) **-दोहदः** स्थाने **-दोहृदः** पु० ॥ १० (पू०) **कुसुमारोग्यः** स्थाने **कुसुमारेऽस्य** पु० ॥ ११ (पू०) **दर्वीसहो** स्थाने **दार्वीसहो** पु० ॥ १३(पू०) **कादम्बर्यः** स्थाने **कदम्बर्यः** पु० ॥ १८(उ०) **कपीतनः** स्थाने **कपीतकः** पुपा० ॥ १९ पू०) **स्थाल्यमोघा** स्थाने **स्थालीमोघा** पु० । **मोघा**शब्दो अमरकोश-व्याख्यासुधायामादृतोऽस्ति ॥ २०(पू०) **श्वेतपाटला** स्थाने **श्वेता पाटला** पु० नि० ॥ २१ (पू०) **वंशिका** स्थाने **वंशिकं** नि० । (उ०) **जौङ्गकमनार्यजम्** स्थाने **जोगकमनार्यजम्** पु० **योगजमनार्यकम्** नि० ॥ २५(पू०) **पत्राङ्गं पतङ्गं** स्थाने **पत्तङ्गं पत्राङ्गं** पु० **पत्राङ्गं पत्तङ्गं** नि० ॥ २६(उ०) **सुगन्धिकः** स्थाने **सुगन्धकः** नि० ॥ २८(उ०) **अगस्त्ये तु बहु-सेनः** स्थाने **अथागस्त्ये बङ्गसेनः** नि० । अत्र **बहुसेनः**शब्दोपरि **तापस** इति टिप्पणी पु० । **शुकनाशो** स्थाने **शुकनासो** नि० ॥ २९(उ०) **-ऽश्वरोहः** स्थाने **अश्वरोधः** नि० ॥ ३०(उ०) **तमाले तु कालस्कन्धस्तापि-** स्थाने **कालस्कन्धस्तमाले स्यात् तापि-** नि० ॥ ३१(पू०) **वस्वाख्यं** स्थाने **वस्त्राख्यं** पु०नि० । **रोमसं** स्थाने **रोमशं** पु०नि० । (उ०) **द्राविणी** स्थाने **द्राविडी** नि० ॥ ३२(उ०) **पत्रैला** स्थाने **भद्रैला** नि० ॥ ३३(उ०) **कर्पूरे स्याद् घनसारो** स्थाने **कर्पूरे घनसारः स्याद्** नि० । **हिमवा-लुका** स्थाने **हिमवालुकः** पु०नि० ॥ ३४(उ०) **कक्कोलके** स्थाने **कङ्कोलके** नि० ।

पत्र. ७५	वर्ग ३ श्लो०१४३ पत्र. १२३
निम्बो नियमनो नेता पिचुमन्दः सुतिक्तकः।	निम्बो नियमनो नेता पिचुमन्दः सुतिक्तकः।
अरिष्टः सर्वतोभद्रः **सुभद्रः** पारिभद्रकः॥	अरिष्टः सर्वतोभद्रः **प्रभद्रः** पारिभद्रकः॥
पत्र. ७६	वर्ग १ श्लो०२९ पत्र. १३
महानिम्बः स्मृतोद्रेकः कामुको विषमुष्टिकः।	महानिम्बः स्मृतोद्रेकी कार्मुको विषमुष्टिकः।
केशमुष्टिर्निम्बरको रम्यकः क्षीर एव च॥	केशमुष्टिर्निम्बरको रम्यकोऽक्षीर एव च॥
पत्र. ७७	वर्ग १ श्लो०३१ पत्र. १३

---

१. **सखा**। क. ख. ङ. ॥ २. **महोत्सवः** क. ख. घ. ङ; **मदोत्सवः** ग. ॥

३. शुद्राम्र उक्तः कोशाम्रो लाक्षावृक्षः सरक्तकः। जन्तुवृक्षो घनस्कन्धः कृमिवृक्षः सुकोशकः। ख. ङ। क्षुद्रोऽन्य उक्तः कोशाम्रो लाक्षावृक्षः सुरक्तकः छ.॥ ४. **गालवः** क. ग. ङ. च॥ ५. **विषमुष्टिकः** क. ख.॥ ६. **वञ्जुलो** क. ङ॥ ७. **स्मृतो रुक्षो द°** क. ग.॥ ८. **°म्बवरो र°** ग. ॥

निघण्टुशेषटीका

पीलुः **शीतफलः स्रंसी धारी** गुडफलोऽपि च ।
विरेचनफलः शाखी श्यामः करभवल्लभः ॥
पत्र. ७७

अक्षोटः पार्वतीयश्च फलस्नेहो गुहाश्रयः ।
कीरेष्टः **कन्दरालश्च** स्वादुमज्जो **मृदुच्छदः** ॥
पत्र. ७८

करञ्जो नक्तमालश्च पूतिकश्चिरिबिल्वकः ।
घृतपर्णः **करञ्जोऽन्यः** प्रकीर्यो गौर एव च ॥
पत्र. ८०

उदकीर्यस्तृतीयोऽन्यः षड्ग्रन्थो हस्ति**चारण**ी ।
अङ्गारवल्ली **शार्ङ्गस्था** काकघ्नी **करतालिका**
पत्र. ८१

कट्फलः सोमवल्कश्च श्रीपर्णी कुमुदा तथा ।
महाकषायोग्रगन्धिः क्षिप्रगर्भः प्रचेतनः ।
महाकु**म्भी** च कुम्भीका भद्रा भद्रवतीति च ।
पत्र. ८२

दाडिमो **दालिमः** सारः कुट्टिमः फल**षाण्ड**वः ।
स्वाद्वम्लो रक्तबीजश्च करकः शुकवल्लभः ॥
पत्र. ८२

धातकी ताम्रपुष्पी च कुञ्जरा **मद्यपाचनी** ।
पार्वतीया सुभिक्षा च वह्निपुष्पी च शब्दिता ।
पत्र. ८३

सल्लकी वल्लकी **ह्लादा** सुरभिः सुखवा **रसा** ।
अश्वमूत्री कुन्दुरुकी गजभक्षा महेरणा ॥
पत्र. ८४

एरण्डस्तरुणः शुक्लश्चित्रो गन्धर्वहस्तकः ।
पञ्चाङ्गुलो वर्धमान आरण्डो दीर्घदण्डकः ॥
रक्तोऽपरो हस्तिकर्णः **कर्णो** व्याघ्रतलो रुचुः ।
उरुवूको हस्तिपर्णश्चञ्चुरुत्तानपत्रकः ॥
पत्र. ८५

धनवन्तरीयनिघण्टु

पीलुः **शीतः सहस्रांशी धानी** गुडफलोऽपि च ।
विरेचनफलः शाखी श्यामः करभवल्लभः ॥
वर्ग ५ श्लो०५१ पत्र. १७८

आक्षोडः पार्वतीयश्च फलस्नेहो गुडाश्रयः ।
कीरेष्टः **कर्पर**ालश्च स्वादुमज्जा **पृथुच्छदः** ॥
वर्ग ५ श्लो०६० पत्र. १८०

करञ्जो नक्तमालश्च पूतिकश्चिरिबिल्वकः ।
घृतपर्णः **करञ्जो**ऽन्यः प्रकीर्यो गौर एव च ॥
वर्ग ५ श्लो०१०७ पत्र. १९१

उदकीर्यस्तृतीयोऽन्यः षड्ग्रन्थो हस्ति**चारि**णी ।
मदहस्तिनिका रोही हस्तिरोहणकः प्रियः ॥
अङ्गार[1]**वल्लिकाऽम्बष्ठा** काकघ्नी [2]**काकभाण्डिका**
वायव्या कालिमका मेदा वाक्यवल्लयपि चोच्यते ॥
वर्ग ५ श्लो० १०९–११० पत्र. १९१

कट्फलः सोमवल्कश्च श्रीपर्णी कुमुदा तथा ।
महाकु**म्भा** च कुम्भीका भद्रा भद्रवतीति च ॥
वर्ग १ श्लो०७३ पत्र. २१

दाडिमो **दाडिमी** सारः कुट्टिमः [3]**फल शाड**वः ।
स्वाद्वम्लो रक्तबीजश्च करकः शुकवल्लभः ॥
वर्ग २ श्लो०६१ पत्र. ८१

धातकी ताम्रपुष्पी च कुञ्जरा [4]**मद्यवासिनी** ।
पार्वतीया सुभिक्षा च वह्निपुष्पा च शब्दिता ॥
वर्ग ३ श्लो०९० पत्र. ११३

सल्लकी वल्लकी **ह्लादा** सुरभिः सुखवा **च सा** ।
[5]**अश्वमूत्री** कुन्दुरुकी गजभक्षा महेरणा ।
वर्ग ३ श्लो०१३५ पत्र. १२२

एरण्डस्तरुणः शुक्लश्चित्रो गन्धर्वहस्तकः ।
पञ्चाङ्गुलो वर्धमान आ**मण्डो** दीर्घदण्डकः ॥
रक्तोऽपरो [6]**हस्तिकर्णो व्याघ्रो** व्याघ्रदलो रुबुः ।
रुबुको हस्तिकर्णी च चञ्चुरुत्तानपत्रकः ॥
वर्ग १ श्लो० २९५–९६ पत्र. ६७

---

१. °**वल्ली शाम्बष्ठा** क. ङ. । °**वल्ली शार्ङ्गेष्ठा** ग. । २ **करभाण्डिका** क. ख. ङ. ॥ ३. **फलकाण्डवः** क. ङ.; **फलखाण्डवः** ग. ॥ ४. **मधुवा**° क. ङ. ॥ ५. **अश्वपुत्री** ख. ॥ ६. **हस्तपर्णो** क. ङ. ॥

काम्पिल्यकोऽथ रक्ताङ्गो रेची रेचनकस्तथा।
रञ्जनो लोहिताङ्गश्च **कर्कशो** रक्तचूर्णकः॥
पत्र. ८५

कतक**कश्छेदनीयश्च कतः** कतफलं मतम्।
अम्बुप्रसादनफलं श्लक्ष्णं नेत्रविकार**हृत्**॥
पत्र. ८६

वन्दाका स्याद् वृक्षरुहा शेखरी **कामवृक्षकः**।
वृक्षादनी तरुरुहा कामि**न्यङ्घ्रिप्ररोहणी**।
पत्र. ८७

वासिका सिंह**कर्णी** च वृषो वासा **च** सिंहिका।
आटरूषः सिंहमुखी भिषग्माताऽऽटरूषकः॥
पत्र. ८८

तुम्बु**रुः सारसः** सौरो वनजः सानुजोऽ**ग्निकः**।
तीक्ष्णवल्कस्तीक्ष्णफलस्तीक्ष्णपत्रो महामुनिः॥
पत्र. ८९

कदली सुकुमारा च रम्भा **भानु**फला मता।
काष्ठीरसश्च निस्सारा मोचा हस्ति**बुसा तथा**॥ पत्र. ८९

तगरं कुटिलं वक्रं दीनं जिह्मं नतं **शिवम्**।
कालानुसार्यमनृजु कुञ्चितं नहुषं नृपम्॥
पत्र. ९०

तूलं **नूदं** च यूपं च क्रमुकं ब्रह्मकाष्ठकम्।
ब्रह्मदारु **ब्रह्मनिष्ठं** ब्रह्मण्यं ब्रह्मचारि **च**॥
पत्र. ९०

मुष्कको मोक्षको **घण्टा** मूषको मुञ्चकस्तथा।
क्षारश्रेष्ठो **गोलिह**श्च द्विविधः श्वेत-कृष्णकः॥
पत्र. ९१

वंशो वेणुर्यवफलः **कर्मार**स्तृणकेतुकः।
त्वक्सारः शतपर्वा च मस्करः कीचकस्तथा॥
पत्र. ९१

गाङ्गेरुकी नागबला खरगन्धनिका **रसा**।
विश्वदेवा तथाऽरिष्टा **खञ्जा** हस्वगवेधुका॥
पत्र. ९२

कम्पिल्लकोऽथ रक्ताङ्गो रेची रेचनकस्तथा।
रञ्जनो लोहिताङ्गश्च **कम्पिल्लो रक्तचूर्णकः**॥
वर्ग ३ श्लो० १३८ पत्र. १२२

कतकं **छेदनीयश्च कतं** कतफलं मतम्।
अम्बुप्रसादनफलं श्लक्ष्णं नेत्रविकार**जित्**॥
वर्ग ३ श्लो० १७२ पत्र. १२९

वन्दका स्याद् वृक्षरुहा शेखरी **कामरूपका**।
वृक्षादनी तरुरुहा कामि**नी पद्मरूपिणी**॥
वर्ग ४ श्लो० ९७ पत्र. १५३

वासकः सिंह**पर्णी** च वृषो [1]वासाऽथ सिंहिका।
आटरूषः सिंहमुखी भिषग्माताऽऽटरूषकः॥
वर्ग १ श्लो० २३ पत्र. ११

तुम्बरुः **सौरभः** सौरो वनजः सानुजो **द्विजः**।
तीक्ष्णवल्कस्तीक्ष्णफलस्तीक्ष्णपत्रो महामुनिः॥
वर्ग २ श्लो० ४२ पत्र ७८

कदली सुकुमारा च रम्भा [2]**स्वादु**फला मता।
दीर्घपत्रा च निःसारा मोचा हस्ति**विषाणिका**॥
वर्ग ४ श्लो० ७५ पत्र. १४८

तगरं कुटिलं वक्रं दीनं जिह्मं नतं **शठम्**।
कालानुसार्यमनृजु कुञ्चितं **नहुषं** नृपम्॥
वर्ग ३ श्लो० ५३ पत्र. १०६

तूलं **तूदं** च यूपं च क्रमुकं ब्रह्मकाष्ठकम्।
ब्रह्मदारु **ब्राह्मणेष्ठं** ब्रह्मण्यं ब्रह्मचारि**णम्**॥
वर्ग ५ श्लो० ६४ पत्र. १८१

मुष्कको मोक्षको **मुष्टिमू**षको मुञ्चकस्तथा।
क्षारश्रेष्ठो **गोलक**श्च द्विविधः श्वेत-कृष्णकः॥
वर्ग ५ श्लो० १३२ पत्र. १९६

वंशो वेणुर्यवफलः **कार्मुक**स्तृणकेतुकः।
त्वक्सारः शतपर्वा च **मस्करः कीचकस्तथा**॥
वर्ग ४ श्लो० १३७ पत्र. १६१

गाङ्गेरुकी नागबला खरगन्धिनिका **झषा**।
विश्वदेवा तथाऽरिष्टा **खण्डा** हस्वगवेधुका॥
वर्ग १ श्लो० २८४ पत्र. ६५

---

१. वासा च सिं° ङ. च. छ. ॥ २. भानुफला क. ख. ग. ङ. ॥

हरिद्रा पीतिका **पिण्डा** रजनी **रञ्जनी** निशा ।
गौरी वर्णवती पीता हरिता वरवर्णिनी ॥
... ...
अन्या दारुहरिद्राऽपि **हरिद्रः** पीतचन्दनम् ॥
निर्दिष्टा **वै कण्टकिनी स** च कालेयकः स्मृतः ।
कालीयको दारुनिशा **दार्वी-पीतद्रु-पीतिकाः** ॥
कटङ्कटेरी पर्जन्या पीतदारुः पचम्पचा ।
पत्र. ९२
स्थौणेयकं **वह्निचूडं** शुक**गुच्छं** शुकच्छदम् ।
वि**कीर्ण** शुकबर्हं च हरितं शीर्णरोमकम् ॥
पत्र. ९३
स्पृक्का **स्पृग्** ब्राह्मणी देवी **लता लङ्को-यिका मरुत् ।**
पङ्क्तमुष्टिर्देवपुत्रो निर्मात्या पिशुना वधूः ॥
पत्र. ९४
विडङ्गा जन्तुहन्त्री च कृमिघ्नी चित्रतण्डुला ।
तण्डुलः कृमिहाऽमोघा **केरला** मृगगामिनी ॥
पत्र. ९५
ऋषभो **धूर्वहो** धीरो मातृको वृषभो वृषः ।
विषाणी ककुद्रीन्द्राक्षो बन्धुरो गोपतिः **स्मृतः** ॥
पत्र. ९६
ऋद्धिर्वृद्धिः सुखं सिद्धी रथाङ्गं मङ्गलं वसु ।
ऋषिसृष्टा युगं योग्यं लक्ष्मीः सर्वजनप्रिया ॥
पत्र. ९६
कङ्कुष्ठं **काककुष्ठं तु** विडङ्गं रङ्गदायकम् ।
रेचकं पुलकं हासं शोधनं **काक**पालकम् ॥
पत्र. ९७
परूषकः **परुः प्रोक्तो** नीलपर्णः परापरः ।
परिमण्डलमध्यास्थि परुषं चापि नामतः ॥
पत्र. ९८

हरिद्रा पीतिका **पिङ्गा** रजनी **रञ्जिनी** निशा ।
गौरी वर्णवती पीता [1]हरिता वरवर्णिनी ॥
... ...
अन्या दारुहरिद्रा [2]**च पीतद्रः** पीतचन्दनम् ॥
निर्दिष्टा **काष्ठरजनी सा** च कालेयकं[3] स्मृतम् ।
कालायकं दारुनिशा **दर्वी पीताह्वपी**[4]**तकम्**
कटङ्कटेरी पर्जन्या पीतदारु पचम्पचा ।
हेमवर्णवती पीता हेमकान्ता [5]कुसुम्भका ।
वर्ग १ श्लो० ५४, ५७-५९ पत्र. १७ १८
स्थौणेयकं **बर्हिचूडं** शुक**पुच्छं** शुकच्छदम् ।
वि**कर्ण** शुकबर्हं च हरितं शीर्णरोमकम् ॥
वर्ग ३ श्लो० ६९ पत्र ११०
स्पृक्काऽसृग् ब्राह्मणी देवी **मालाली कोटिका मता ।**
पञ्चमुष्टिर्देवपुत्री निर्मात्या पिशुना वधूः ॥
वर्ग ३ श्लो० ६२ पत्र. १०८
विडङ्गं **जन्तुहन्त्री** च कृमिघ्नी चित्रतण्डुला ।
तण्डुली कृमिहाऽमोघा **कैरला** मृगगामिनी ॥
वर्ग २ श्लो० ११ पत्र. ७१
ऋषभो **दुर्धरो** [6]धीरो मातृको वृषभो वृषः ।
[7]विषाणी **ककुदिन्द्राक्षो** बन्धुरो **गोपतिस्तथा** ।
वर्ग १ श्लो०१२५ पत्र. ३०
ऋद्धिर्वृद्धिः सुखं सिद्धी रथाङ्गं मङ्गलं वसु ।
[8]ऋषिसृष्टा युगं योग्यं लक्ष्मीः सर्वजनप्रिया ॥
वर्ग १ श्लो०१४५ पत्र. ३४
कङ्कुष्ठं कालकुष्ठं **च** विरङ्गं [9]**रङ्गनायकम्** ।
रेचकं पुलकं हासं शोधनं **काल**पालकम् ॥
वर्ग ३ श्लो०१४१ पत्र १२३
परूषकं **परु प्रोक्तं** [10]नीलवर्णं [11]**परावरम्** ।
परिमण्डलमध्यास्थि [12]परुषं चापि नामतः ॥
वर्ग ५ श्लो०६२ पत्र १८०

---

१. **हरिद्रा वर°** क. ख. ग. घ. ङ ॥ २. **च हरिद्रा पीत°** झ. ॥ ३. **°यका स्मृता** । क. च; **°यकः स्मृतः** । ग. घ ॥ ४. **°पीतका** । क. घ. ङ. च ॥ ५. **कुसुम्भला** । घ. ङ. च. ॥ ६. **धीरः श्रीमानृषभको वृषः** क. घ. ङ. च. ॥ ७. **वृषाणी** क. ख. ॥ ८. **ऋषिश्रेष्ठा** क. ङ. च. ॥ ९. **रङ्गदाय°** क. ख. ॥ १०. **नीलपर्ण** छ. ण. ॥ ११. **परापरम्** । ङ. छ. झ. ण. ॥ १२. **°मल्पास्थि**

निघण्टुशेषटीका

खर्जूरी तु खरस्कन्धा कषाया मधुराऽग्रजा।
दुष्प्रधर्षा दुरारोहा निःश्रेणिः स्वादुमस्तका ॥
पत्र. ९८

तालो ध्वजद्रुमः प्रांशुर्दीर्घस्कन्धो दुरारुहः।
तृणराजो दीर्घतरुर्लेख्यपत्रो द्रुमेश्वरः ॥
पत्र. ९९

नालिकेरो रसफलः **सतुङ्गः** कूर्चकेसरः।
लतावृक्षो दृढफलो लाङ्गली दाक्षिणात्यकः ॥
पत्र. १००

स्यात् पूगफलमुद्वेगं स्रंसि घोण्टाफलं **मतम्**।
चिक्कणं **वल्कलं चिक्कं गवां मदकरं** च तत् ॥
पत्र. १०१

सिन्दुवारः श्वेतपुष्पः सिन्दुकः सिन्दुवा**रिका**।
नीलपुष्पः शीतसहो निर्गुण्डी **नीलसिन्दुकः** ॥
पत्र. १०३

शेफालिकाऽन्या निर्गुण्डी **वनौका** नीलमञ्जरी।
शुक्लाऽन्या श्वेतसुरसा भूत**वेशी** च कथ्यते ॥
पत्र. १०४

प्रियङ्गुः प्रियवल्ली च फलिनी कङ्गुनी प्रिया।
वृत्ता गोवन्दनी श्यामा कारम्भा वर्ण**मेदिनी** ॥
पत्र. १०५

मधुयष्टी च यष्टी च यष्टीमधु मधुस्रवा।
यष्टी**मधूकं मधुकं** यष्ट्याह्वं मधुयष्टिका ॥
तल्लक्षणं क्लीत**नं च** क्लीतकं क्लीत**का** च सा।
स्थलजा जलजाऽन्या **च** मधुपर्णी मधूलिका ॥
पत्र. १०६

अश्वगन्धा वाजिगन्धा **कुम्भको**ऽश्वावरोहकः।
वराहकर्णी तुरगी बल्या वा**जी**करी मता ॥
पत्र. १०६

अजशृङ्गी मेषशृङ्गी सर्पदंष्ट्रा च वर्त्तिका।
द्वितीया दक्षिणावर्ता वृश्चिकाली विषाणिका ॥
पत्र. १०७

धन्वन्तरीयनिघण्टु

खर्जूरी तु खरस्कन्धा कषाया मधुराग्रजा[1]।
दुष्प्रधर्षा दुरारोहा निःश्रेणी स्वादुमस्तका ॥
वर्ग ५ श्लो०५३ पत्र १७८

तालो ध्वजद्रुमः प्रांशुर्दीर्घस्कन्धो दुरारुहः।
तृणराजो दीर्घतरुर्लेख्यपत्रो द्रुमेश्वरः ॥
वर्ग ५ श्लो०६८ पत्र १८२

नारिकेलो रसफलः [2]**सुतुङ्गः** कूर्च**शेखरः**।
तालवृक्षो दृढफलो लाङ्गली दाक्षिणात्यकः ॥
वर्ग ५ श्लो०७४ पत्र. १८३

स्यात् पूगफलमुद्वेगं स्रंसि [3]घोण्टाफलं **स्मृतम्**।
चिक्कणं **चिक्कणा चिक्का गुर्वाकः खपुरं** च तत् ॥
वर्ग ३ श्लो०३९ पत्र. १०३

सिन्दुवारः श्वेतपुष्पः [4]सिन्दुकः **सिन्दुवारकः**।
नीलपुष्पः शीतसहो निर्गुण्डी [5]**नीलसिन्दुका** ॥
वर्ग ४ श्लो०८१ पत्र. १५०

शेफालिकाऽन्या निर्गुण्डी **वनजा** नीलमञ्जरी।
शुक्लाऽन्या श्वेतसुरसा भूत**केशी** च कथ्यते ॥
वर्ग ४ श्लो० ८३ पत्र. १५०

प्रियङ्गुः प्रियवल्ली च फलिनी कङ्गुनी प्रिया।
वृत्ता गोवन्दनी श्यामा कारम्भा वर्ण**मेदिनी** [6] ॥
वर्ग ३ लो०१६ पत्र. ९७

मधुयष्टी च यष्टी च यष्टीमधु मधुस्रवा।
यष्टी**कं मधुकं चैव** यष्ट्याह्वं मधुयष्टिका ॥
तल्लक्षणं क्लीत**नकं** क्लीतनं क्ली**तिका** च सा।
स्थलजा जलजाऽन्या **तु** मधुपर्णी मधूलिका ॥
वर्ग १ लो०१४२,१४४ पत्र. ३३,३४

अश्वगन्धा वाजिगन्धा **कञ्चुकाऽश्वावरोहकः**।
वाराहकर्णी तुरगी बल्या वा**जिकरी** स्मृता ॥
वर्ग १ लो०२७२ पत्र. ६२

अजशृङ्गी मेषशृङ्गी सर्पदंष्ट्रा च वर्तिका।
द्वितीया दक्षिणावर्ता वृश्चिकाली विषाणिका ॥
वर्ग १ श्लो०८७ पत्र. २३

---

१ °रा रसा। दु° क. ङ.॥ २. **सुगन्धः** क. ङ.॥ ३. **इयावफलं** ख. ग. झ.॥ ४. **सिन्धुकः सिन्धुवा°** क. ग.॥ ५. **सीतसिन्धुका** ङ.॥ ६. °**भेदनी** क. ख. ग. ङ.॥

निघण्टुशेषटीका	धन्वन्तरीयनिघण्टु
शृङ्गी कर्कटशृङ्गी च कुलीरा कर्कटाह्वया ।	शृङ्गी कर्कटशृङ्गी च कुलीरा कर्कटाह्वया ।
कुलिङ्गशृङ्गी वक्रा च महाघोषा **नताङ्ग्यपि** ॥	**कुलीरशृङ्गी चक्रा** च महाघोषा **नवाङ्गिनी** ॥
चन्द्रा **स्वादु** विषाणी च **प्रोक्ता च निजमूर्द्धजा** ॥	चन्द्रा**स्पदा** विषाणी च **शृङ्गी वनज**मूर्धजा ।
पत्र. १०८	वर्ग १ श्लो०८५,८६ पत्र. २२
कण्टकारी **च** दुःस्पर्शा क्षुद्रा व्याघ्री **निर्दिग्धिका** ।	कण्टकारी **तु** दुःस्पर्शा क्षुद्रा व्याघ्री **निदिग्धिका** ।
कण्टालिका कण्टकिनी धावनी दुष्प्रधर्षणी ॥	कण्टालिका कण्टकिनी धावनी दुष्प्रधर्षिणी ॥
पत्र. १०८	वर्ग १ श्लो०९५ पत्र. २५
बृहती **सिंहयनाक्रान्ता** वार्ताकी राष्ट्रिका कुली ।	बृहती **सिंहिकाक्रान्ता** वार्ताकी राष्ट्रिका कुली
विशदा स्थूल**भण्टा**की महती तु महोटिका ॥	विषदा [2]स्थूल**कण्टा**की महती तु महोटिका ॥
पत्र. १०९	वर्ग १ श्लो०९३ पत्र. २४
विदारिका मता शुक्ला स्वादुकन्दा **शृ**गालिका ।	विदारिका मता शुक्ला स्वादुकन्दा **शृ**गालिका ।
वृक्षकन्दा विदारी च **वृक्ष**वल्ली विडालिका ॥	[4]**वृष्य**कन्दा विदारी च [5]**वृष्य**वल्ली विडालिका ॥
पत्र. ११०	वर्ग १ श्लो०१४७ पत्र. ३४
अन्या क्षीरविदारी स्या**द् ऋक्ष**गन्धेक्षुवल्ल्यपि ।	अन्या क्षीरविदारी स्या**दिक्षु**गन्धेक्षुवल्ल्यपि ।
क्षीर**कन्दा** क्षीर**युक्ता** क्षीर**वल्ली** पयस्विनी ॥	**क्षीरवल्ली क्षीरकन्दा** क्षीर**शुक्ला** पयस्विनी ॥
पत्र. ११०	वर्ग १ श्लो० १४९ पत्र. ३५
पृष्णि (?श्नि) पर्णी पृथक्पर्णी कल**शिर्धा**वनी गुहा ।	**पृष्टि**पर्णी पृथक्पर्णी कल**शी धा**वनी गुहा ।
शृगालविन्ना **धृतिला** पर्णी क्रोष्टुकपुच्छिका ॥	शृगालविन्ना**ऽङ्घ्रिबला** पर्णी क्रोष्टुकपुच्छिका ॥
पत्र. १११	वर्ग १ श्लो० ९० पत्र. २३
गोक्षुरः स्याद् गोक्षुरको **भक्षटः** स्वादुकण्टकः ।	गोक्षुरः स्याद् गोक्षुरको **भक्षकः** स्वादुकण्टकः ।
गोकण्टको भक्षटकः **षडन्तः क्षुरकः क्षुरः** ॥	गोकण्टको भक्षटकः **षडङ्गः कण्टकत्रिकः** ॥
गोकण्टो **गोखु**रः कण्टी षडङ्ग**स्त्रिकटस्त्रिक**कः ।	गोकण्टो गो**क्षु**रः कण्टी षडङ्गः **क्षुरकः क्षुरः** ।
त्रिकण्टकः कण्टफलः श्वदंष्ट्रो व्यालदंष्ट्रकः ॥	त्रिकण्टकः कण्टफलः श्वदंष्ट्रो व्यालदंष्ट्रकः ॥
पत्र. ११२	वर्ग १ श्लो०१०२-१०३ पत्र. २६
दन्ती शीघ्रा निकुम्भा स्यादुपचित्रा मकूलकः ।	दन्ती शीघ्रा निकुम्भास्यादुर्पचित्रा मकूलकः ।
तथोदुम्बरपर्णी च विशल्या च **घृ**णप्रिया ॥	तथोदुम्बरपर्णी च विशल्या च **गु**णप्रिया ॥
पत्र. ११२	वर्ग १ श्लो० २२३ पत्र. ५३
अपामार्गश्च शिखरी प्रत्यक्पुष्पी मयूरकः ।	अपामार्ग**स्तु** शिखरी प्रत्यक्पुष्पी मयूरकः ।
अधःशल्या**ऽथ** किणिही दुर्ग्रहः खरमञ्जरी ॥	अधः**शल्यो**ऽथ किणिही दुर्ग्रहः खरमञ्जरी ॥
स **एवो**क्तः शैखरिको मर्कटी दुर**तिग्रहः** ।	स **चै**वोक्तः शैखरिको मर्कटी दुर**भिग्रहः** ।
पत्रपुष्पी **च वशिरः कुटो** मर्कटपिप्पली ॥	**परा**कपुष्पी **वशीरश्च कण्टी** मर्कटपिप्पली ॥
पत्र. ११४	वर्ग १ श्लो० २६०-२६१ पत्र. ६०

---

१. **क्रान्ता** ण. ॥ २. **स्थूलभण्टा**ं ख. ग. ॥ ३. **ंण्टाली म**ं ग. घ. ङ. च. ॥ ४. **वृक्षक**ं झ. ॥ ५. **वृक्षव**ं झ. ॥ ६. **ंपवित्रा**ं क. ख. ग. ङ. च. ॥ ७. **ंशल्यश्च कि**ं क. ख. ॥

निघण्टुशेषटीका	धन्वन्तरीयनिघण्टु
शुण्ठी महौषधं विश्वा नागरं विश्वभेषजम् ।	शुण्ठी महौषधं विश्वं नागरं विश्वभेषजम् ।
विश्वौषधं शृङ्गबेरं कटुभद्रं तथाऽऽर्द्रकम् ॥	विश्वौषधं शृङ्गबेरं कटुभद्रं तथाऽऽर्द्रकम् ॥
पत्र. ११५	वर्ग २ श्लो० ८२ पत्र. ८६
पुनर्नवा विशाखश्च कटिल्लः शशिलाटकः ।	पुनर्नवा विशाखश्च कठिल्लः शशिवाटिका ।
वृश्ची च क्षुद्रवर्षाभूर्दीर्घपत्रः कटिल्लकः ॥	[1]वृश्चीरः क्षुद्रवर्षाभूर्दीर्घपत्रः कठिल्लकः ॥
पत्र. ११५	वर्ग १ श्लो०२७४ पत्र. ६२
पुनर्नवाऽपरा क्रूरः सद्यो मण्डलपत्रकः ।	पुनर्नवोऽपरः क्रूरः सद्यो मण्डलपत्रकः ।
श्वेतमूलो वर्षाकेतुर्महावर्षाभूरुच्यते ॥	श्वेतमूलो वर्षकेतुर्महावर्षाभुरुच्यते ॥
पत्र. ११६	वर्ग १ श्लो०२७६ पत्र. ६३
ज्योतिष्मती तु कटभी स्यात् सुवर्णलतेति च ।	ज्योतिष्मतो तु कटभी सुवर्णलतिकेति च ।
ज्योतिष्का चाग्निभासा च लवणोदा च दुर्दिना ॥	ज्योतिष्कायाऽग्निभासा च लवणोक्ता च [2]दुर्जरा ॥
पत्र. ११६	वर्ग १ श्लो०२६७ पत्र. ६१
माषपर्णी तु काम्बोजी कृष्णवृन्ता महासहा ।	माषपर्णी च काम्बोजी कृष्णवृन्ता महासहा ।
आर्द्रमाषा सिंहवृन्ता मांसमाषाऽश्वपुच्छिका ॥	आर्द्रमाषा सिंहविन्ना मांसमासाऽश्वपुच्छिका ॥
पत्र. ११७	वर्ग १ श्लो०१३६ पत्र. ३२
मुद्गपर्णी क्षुद्रसहा शिम्बी मार्जारगन्धिका ।	मुद्गपर्णी क्षुद्रसहा शिम्बी मार्जारगन्धिका ।
वनजा रङ्गणी ह्रासा शूर्पपर्णी बुधैः स्मृता ॥	वनजा रिङ्गिणी ह्रस्वा शूर्पपर्ण्यावुभे स्मृते ॥
पत्र. ११७	वर्ग १ श्लो०१३८ पत्र. ३२
तामलक्युत्तमा ताली तमालं तु तमालिनी ।	तामलक्यजटा ताली तमालं तु तमालिनी ।
वितुन्नकस्त्वजझटा च झाटा साऽऽमलकीति च ॥	वितुन्नभूता तमकं भूधात्री भ्वामलक्यपि ॥
पत्र. ११८	वर्ग ३ श्लो०८४ पत्र. ११२
हरिद्रा पीतिका पिङ्गा रजनी रञ्जिनी निशा ।	हरिद्रा पीतिका पिङ्गा रजनी रञ्जिनी निशा ।
गौरी वर्णवती पीता हरिता वरवर्णिनी ॥	गौरी वर्णवती पीता [3]हरिता वरवर्णिनी ॥
हलदी हलना श्रेष्ठा ज्ञेया वर्णविलासिनी ।	[4]हलदीका भद्रलता ज्ञेया वर्णविलासिनी ।
विषघ्नी च जयन्ती च दीर्घरक्ता सुरञ्जिणी ॥	विषघ्नी च जयन्ती च दीर्घरङ्गा तु रञ्जिणी ॥
पत्र. ११९	वर्ग १ श्लो० ५४–५५ पत्र. १७
चक्रमर्दस्त्वेडगजो मेषाक्षोऽण्डगजः स्मृतः ।	चक्रमर्दस्त्वेडगजो मेषाक्षोऽण्डगजस्तथा ।
प्रपुनाटः प्रपुनटश्चकी त्वावर्तकः स च ॥	प्रपुन्नाटः प्रपुन्नाडश्चकी व्यावर्तकस्तथा ॥
पत्र. ११९	वर्ग ४ श्लो०५ पत्र.१३४
श्रावणी स्यान्मुण्डनिका भिक्षुः श्रवणशीर्षिका ।	श्रावणी स्यान्मुण्डिनिका भिक्षुः श्रवणशीर्षिका ।
श्रवणाह्वा प्रव्रजिता परिव्राजी तपोधना ॥	श्रावणाह्वा प्रव्रजिता परिव्राँजी तपोधना ॥
पत्र. १२०	वर्ग १ श्लो० १५९ पत्र. ३७

१. वृश्चिकः ख. ॥ २. दुर्भरा क. ङ.; दुर्लभा ग. ॥ ३. हरिद्रा क. ख. ग. घ. ङ. ॥ ४. हलादिका क. ॥ ५. °व्राजी तथा घना । क. ङ. च. ॥

निघण्टुशेषटीका	धन्वन्तरीयनिघण्टु
महाश्रावण्यथाऽन्या तु लोचनीया तथाऽपरा ।	महाश्रावणिका मुण्डी लोभनीया तथाऽन्यथा
कदम्बपुष्पिका चोक्ता छिन्नग्रन्थनिका च सा ॥	कदम्बपुष्पिका प्रोक्ता छिन्नग्रन्थिनिका च सा ॥
पत्र. १२०	वर्ग १ श्लो० १६० पत्र. ३७
बाकुची सोमराजी च सोमवल्ली सुवल्लयपि ।	बाकुची सोमराजी तु सोमवल्ली सुवल्लयपि ।
अवल्गुजः कृष्णफली सैव पूतिफली मता ॥	अवल्गुजा कृष्णफला सैव पूतिफला मता ॥
चन्द्रलेखेन्दुलेखा च शशिलेखा च सा मता ।	चन्द्रलेखेन्दुलेखा च शशिलेखा मता च सा
पूतिपर्णी कालमेषी दुर्गन्धा कुष्ठनाशनी ॥	पूतिकर्णी कालमेषी दुर्गन्धा कुष्ठनाशिनी ॥
पत्र. १२१	वर्ग १ श्लो० १६५–६ पत्र. ३८
रास्ना युक्तरसा रस्या श्रेयसी रसना रसा ।	रास्ना युक्तरसा रस्या श्रेयसी रसना रसा ।
सुगन्धमूलाऽतिरसा सैव युक्तरसा स्मृता ॥	सुगन्धमूलाऽतिरसा सैव पुत्तिरसा [1]स्मृता ।
पत्र. १२१	वर्ग १ श्लो० २७० पत्र. ६२
अन्या महासुगन्धा तु सुवहा गन्धनाकुली ।	अन्या महासुन्धा च सुवहा गन्धनाकुली ।
सर्पाक्षी नकुलेष्टा च छत्राकी विषमर्दनी ॥	सर्पाक्षी नकुलेष्टा च [2]छत्राकी विषमर्दिनी ॥
पत्र. १२२	वर्ग ४ श्लो० १०५ पत्र. १५५
कुठेरकस्तु वैकुण्ठः क्षुद्रपत्रोऽर्जकः सितः ।	कुठेरकस्तु वैकुण्ठः क्षुद्रपर्णोऽर्जकस्तथा ।
वटपत्रः कुठेरोऽन्यः पर्णासो बिल्वगन्धकः ॥	वटपत्रः कुठेरोऽन्यः पर्णासो[3] बिल्वगन्धकः ॥
कुठेरकस्तृतीयोऽन्यो मालुकः कृष्णमालुकः ।	कुठेरकस्तृतीयोऽन्यः शालुकः कृष्णशालुकः ।
कृष्णार्जकः कालतालः करालः कृष्णमल्लिकः ॥	कृष्णार्जकः कालमालः करालः कृष्णमल्लिका ॥
पत्र. १२३	वर्ग ४ श्लो० ५४, ५६ पत्र. १४५
सुरसा तुलसी ग्राम्या तुलसी बहुमञ्जरी ।	सुरसा तुलसी ग्राम्या सुरभी बहुमञ्जरी ।
आपीता राक्षसी गौरी भूतघ्नी देवदुन्दुभिः ॥	अपेतराक्षसी गौरी भूतघ्नी देवदुन्दुभिः ॥
पत्र. १२४	वर्ग ४ श्लो० ५० पत्र. १४४
जम्बीरः खरपत्रश्च फणी चोक्तः फणिज्जकः ।	जम्बीरः खरपत्रश्च फणी चोक्तः फणिज्जकः ।
मरूबको मरुबको मरुन्मरिचकस्तथा ॥	मरुत्तको मरुबको मरुर्मरुबकस्तथा ॥
पत्र. १२४	वर्ग ४ श्लो०५२ पत्र. १४४
त्रायमाणा कृतत्राणा त्रायन्ती त्रायमाणिका ।	त्रायमाणा कृतत्राणा त्रायन्ती त्रायमाणका ।
बलभद्रा बलदेवा वार्षिकं गिरिसानुजा ॥	बलदेवा बलभद्रा वार्षिकं [4]गिरिजानुजा ॥
पत्र. १२५	वर्ग १ श्लो० २५४ पत्र. ५९
यासो यवासकोऽनन्ता बालपत्रोऽधिकण्टकः ।	यासो यवासकोऽनन्तो बालपत्रोऽधिकण्टकः ।
वीरमूलः समुद्रान्ता दीर्घमूलो मरूद्भवः ॥	दूरमूलः समुद्रान्तो दीर्घमूलो मरूद्भवः ॥
धन्वयासो दुरालम्भा ताम्रमूली च कच्छुरा ।	धन्वयासो दुरालम्भा ताम्रमूली च कच्छुरा ।
दुरालभा च दुःस्पर्शा यासो धन्वयवासकः ॥	दुरालम्भा च दुःस्पर्शा यासो धन्वयवासकः ॥
पत्र. १२५	वर्ग १ श्लो० २२,२० पत्र. १०–११

१. मता क. ग. घ. ङ. च. ॥ २. च्छत्राक्षी ङ. छ. झ. ॥ ३. °सो गन्धबिल्वकः क. ॥ ४. गिरितानुगम् । ङ. च; गिरिसानुजम् झ. ॥

निघण्टुशेषटीका

किराततिक्तको हैमः काण्डतिक्तः किरातकः ।
भूनिम्बोऽनार्यतिक्तश्च कैरातो रामसेनकः ॥
कैडर्यः पिचुमन्दश्च निम्बो रिष्टो वरत्वचः ।
छर्दनो हिङ्गुनिर्यासः प्रियमालश्च पर्वतः ॥
नेपालः कथितश्चान्यो जात्यश्चैष ज्वरान्तकः
नाडीतिक्तोऽर्द्धतिक्तश्च निद्रारिः सन्निपातहा॥
पत्र. १२६

कुष्ठं रोगो गदो व्याधिरुत्पलं पाकलं रुजा ।
पत्र. १२७

वालकं वारि तोयं च हीबेरं जलमम्बु च ।
केशं वज्रमुदीच्यं च पिङ्गमाचमनं कचम् ॥
पत्र. १२७

शटी षटी पलाशः स्यात् ज्ञेया पृथुपलाशिका
सुगन्धमूला गन्धोली षड्ग्रन्था सुव्रता वधूः ।
पत्र. १२८

एलावालुकमालूकं वालुकं हरिवालुकम् ।
एल्वालकं कपित्थं च दुर्वर्णं प्रसरं दृढम् ॥
पत्र.१२८–१२९

कुङ्कुमं रुधिरं रक्तमसृगस्रं च पीतकम् ।
काश्मीरं चारु वाल्हीकं सङ्कोचं पिशुनं वरम्॥
पत्र.१२९

जाती मनोज्ञा सुमना राजपुत्री प्रियंवदा ।
मालती हृद्यगन्धा च वेतिका तैलभाविनी ॥
पत्र.१३०

जातीफलं जातिसस्यं शालूकं मालतीफलम् ।
मज्जासारं जातिसूतं पुटं सौमनसं फलम् ॥
पत्र.१३०

यूथिका बालपुष्पी च पुण्यगन्धा गुणोज्ज्वला ।
गणिका चारुमोटा च शिखण्डी ॥
पत्र. १३१

स्वर्णयूथिका ॥
यूथशालिनी
पत्र.१३१

धन्वन्तरीयनिघण्टु

किराततिक्तको हैमः काण्डस्तिक्तः किरातकः ।
भूनिम्बोऽनार्यतिक्तश्च[1] किरातो रामसेनकः ॥
[2]कडर्यः पिचुमन्दश्च निम्बोऽरिष्टो वरत्वचः ।
छर्दिघ्नो हिङ्गुनिर्यासः प्रियशालश्च पार्वतः ॥
नेपालः[3] कथितश्चान्यो जातिभेदो ज्वरान्तकः ।
महातिक्तश्च तिक्तश्च निद्रारिः सन्निपातहा ॥
वर्ग १ श्लो० ३३–३५ पत्र. १४

कुष्ठं रोगोऽगदो व्याधिरुत्पलं पाकलं रुजा ।
वर्ग ३ श्लो० ४९ पत्र. १०५

वालकं वारि तोयं च हीबेरं जलमम्बु च ।
केश्यं वज्रमुदीच्यं च पिङ्गमाचमनं कचम् ॥
वर्ग १ श्लो० ४७ पत्र. १६

सटी सठी पलाशश्च ज्ञेया पृथुपलाशिका ।
सुगन्धमूला गन्धाली षड्ग्रन्था सुव्रता वधूः॥
वर्ग १ श्लो० ६१ पत्र. १८

एलावालुकमालूकं वालुकं हरिवालुकम् ।
एल्वालुकं कपित्थं[4] स्याद् दुर्वर्णं प्रसरं दृढम् ॥
वर्ग ३ श्लो०७६ पत्र. १११

कुङ्कुमं रुधिरं रक्तमसृगस्रं च पीतकम् ।
काश्मीरं चारु वाह्लीकं सङ्कोचं पिशुनं वरम् ।
वर्ग ३ श्लो०१२ पत्र. ९५

जाती मनोज्ञा सुमना राजपुत्री प्रियंवदा ।
मालती हृद्यगन्धा च चेतिका [5]तैलभाविनी॥
वर्ग ५ श्लो० १३७ पत्र. १९८

जातीफलं जातिसस्यं शालूकं मालतीफलम् ।
[6]मदशौण्डं जातिश्रृङ्गं पुटं सौमनसं फलम् ।
वर्ग ३ श्लो०३५ पत्र. १०२

यूथिका बालपुष्पा तु पुष्पगन्धा गुणोज्ज्वला ।
[7]गणिका चारुमोदा च शिखण्डी ॥
वर्ग ५ श्लो० १४८ पत्र. २००

[8]स्वर्णयूथिका
सुवर्णयूथा हरिणी पीतिका पीतयूथिका ।
वर्ग ५ श्लो०१४८–९ पत्र. २००

---

१. °श्च कैराते ख. ग. ङ. ॥ २. कौण्डर्यः क. घ. ङ. च. ॥ ३. °लः पथिकश्चान्यो क. ख. घ. ङ. च. ॥ ४. °त्थं च दुर्वर्णप्र° क. ख. ङ. ॥ ५. तिलभाविनी झ. ॥ ६. पज्जासारं जा° ग. ॥ ७. कणिका क. ङ. ॥ ८ स्वर्णपुष्पिका ङ. ॥ .

निघण्टुशेषटीका

प्रोक्ताऽन्या शङ्खधवला नामतः शङ्खयूथिका ॥
पत्र. १३१

कुन्दः सुमकरन्दश्च श्वेतपुष्पो मनोहरः ।
अट्टाट्टहासो भृङ्गस्तु शुक्लशाल्योदनोपमः ।
पत्र. १३२

ग्रीष्माऽतिसुरभिः कान्ता सुगन्धा बनमालिनी ।
सुकुमारा शिखरिणी **नेमाली नव**मालिका ।
पत्र.१३३

मल्लिका शीतभीरुश्च मदयन्ती प्रमोद्दनी ।
मदनीया गवाक्षी च भूपद्यष्टापदी तथा ॥
पत्र. १३३

बार्षिकी त्रिपुटा त्र्यस्रा सुरूपा सुभगा प्रिया ।
श्रीमती षट्पदानन्दा सुवर्षा मुक्तबन्ध**नी** ॥
पत्र. १३४

तरणी रामतरणी **वर्णिनी** चारुकेसरा ।
रम्या कुमारी गन्धाढ्या द्विरेफगणसम्मता ॥
पत्र. १३४

सैरेयकः सहचरः सैरेयश्च सहाचरः ।
पत्र. १३५

पीतो रक्तोऽथ नीलश्च कुसुमैस्तं विभावयेत् ॥
पीतः कुरण्टको ज्ञेयो रक्तः कुरबकः स्मृतः ।
नील आर्तगलो दासी बाण ओदनपाक्यपि ॥
पत्र. १३५

चित्रको दहनो व्यालः पाठीनो दारुणोऽग्निक ।
ज्योतिष्को वल्लरी वह्निः पाठी पाली **कुटः** शिखी।
पत्र. १३६

वासन्ती प्रहसन्ती च सुवसन्ता वसन्तजा ।
शीकरा शीतसंवासा सेव्या भ्रमरबान्धवा ॥
पत्र. १३७

नीलिनी नीलिका काली ग्राम्या तूणी विशोधनी ।
तुत्था श्रीफलिका **मेला** भारवाही च रञ्जनी ।
पत्र. १३८

धन्वन्तरीयनिघण्टु

प्रोक्ताऽन्या शङ्खधवला नामतः शङ्खयूथिका ।
वर्ग ५ श्लो० १४९ पत्र. २००

कुन्दः सुमकरन्दश्च **सदा**पुष्पो मनोहरः ।
अट्टहासो भृङ्गसुहृच्छुक्लः शाल्योदनोपमः॥
वर्ग ५ श्लो०१५० पत्र. २०१

ग्रैष्मी तु सुरभिः कान्ता सुगन्धा वनमालिनी ।
सुकुमारा शिखरिणी [1]**नेपाली बन**मालिका ॥
वर्ग५ श्लो० १४० पत्र. १९८

मल्लिका शीतभीरुश्च मदयन्ती प्रमो**दि**नी ।
मदनीया गवाक्षी च [2]भूपद्य**ष्ट**पदी तथा ॥
वर्ग ५ श्लो०१३४ पत्र. १९७

वार्षिकी त्रिपुटा त्र्यस्रा सुरूपा सुभगा प्रिया ।
श्रीमती षट्पदानन्दा सुवर्षा मुक्तबन्ध**ना** ॥
वर्ग ५ श्लो १३६ पत्र- १९७

तरणी रामतरणी **कणिका** चारुकेसरा ।
सहा कुमारी गन्धाढ्या द्विरेफगणसम्मता ॥
वर्ग ५ श्लो०१४५ पत्र. १९९

सैरेयकः सहचरः सैरेयश्च सहाचरः ।
वर्ग १ श्लो० २७८ पत्र. ६३

पीतो रक्तोऽथ नीलश्च कुसुमैस्तं विभावयेत् ॥
पीतः कुरण्टको ज्ञेयो रक्तः कुरबकः स्मृतः ।
नील आर्तगलो दासी बाण ओदनपाक्यपि ॥
वर्ग १ श्लो० २७८–२७९ पत्र.६३

चित्रको दहनो व्यालः [3]पा**ठि**नो दारुणोऽग्निकः ।
[4]ज्योतिष्को वल्लरी वह्निः [5]पाली पाठी **कटु**ः शिखी॥
वर्ग २ श्लो० ८० पत्र. ८६

वासन्ती प्रहसन्ती च सुवसन्ता वसन्तजा ।
शोभना शीतसंवासा सेव्या भ्रमरबान्धवा ॥
वर्ग ५ श्लो० १३९ पत्र. १९८

नीलिनी नीलिका काला ग्राम्या तूणी विशोधनी ।
तुत्था श्रीफलिका [6]**मोचा** भारवाही च रञ्जनी ॥
वर्ग १५ लो० २३२ पत्र. ५५

---

१. **नेवाली** ख. ॥ २. **भूतपर्ण्यपदी** छ. झ. ॥ ३. **पाठीरो दा**° ग. घ. ॥ ४. **ज्योतिष्कश्चा**·
रुणोवह्निः ग. छ. ॥ ५. **पाठी पाठिः शठः शिखी** ग. ॥ ६. **मेला** क. ख. ग. ङ. च. ॥

निघण्टुशेषटीका	धन्वन्तरीयनिघण्टु
दमनकं पाण्डुराङ्गं दान्तं गन्धोत्कटं **मुनिम् ।** **पुण्डरीकं ब्रह्मजटमृषिपुत्रं तपस्विनम्॥** पत्र. १३८	**दमनः पाण्डुरागः स्याद् दान्तो** गन्धोत्कटो **मुनिः ।** पुण्डरीको ब्रह्मजटा तपस्वी ऋषिपुत्रकः ॥ वर्ग ३ श्लो० ६४ पत्र.१०९
धत्तूरकः **स्मृतो** धूर्तो देवता कितवः शठः । उन्मत्तको मदन**कतरुस्तलफलस्तथा** ॥ पत्र. १३९	धत्तूरः **कनको** धूर्तो देवता कितवः शठः । उन्मत्तको [1]मदनकः **कालिप्रच हरवल्लभः**॥ वर्ग ४ श्लो०७ पत्र १३५
शङ्खपुष्पी कम्बुपुष्पी शङ्खाह्वा **शङ्खमालिनी ।** **किरीटी** शङ्खकुसुमा मेध्या वनविलासिनी ॥ पत्र. १४०	शङ्खपुष्पी कम्बुपुष्पी शङ्खाह्वा[2] **कम्बुमालिनी ।** [3]**तिलकी** शङ्खकुसुमा मेध्या वनविलासिनी ॥ वर्ग ४ श्लो० ११३ पत्र.१५६
कर्चूरको **गन्धमूलो** द्राविडः काल्य एव च । वेधमुख्यो दुर्लभश्च कस्यचित् सम्मता **शटी** ॥ पत्र. १४०	कर्चूरो **गन्धमूलश्च** द्राविडः [4]काहर्य एव च । वेधमुख्यो दुर्लभश्च कस्यचित् सम्मतः **सढी**॥ वर्ग ३ श्लो० ९४ पत्र. ११४
अजमोदा बस्तमोदा दीप्यको लोच**मस्तकः** । खराश्वा कारवी **वल्ली मोचा** हस्तिमयू**रकः**॥ पत्र. १४१	अजमोदा बस्तमोदा दीप्यको लोच**मर्कटः** । खराह्वा कारवी **वल्लिमोंदा** हस्तिमयू**रिका** ॥ वर्ग २ श्लो० ९८ पत्र. ८९
यवानी दीपको दीप्यो यवसाह्वा यवा**निका** । य**मा**निकोग्रगन्धा च दीपनीया च दीपनी ॥ पत्र. १४१	यवानी दीपको दीप्यो यवसाह्वो [5]यवाग्रजः । य**वा**निकोग्रगन्धा च दीपनीया च दीपनी ॥ वर्ग २ श्लो० ९१ पत्र. ८८
पर्पटः स्यात् पर्पटको वरति**क्तश्च नामतः** । रजो रेणुश्च पां**सु**श्च कव**चश्चर्मकण्टकः** ॥ पत्र. १४२	पर्पटः स्यात् पर्पटको वरति**क्तः**[6] **सुतिक्तकः** । रजो रेणुश्च [7]पां**शु**श्च कव**चो** [8]**वर्मकण्टकः** ॥ वर्ग १ श्लो० ४५ पत्र. १६
बला भद्रा**दनी** वाटी स**माङ्गा** खरयष्टिका । महास**माङ्गौ**दनिका शीतपाक्यौदनाह्वया ॥ पत्र. १४३	बला भद्रौ**दनी** वाटी स**मङ्गा** खरयष्टिका । महास**मङ्गौ**दनिका शीतपाक्यौदनाह्वया ॥ वर्ग १ श्लो०२८० पत्र. ६४
महाबला वर्षपुष्पी तथा वाट्यायनी स्मृता । सहदे**वी** देवसहा पीतपुष्पी बृहत्फला ॥ बलिकाऽतिबला **ज्ञेया** वाट्यपुष्पी च कङ्कता । **ऋष्य**प्रोक्ता **ऋक्ष**गन्धा सैव भूरिबला मता ॥ पत्र. १४४	महाबला वर्षपुष्पी तथा वाट्यायनी स्मृता । सहदे**वा** देवसहा पीत[9]पुष्पी बृहत्फला ॥ बलिकाऽतिबला **प्रोक्ता** वाट्यपुष्पी च कङ्कता । **वृष्या** प्रोक्ता **वृष्य**गन्धा सैव भूरिबला मता॥ वर्ग १ श्लो०२८२, २८६ पत्र. ६५
वात-पित्तापहं ग्राहि बल्यं वृष्यं बलात्रयम् । पत्र. १४४	वातपित्तापहं ग्राहि बल्यं वृष्यं बलात्रयम् । वर्ग १ श्लो०२८७ पत्र. ६५

१. **मदकरः कालि**° क. ख. ग. ॥ २. °**ह्वा शङ्खमालिनी** क. ङ. ॥ ३. **तिरीटी** क. ख. ङ. ॥ ४. **कार्ष** क. ॥ ५. **यवानिका** ख. झ. ॥ ६. **तिक्तश्च नामतः** । **रजो** क. ख. ग. घ. ङ. ॥ ७ **पाण्डुश्च** घ. ङ. ॥ ८. **ब्रह्मकण्टकः** ग; **कर्मकण्टकः** त. ॥ ९ °**बला वाट्यपुष्पी** क. ॥ १०. °**पुष्पा बृ**° क. ङ. ॥

निघण्टुशेषटीका

हिङ्गु रामठमत्युग्रं जन्तुघ्नं भूतनाशनम् ।
अगूढगन्धं **वाल्हीकं** जरणं सूपधूपनम् ॥
पत्र. १४५

हिङ्गुपत्री तु **कारवी** पृथ्वीका पृथु**का** पृथुः ।
बाष्पिका दीर्घिका तन्वी बिल्विका दारुपत्रिका ।
नाडी हिङ्गुपलाशा **च** जतु**का** रामठी **रसा** ।
वंशपत्री वेणुपत्री पिण्**डा** हिङ्गु शिवाटिका ॥
पत्र. १४६

काकजङ्घा ध्वाङ्क्षजङ्घा **मद्ध्वाङ्क्षा सुलोमशा**
पारा**प**तपदी दासी नदीकान्ता प्रचीबला ॥
पत्र. १४६

काकनासा ध्वाङ्क्षनासा काकतुण्डफला च सा ।
सुरङ्गा तस्करा स्नायुर्ध्वाङ्क्षतुण्डफला मता ॥
पत्र. १४७

पाषाणभेदकोऽश्मघ्नः शिलाभेदोऽश्मभेदकः ।
स चैवोपलभेदश्च **नगविध्वंसको**ऽश्म**भित्**॥
पत्र. १४७

हयुषा व**पु**षा विस्रा विस्र**ग**न्धा **वि**गन्धिका ।
पत्र. १४७

अन्याऽश्वत्थफला(?)कच्छुघ्नी ध्वाङ्क्षनासिका ।
पत्र. १४८

शणपुष्पी बृहत्पुष्पी **स चोक्तः** शणघण्टकः ।
महाशणो माल्यपुष्पी **वा**मनी कटुतिक्तका ।
पत्र. १४८

शालपर्णी स्थिरा सौम्या त्रिपर्ण्यतिगुहा ध्रुवा ।
विदारिगन्धांशुमती दीर्घमूला **च पीतनी** ॥
सर्वानुकारिणी तन्वी दीर्घपर्णी च पर्णिका ॥
पत्र. १४९

भार्गी गर्दभशा**क**श्च पद्मा ब्राह्मणयष्टिका ।
अङ्गारवल्ली **हञ्जी च वर्दो बर्बरकस्तथा** ।
शुक्रमाता च कासघ्नी भृगुजा भार्ग**वपर्णिनी**।
पत्र. १५०

धन्वन्तरीयनिघण्टु

हिङ्गु रामठमत्युग्रं जन्तुघ्नं[1] भूतनाशनम् ।
अगूढगन्धं वाह्लीकं जरणं सूपधूपनम् ॥
वर्ग २ श्लो० ३६ पत्र. ७७

हिङ्गुपत्री तु **कबरी** पृथ्वीका पृथुला पृथुः ।
बाष्पिका दीर्घिका तन्वी बिल्विका दारुपत्रिका ॥
नाडी हिङ्गपलाशा[2]**तु** जन्तु**का** रामठी **च सा** ।
वंशपत्री वेणुपत्री पिण्**ड**हिङ्गु शिवाटिका ॥
वर्ग २ श्लो० ३८, ४० पत्र. ७७

काकजङ्घा ध्वाङ्क्षजङ्घा **काकपादा तु लोमशा** ।
पारा**व**तपदी दासी नदीकान्ता प्रचीबला ॥
वर्ग ४ श्लो० २३ पत्र. १३८

काकनासा ध्वाङ्क्षनासा काकतुण्डफला च सा ।
सुरङ्गी तस्करस्नायुर्ध्वाङ्क्षतुण्डफला मता ॥
वर्ग ४ श्लो० २५ पत्र. १३९

पाषाणभेदकोऽश्मघ्नः शिलाभेदोऽश्मभेदकः ।
स चैवोपलभेदश्च **नगभिद् दृषदश्मजित्** ॥
वर्ग १ श्लो० १५७ पत्र. ३६

हपुषा विपुषा [3]**विश्रा** विश्रगन्धाऽतिगन्धिका ।
वर्ग २ श्लो० ९ पत्र. ७०

अपरा चाश्वत्थफला [4]कच्छूघ्ना ध्वाङ्क्षनाशिनी ॥
वर्ग २ श्लो० ९ पत्र. ७०

[5]शणपुष्पी बृहत्पुष्पी **सा चोक्ता**[6] शणघ**ण्टिका**
महाशणो माल्यपुष्पी **व**मनी कटुतिक्तका ॥
वर्ग१ श्लो०२०० पत्र. ४७

शा**लि**पर्णी स्थिरा सौम्या त्रिपर्ण्यतिगुहा ध्रुवा ॥
विदारिगन्धांऽशुमती दीर्घमूला **सुपत्रिका** ।
सर्वानुकारिणी तन्वी दीर्घपर्णी च पर्णिका ॥
वर्ग १ श्लो०८७,८८,९१ पत्र. २३

भार्गी गर्दभशा**कं च** पद्मा ब्राह्मणयष्टिका ।
अङ्गारवल्ली [7]**फञ्जी** [8]**च सैव ब्रह्मसुवर्चसा**॥
[10]**शु**क्रमाता च कासघ्नी भृङ्गजा भार्ग**वा**[11]**मता**॥
वर्ग १ श्लो०६८,६९ पत्र. २०

---

१. °घ्नं **शूलनाशनम्** । क ङ. ॥ २. °**शाख्यो ज**° क. ख. घ. ङ. ॥ ३. **विश्वा मिश्रगन्धा** छ. ॥ ४. **कच्छुघ्नी** ङ. ॥ ५. **पणपुष्पी** क. ङ. च. ॥ ६.° **क्ता षण**° क. ॥ ७. °**शनो मा**° क. भ. ॥ ८. **फाञ्जी** झ. ॥ ९. °**ञ्जीयं वचों बर्बरकस्तथा** ॥६॥ **श**° क. छ. च. ॥ १०. **शुक्रमाता** झ. ॥ ११. °**वाग्रणीः** । झ ॥

निघण्टुशेषटीका	धन्वन्तरीयनिघण्टु
यवतिक्ता शङ्खिनी **च** दृढपादा विसर्पिणी ।	यवतिक्ता शङ्खिनी **तु** दृढपादा विसर्पिणी ।
नाकुली चाक्षिपिण्डा **च चित्रमाला** यशस्करी॥	नाकुली चाक्षपीडा **च नेत्रमीला** यशस्करी ॥
पत्र. १५१	वर्ग १ श्लो० २५६ पत्र. ५९
तेजस्विनी तेजवती तेजोह्वा तेजनी **तिजा** ।	तेजस्विनी तेजवती [1]तेजोह्वा तेजनी**ति च** ।
अश्वघ्नी वल्कला शीता पारिजाता महौजसी ॥	[2]अश्वघ्नी वल्कला शीता पारिजाता महौजसी ॥
पत्र. १५१	वर्ग १ श्लो० २६६ पत्र. ६१
मिश्रेया तालक**र्णी च** तालप**र्णी मिसि**स्तथा ।	मिश्रेया तालप**र्णी तु** तालप**त्री मिशि**स्तथा ।
शालेयः स च शालीनो नाम्ना शीतशिवो मतः ॥	शालेयः स च शालीनो नाम्ना शीतशिवो मतः ॥
पत्र. १५२	वर्ग २ श्लो० ४ पत्र. ६९
तालीसकं तु तालीसं पत्रं तालीसपत्रकम् ।	तालीसकं तु तालीसं पत्रं तालीसप**त्रकम्** ।
तद्वदमलकीपत्रं पत्राढ्यं च **सुखादनम्** ॥	**नीलमा**मलकीपत्रं पत्राढ्यं च **शुकोदरम्** ।
पत्र. १५३	वर्ग २ श्लो० ५३ पत्र. ८०
मांसी कृष्णजटा हिंस्रा नलदा जटिला**ऽऽमिषी** ।	मांसी कृष्णजटा हिंस्रा नलदा जटिला **मिशी** ।
जटा च पिशिता **मेषी** क्रव्यादी च तपस्विनी ॥	जटा च पिशिता **पेशी** क्रव्यादी च तपस्विनी ॥
पत्र. १५३	वर्ग ३ श्लो० ४५ पत्र. १०४
द्वितीया गन्धमांसी **च** केशी भूतजटा स्मृता ।	द्वितीया गन्धमांसी **स्यात्** केशी भूतजटा स्मृता ।
पैशाची पूतना केशी भूतकेशी **सु**लोमशा ॥	**पिशा**ची पूतना केशी भूतकेशी **च** लोमशा ॥
पत्र. १५४	वर्ग ३ श्लो० ४७ पत्र. १०५
मुरा गन्धवती दैत्या गन्धाढ्या गन्धमा**दनी** ।	मुरा गन्धवती दैत्या गन्धाढ्या गन्धमा**लिनी** ।
सुरभिर्भूरिगन्धा च कुटी गन्धकुटी स्मृता ॥	सुरभिर्भूरिगन्धा च कुटी गन्धकुटी स्मृता ॥
पत्र. १५४	वर्ग ३ श्लो०६७ पत्र. १०९
प्रपौण्डरीकं चक्षुष्यं **पौण्डर्यं** पुण्डरीयकम् ।	प्रपौण्डरीकं चक्षुष्यं **पुण्डर्यः** पुण्डरीयकम्
पौण्डरीकं शतपुष्पं सुपुष्पं सानु**मानकम्** ॥	[3]**सितपुष्पं सुपुष्पं स्याच्छ्री**पुष्पं सानु**जानुजम्** ॥
पत्र. १५५	वर्ग ३ श्लो०९२ पत्र. ११४
जन्तु**वारा** जन्तुकृष्णा जतुका **र**जनी स्मृता ।	जन्तु**कारी** जन्तुकृष्णा जतुका **रञ्ज**नी स्मृता ।
जननी चैव **संस्पर्शा** जतुका चक्रवर्तनी ॥	जननी चैव **संहर्षा** जन्तुका चक्रवर्तिनी ॥
पत्र. १५५	वर्ग ४ श्लो० ८८ पत्र. १५१
मांसरोहिण्यतिरुहा वृन्ता चर्म**कशा कशा** ।	मांसरोहिण्यतिरुहा वृत्ता चर्म[4]**कसा च सा** ।
विकसा मांसरोहा च रुहा रक्ता प्रकीर्तिता ॥	विकसा मांसरोहा च रुहा रक्ता प्रकीर्तिता ॥
पत्र. १५६	वर्ग ४ श्लो० ९४ पत्र. १५२
रक्तपादी शमीपत्रा स**माङ्गा**ऽञ्जलिकारिका ।	रक्तपादी शमीपत्रा स**मङ्गा**ऽञ्जलिकारिका ।
नमस्कारी **गण्डकाली नाम्ना (?रास्ना)**	नमस्कारी **गन्धकारी स्पर्शसंकोचपर्णिका**
खदिरिका मता ॥	वर्ग ४ श्लो० १०९ पत्र. १५५
पत्र. १५६	

१. तेजाका ग ॥ २. अस्वप्ना ख ॥ ३. शीतपुष्पं झ. ॥ ४. कषा च ग; कशा च त. ॥

निघण्टुशेषटीका

रक्तपाद्यपरा प्रोक्ता विषग्रन्थिस्त्रिपाद्यपि ।
हंसपादी हंसपदी घृतमण्डलकश्च सा ॥
पत्र. १५७

जलपिप्पल्यभिहिता शारदी तोयपिप्पली ।
मत्स्यादनी मत्स्यगन्धा लाङ्गली शकुलादनी ॥
पत्र. १५७

बुको वसुक इत्युक्तः शिवाङ्कः शिवशेखरः ।
महापाशुपतश्चैव सुव्रतः शिवमल्लिका ॥
पत्र. १५८

अतिविषा शुक्लकन्दा ज्ञेया विश्वा च भङ्गुरा ।
श्यामकन्दा प्रतिविषा शृङ्गी चोपविषा विषा ॥
पत्र. १५८

मेदा ज्ञेया मणिच्छिद्रा माल्यवर्णा धराऽपि च ।
महामेदा देवमणिर्वसुच्छिद्रा प्रकीर्तिता ॥
पत्र. १५९

काकादनी काकपीलुः काकशिम्बिश्च रक्तिका ।
चक्रशल्या ध्वाङ्क्षनखी द्रुमोद्घा काकनन्तिका ।
चूडामणिः शीतपाकी शिखण्डा कृष्णला मता ।
उच्चटा ताम्रिका गुञ्जा [चटकी काकसाह्वया] ॥
पत्र. १६०

पाठाऽम्बष्ठाऽम्बष्ठकी च प्राचीना पापचेलिका ।
वृकतिक्ता वनतिक्ता पापिका स्थापनी वृकी ॥
पत्र. १६१

शतावरी शतपदी पीवरीन्दीवरी वरी ।
ऋक्षप्रोक्ता द्वीपिशत्रुर्द्वीपिका वरकण्टका ॥
सह[स्र]वीर्याऽभीरुश्च तुङ्गिनो बहुपत्रिका ।
महापुरुषदत्ता च शतावर्यूर्ध्वकण्टका ॥
पत्र. १६२

कटुका मत्स्यशकुला मत्स्यपित्ता च रोहिणी ।
कृष्णभेदा चन्द्ररुहा नाम्ना कटुकरोहिणी ॥
अशोका रोहिणी तिक्ता चक्राङ्गी शकुलादनी ।
कटुरोहिण्यरिष्टा च प्रोक्ता तिक्तकरोहिणी ॥
पत्र. १६३

धन्वन्तरीयनिघण्टु

रक्तपाद्यपरा प्रोक्ता विश्वग्रन्थिस्त्रिपाद्यपि ।
हंसपादी हंसपदी घृतमण्डलिका च सा ॥
वर्ग ४ श्लो० १११ पत्र. १५६

जलपिप्पल्यभिहिता शारदी तोयपिप्पली ।
मत्स्यादनी मत्स्यगन्धा लाङ्गली शकुलादनी ॥
वर्ग ४ श्लो० ६४ पत्र. १४७

बुको वसुक इत्युक्तः शिवाह्वः शिवशेखरः ।
महापाशुपतश्चैव सुव्रतः शिवमल्लिका ॥
वर्ग ४ श्लो० १९ पत्र. १३८

अतिविषा शुक्लकन्दा ज्ञेया विश्वा चभङ्गुरा ।
श्यामकन्दा प्रतिविषा शृङ्गी चोपविषा विषा ॥
वर्ग १ श्लो० १० पत्र. ८

मेदा ज्ञेया मणिच्छिद्रा शल्यपर्णी धराऽपि च ।
महामेदा देवमणिर्वसुच्छिद्रा प्रकीर्तिता ॥
वर्ग १ श्लो० १२७ पत्र. ३०

काकादनी काकपीलुः [1]काकणन्ती च रक्तिका ।
वक्त्रशल्या ध्वाङ्क्षनखी दुर्मोहा काकणन्तिका
चूडामणिः शीतपाकी शिखण्डी कृष्णला मता ।
उच्चटा ताम्रिका गुञ्जा चटकी काकसाह्वया ॥
वर्ग ४ श्लो० २७,२९ पत्र. १३९,१४०

पाठाऽम्बष्ठाऽम्बष्ठकी च प्राचीना [2]पापचेलिका
वरतिक्ता वृहत्तिक्ता पाठिका स्थापनी वृकी ॥
वर्ग १ श्लो० ७० पत्र. २०

शतावरी शतपदी पीवरीन्दीवरी वरी ।
ऋष्यप्रोक्ता द्वीपिशत्रुर्द्वीपिका[3] चोर्ध्वकण्टका ॥
सहस्रवीर्या भीरुश्च [4]रङ्गिणी बहुपत्रिका ।
महापुरुषदन्ता च शतावर्यूर्ध्वकण्टिका ॥
वर्ग १ श्लो० २९१-३ पत्र. ६६-६७

कटुका मत्स्यशकला मत्स्यपित्ता च रोहिणी ।
कृष्णभेदा काण्डरुहा नाम्ना कटुकरोहिणी ॥
अशोकरोहिणी तिक्ता चक्राङ्गी शकुलादनी ।
कटुरोहिण्यरिष्टा च प्रोक्ता तिक्तकरोहिणी ॥
वर्ग १ श्लो० ३७-३८ पत्र. १४-१५

---

१. काकशिम्बी च ङ. छ ॥ २. पापवेलिका क. ॥ ३. °का खरकण्टका ॥ झ. ॥ ४. तुङ्गिनी ख. ङ. ञ. ण ॥

निघण्टुशेषटीका	धन्वन्तरीयनिघण्टु
मञ्जिष्ठा कालमेषी च समङ्गा विकसाऽरुणा।	मञ्जिष्ठा कालमेषी च समङ्गा विकसाऽरुणा।
मञ्जुला रक्तयष्टिश्च भण्डी योजनवल्लयपि ॥ पत्र. १६४	मञ्जुका रक्तयष्टी च भाण्डी योजनवल्लयपि। वर्ग १ श्लो०१७ पत्र. १०
मरिचं मलिनं श्यामं वेल्लजं कृष्णमूषणम्। यवनेष्टं शिरोवृत्तं कोलकं धार्मपत्तनम्॥ पत्र. १६५	मरिचं [1]पलितं श्यामं वल्लीजं कृष्णमूषणम्। यवनेष्टं शिरोवृत्तं कोलकं[2] धर्मपत्तनम् ॥ वर्ग २ श्लो० ८८ पत्र. ८७
पिप्पली मागधी कृष्णा चपला तीक्ष्णतण्डुला। उपकुल्या कणा श्यामा कोला शौण्डी तथोषणा॥ पत्र. १६६	पिप्पली मागधी कृष्णा चपला तीक्ष्णतण्डुला। उपकुल्या कणा श्यामा कोला शौण्डी तथोषणा॥ वर्ग २ श्लो० ७३ पत्र. ८४
मूलं च पिप्पलीमूलं ग्रन्थिकं चटकाशिरः। कोलमूलं कटुग्रन्थि सर्वग्रन्थिकमूलकम् ॥ पत्र. १६६	मूलं च पिप्पलीमूलं ग्रन्थिकं[3] चविकाशिरः। [4]कोलमूलं [5]कटुग्रन्थि सर्वग्रन्थिकमूषणम् ॥ वर्ग २ श्लो० ७५ पत्र. ८४
चविका कोलवल्ली च चव्यं चवनमेव च। पत्र. १६६	चविका कोलवल्ली च चव्यं चविकमेव च॥ वर्ग २ श्लो० ७६ पत्र ८५
तस्याः फलं विनिर्दिष्टं श्रेयसी हस्तिपिप्पली। पत्र. १६७	तस्याः फलं विनिर्दिष्टं श्रेयसी गजपिप्पली। वर्ग २ श्लो० ७८ पत्र. ८५
अश्वखुरः श्वेतपुष्पी श्वेता च गिरिकर्णिका। कटभी श्वेतनामा च श्वेतस्यन्दाऽपराजिता॥ नीलपुष्पी महाश्वेता गिरिकर्णी गवादनी। वेशी चात्युग्रगन्धा च नीलस्यन्दा प्रकीर्तिता॥ पत्र. १६८	[6]अश्वक्षुरः श्वेतपुष्पी श्वेता च गिरिकर्णिका। [7]कटभी श्वेतनामा च श्वेतस्पन्दाऽपराजिता॥ नीलपुर्[8]ष्पा महाश्वेता गिरीकर्णी [9]गवादनी। वल्ली चात्युग्रगन्धा च नीलस्पन्दा प्रकीर्तिता॥ वर्ग ४ श्लो ८४, ८५ पत्र, १५१
ऐन्द्रीन्द्रवारुणीन्द्राह्वा इन्द्रैर्वारुर्विषादनी। गवादनी क्षुद्रफला विशालाक्षी गवाक्ष्यपि॥ पत्र. १६८	ऐन्द्रीन्द्रवारुणीन्द्राह्वाऽथेन्द्रवारुर्मृगादनी। गवादनी क्षुद्रफला वृषभाक्षी गवाक्ष्यपि॥ वर्ग १ श्लो० २४८ पत्र. ५८
अन्येन्द्रवारुणी प्रोक्ता विशाला तु महाफला। आत्मरक्षा चित्रफला तुम्बसी त्रपुसी च सा॥ श्वेतपुष्पा मृगाक्षी च मृगेर्वारुर्मृगादनी। स्तिदन्ती नागदन्ती वारुणी गजचिर्भिटी॥ पत्र. १६९	अन्येन्द्रवारुणी प्रोक्ता विशाला च महाफला। आत्मरक्षा चित्रफला त्रपुसी त्रपुसा च सा॥ श्वेतपुष्पी मृगाक्षी च मृगेर्वारुर्मृगादनी। हस्तिदन्ती नागदन्ती वारुणी गजचिर्भटा॥ वर्ग १ श्लो० २५०-२५२ पत्र.५८, ५९
शारिवा शारदी गोपी गोपवल्ली प्रतानिका। गोपकन्या लता सीता श्वेतोक्ता काष्ठशारिवा॥ पत्र. १७०	सारिवा शारदा गोपा गोपवल्ली प्रतानिका। गोपकन्या [10]लताऽऽस्फोता श्वेतोक्ता काष्ठ-सारिवा॥ वर्ग १ श्लो० १६१ पत्र. ३८

१. °चं मलिनं श्यामं ग. ङ. ॥ २. °कं चर्मपत्रकम् झ. ॥ ३. °कं वटिका-शिरः ख. ग. ॥ ४. कौल° ख. ग. ॥ ५. कणाग्रन्थि ग. ॥ ६. अश्वखुरः क. ज. ग. ॥ ७. कटभिः श्वे° क. ङ. ॥ ८. °पुष्पी क. ख. प. ढ. ॥ ९. गवादिनी क. ख. ग. ङ. ॥ १०. लताऽऽस्फोटा क. ॥

निघण्टुशेषटीका

शारिवाऽन्या कृष्णमूला कृष्णा चन्दनशारिवा ।
भद्रा चन्दनगोपी च चन्दना कृष्णवल्लयपि ॥
पत्र. १७०

मूर्वा मधुरसा देवी पृथक्त्वक् पीलुपर्ण्यपि ।
देवश्रेणी स्वादुरसा स्निग्धपर्णी च मोरटा ॥
पत्र. १७१

कलिकारी तु हलिनी विशल्या गर्भपातनी ।
लाङ्गल्यग्निमुखी सैरी दीप्ताऽनन्तेन्द्रपुष्पिका ॥
पत्र. १७२

गुडुच्यमृतवल्ली च छिन्ना छिन्नरुहाऽमृता ।
छिन्नोद्भवाऽमृतलता धरा वत्सादनी स्मृता ॥
सैवोक्ता सोमवल्ली च कुण्डली चक्रलक्षणा ।
जीवन्ती मधुपर्णी च तन्त्रिका देवनिर्मिता ॥
वयस्था कुण्डली सौम्या विशल्याऽमृतसम्भवा ।
पिण्डामृता बहुच्छिन्ना सा चोक्ता कन्दरोहिणी
रसायनी कृत्तरुहा स्वरदा ज्वरनाशनी ॥
पत्र. १७३

जीमूतको देवताडो वृत्तकोशो गरागरी ।
प्रोक्ताऽऽखुविषहा वेणी देवताडो च ताडकः ॥
पत्र. १७३

कोशातकी कृतच्छिद्रा जालिनी कृतवेधना ।
क्ष्वेडा सुतिक्ता घण्टाली मृदङ्गफलिका मता ॥
धामार्गवः कोशफलो राजकोशातकी तथा ।
कर्कोटकी पीतपुष्पी महाजालो तथोच्यते ॥
पत्र. १७४

क्षीरिणी काञ्चनक्षीरी पटुपर्णी च धर्षणी ।
तिक्तदुग्धा हैमवती हेमदुग्धा हिमावती ॥
स्वर्णक्षीरी स्वर्णदुग्धा सुवर्णक्षीरिकाऽपि च ।
हिमाह्वा कनकक्षीरी हेमक्षीरा च काञ्चनी ॥
पत्र. १७५

द्रवन्ती शम्बरी चित्रा न्यग्रोधी मूषकाह्वया ।
प्रत्यक्श्रेणी वृषा रण्डा पुत्रश्रेण्याखुपर्णिका ॥
पत्र. १७६

धन्वन्तरीयनिघण्टु

सारिवाऽन्या कृष्णमूली कृष्णा चन्दनसारिवा ।
भद्रा चन्दनगोपा तु चन्दना कृष्णवल्लयपि ॥
वर्ग १ श्लो० १६२ पत्र. ३८

मूर्वा मधुरसा देवी पृथक्पर्णी त्रिपर्ण्यपि ।
देवश्रेणी स्वादुरसा स्निग्धपर्णी च मोरटा ॥
वर्ग १ श्लो० १३ पत्र. ९

कलिकारी तु हलिनी विशल्या गर्भपातिनी ।
लाङ्गल्याऽग्निमुखी सीरी दीप्ता नक्तेन्दुपुष्पिका
वर्ग ४ श्लो०९ पत्र. १३५

गुडूच्यमृतवल्ली च छिन्ना छिन्नरुहाऽमृता ।
छिन्नोद्भवाऽमृतलता धारा वत्सादनी स्मृता ॥
सैवोक्ता सोमवल्ली च कुण्डली चक्रलक्षणा ।
प्रोक्ता रागकुमारी च च्छिन्नाङ्गी ज्वरनाशिनी ॥
जीवन्ती मधुपर्णी च तन्त्रिका देवनिर्मिता ।
वयस्था मण्डली सौम्या विशल्याऽमृतसम्भवा ॥
पिण्डामृता बहुच्छिन्ना सा चोक्ता कन्दरोहिणी ।
रसायनी मृत्तिका च चन्द्रहासा भिषग्जिता
कन्या कन्दोद्भवा कन्दाऽमृतकन्दा गुडूचिका ।
वर्ग १ श्लो० १–५ पत्र. ७–८

जीमूतको [1]देवताडो वृत्तकोशो गरागरी ।
प्रोक्ताऽऽखुविषहा वेणी देवदाली च ताडका ॥
वर्ग १ श्लो ४० पत्र. ७–८

कोशातकी कृतच्छिद्रा जालिनी कृतवेधनी ।
क्ष्वेडा सुतिक्ता घण्टाली मृदङ्गफलिका मता ॥
धामार्गवः कोशफला राजकोशातकी तथा ।
कर्कोटकी पीतपुष्पा महाजाली निरुच्यते ॥
वर्ग १ श्लो० १९२,१८९ पत्र. ४६–४५

क्षीरिणी काञ्चनक्षीरी कटुपर्णी च धर्षिणी ।
तिक्तदुग्धा हैमवती हेमदुग्धा हिमावती ॥
सर्वक्षीरी स्वर्णदुग्धा सुवर्णक्षीरिका[3]ऽपि च ।
[4]हेमाह्वा कनकक्षीरी हेमक्षीरी च काञ्चनी ॥
वर्ग १ श्लो० २४०,२४२ पत्र. ५६,५७

द्रवन्ती शम्बरी चित्रा न्यग्रोधा [5]मूषिकाह्वया ।
प्रत्यक्श्रेणी विषा चण्डा [6]पुत्रश्रेण्याखुपर्णिका ॥
वर्ग १ श्लो० २२९ पत्र. ५४

---

१. °ताङ्गो वृत्त° क. ताङ्गो गकोशा नागरा गिरा । प्रोक्ता ङ. च ॥
२. °तकी फला क. ख. ग. ङ. च. ॥ ३. °का मता हे° क. ङ. ॥ ४. हेमाङ्गा क. ॥
५. मूलका° ङ. ॥ ६. पुत्रश्रृङ्ग्याखु° क . घ. ङ. च ॥

निघण्टुशेषटीका

पद्मिनी स्यात् **पुटकिनी** नलिनी च कुमुद्वती ।
पलाशिनी पद्मवती वनखण्डं **स चाऽऽकरः** ॥
पत्र. १७६

बिसं मृणालं बिसिनी मृणा**ला** स्यान्मृणालिका ।
मृणा**लं पद्मनालं तु तन्तुलं** नलिनीरुहम् ॥
पत्र. १८०

पद्मकेसरमापीतं किञ्जल्कं किञ्जमेव च ।
मकरन्दं तथा तुङ्गं गौरं काञ्च**नमेव च** ॥
पत्र. १८०

पद्ममूलं तु शालूकं **शकलं** करहाटकम् ।
शालीनं पद्मकन्दं **तु** जलालूकं निगद्यते ॥
पत्र. १८०

पद्मबीजं तु **गालोड्यं पद्माह्वं** पद्मकर्कटी ।
पत्र. १८१

शतपुष्पा **मिसिर्घोषा शिफका** माधवी शिफा ।
अतिच्छत्रा त्ववाक्**पुष्पा** शताह्वा कारवी स्मृता॥
पत्र. १८२

कुञ्चिका चोपकुञ्ची च कालिका चोपकालिका ।
सुषवी कुञ्चिका कुञ्ची पृथ्वी **कृष्णे च जीरके**
पत्र. १८३

पलाण्डुर्यवनेष्टश्च सुकन्दो मुखदूषणः ।
हरणः
पत्र. १८४

हरणोऽन्यः पलाण्डु**स्तु** लताकौ **दुर्द्रुमश्च सः** ।
पत्र. १८४

सातला सप्तला सारी वि**पु**ला विमलाऽमला ।
बहुफेना चर्मक**सा** फेना दीप्ता **रसा**लिका ॥
पत्र. १८५

प्रसारणी सुप्रसरा सरणी सारणी च सा ।
चारुपर्णी राजबला भद्रपर्णी प्रतानिका ॥
पत्र. १८५

वृद्धदारक आवेगी जुङ्गको **जीर्णवालकः** ।
अन्तः कोटरपुष्पी स्यादजा**ण्डी छगलाण्ड्य**पि ।।
पत्र. १८७

धन्वन्तरीयनिघण्टु

पद्मिनी स्यात् **कुटपिनी** नलिनी च कुमुद्वती ।
पलाशिनी पद्मवती वन[1]खण्डा **सरोहारु** ॥
वर्ग ४ श्लो० १५७ पत्र. १६६

बिसं मृणालं बिसिनी मृणा**ली** स्यान्मृणालिका ।
मृणा**लकं पद्मनालं तण्डुलं** नलिनीरुहम् ॥
वर्ग ४ श्लो० १६१ पत्र. १६७

पद्मकेसरमापीतं किञ्जल्कं किञ्जमेव च ।
मकरन्दं तथा तुङ्गं गौरं काञ्च**नकं च तत्** ॥
वर्ग ४ श्लो० १६५ पत्र. १६७

पद्ममूलं तु शालूकं **सकलं** करहाटकम् ।
शालिनं पद्मकन्दं **च** जलालूकं निगद्यते ॥
वर्ग ४ श्लो० १६३ पत्र. १६७

पद्मबीजं तु **पद्माक्षं गालोड्यं** पद्मकर्कटी ।
वर्ग ४ श्लो० १५९ पत्र. १६६

शतपुष्पा मि[2]**शि**र्घोषा[3] **पीतिका** [4]माधवी शिफा ।
[4]अतिच्छत्रा त्ववाक्पुष**पी** शताह्वा कारवी स्मृता ॥
वर्ग २ श्लो०१ पत्र. ६९

उपकुं[5]ञ्चा चोपकुञ्ची कालिका चोपकालिका ।
सुषवी[6] कुञ्चिका कुञ्ची पृथ्वी**का स्थूलजीरकः**॥
वर्ग २ श्लो०५९ पत्र. ८१

पलाण्डुर्यवनेष्टश्च सुकन्दो मुखदू[7]षणः ।
वर्ग ४ श्लो०७१ पत्र. १४८

हरितोऽन्यः पलाण्डुश्च लताकौ [8]**दुद्रुमः स्मृतः**
वर्ग ४ श्लो०७१ **पत्र.** १४८

सातला सप्तला सारी विदुला [9]विमलाऽमला ।
बहुफेना चर्मक**षा** फेना दीप्ता **मरा**लिका ॥
वर्ग १ श्लो०२३८ **पत्र.** ५६

प्रसारणी सुप्रसरा सरणी सारणी च सा ।
चारुपर्णी राजबला भद्रपर्णी प्रतानिका ॥
वर्ग १ श्लो०२८९ पत्र. ६६

वृद्धदारुक आवेगी जुङ्गको[10] **दीर्घवालुकः** ।
वृद्धः कोटरपुष्पी स्यादजा**न्त्री छागलान्त्र्य**पि ॥
वर्ग ४ श्लो०१०७ पत्र. १५५

---

१. °खण्डं स चाकरः हैमनिघण्टुशेषटीकोद्धरणे । २. °षा पौतिका क; °षा पोतिका ग. ङ; °षा शाफिका ख ॥ ३. मागधी ग. ॥ ४. आहिच्छत्रा ह्यवाक् ° ख. ॥ ५. °कुञ्चीकोपकुञ्ची झ. ॥ ६. °वी कारवी कुञ्ची फ. ङ. ॥ ७. °दूषकः ग. घ. ॥ ८. दुद्रुमो मतः ग. ॥ ९. बिन्दुला च. १०. °कोजीर्णवालुकः ज. त. ॥

निघण्टुशेषटीका

सुवर्चलाऽऽदित्यकान्ता सूर्यभक्ता सुखोद्भवा ।
मण्डूकपर्णी मण्डूकी **बदरा**ऽऽदित्यवल्लयपि ॥
पत्र. १८७

भृङ्गराजो भृङ्गरजो मार्कवो भृङ्ग एव च ।
अङ्गारको भेकरजो भृङ्गारः केशरञ्जनः ॥
पत्र. १८८

कासमर्दोऽरिमर्दश्च कासारिः कर्कशस्तथा ।
काल कनक इत्युक्तः स च स्यात् कासमर्दकः ॥
पत्र. १८८

जीवन्ती जीवनीया च जीवनी जीववर्धनी ।
मङ्गल्यनामधेया च शाकश्रेष्ठा यशस्करी ॥
पत्र. १८९

क्षुद्राम्लिका तु चाङ्गेरी लोणिका चाम्ललोणिका ।
लोला **लोडा** चतुष्पर्णी सैवदन्तशठा मता ॥
पत्र. १९०

तण्डुलीयक उद्दिष्टश्चण्डाला तण्डुलेरकः ।
गण्डीरस्तण्डुली बीजो मेघनादो घनस्वनः ॥
पत्र. १९०

काकमाची ध्वाङ्क्षमाची **काकसाह्वा च** वायसी ।
कट्वी कटुफला चैव रसायनवरा स्मृता ॥
पत्र. १९१

शितिवारः सूचिपत्रः **शैल्या च** सुनिषण्णकः ।
श्रीवा**सक**ः शितिवरः स्वस्तिकः **कटुकः** शिखी ॥
पत्र. १९१

मूलकं हरिपर्णं च **बस्तिका** क्षारमेव च ।
नीलकन्दं महाकन्दं रुचिष्यं हस्तिदन्तकम् ॥
पत्र. १९२

चाणक्यमूलकं चन्यं **वा**लेयं मरुसम्भवम् ।
शालामर्कट**मिश्रं च** विष्णुगुप्तमनन्तकम् ॥
पत्र. १९२

धन्वन्तरीयनिघण्टु

सुवर्चलाऽऽदित्यकान्ता सूर्यभक्ता सुखोद्भवा ।
मण्डूकपर्णी मण्डूकी **वरदा**ऽऽ[1]दित्यवल्लयपि ॥
वर्ग ४ श्लो० ९८ पत्र. १५३

भृङ्गराजो भृङ्गरजो मार्कवो भृङ्ग एव च ।
भृङ्गारको भृङ्गरेणुर्भृङ्गारः केशरञ्जनः ॥
वर्ग ४ श्लो० ११ पत्र. १३६

कासमर्दोऽरिमर्दश्च कासारिः कर्कशस्तथा ।
[2]**कालः** कनक इत्युक्तः स च स्यात् कासमर्दकः ॥
वर्ग ४ श्लो० ११८ पत्र. १५७

जीवन्ती जीवनीया च जीवनी जीववर्धनी ।
माङ्गल्य[3]**नामधेया च** शाकश्रेष्ठा यशस्करी ॥
वर्ग १ श्लो० १४० पत्र. ३३

क्षुद्राम्लिका तु चाङ्गेरी [4]लोणिका चाम्ललोणिका ।
लोला **लोणा** चतुष्पर्णी सैव दन्तशठा मता ॥
वर्ग ५ श्लो० ३६ पत्र. १७५

तण्डुलीयक उदिष्ट**स्तण्डुल**स्तण्डु**लीयकः** ।
भण्डीरस्तण्डुली बीजो मेघनादो घनस्वनः ॥
वर्ग ४ श्लो० ११६ पत्र. १५७

काकमाची ध्वाङ्क्षमाची **काकाह्वा चैव** वायसी ।
कट्वी कटुफला चैव रसायनवरा स्मृता ॥
वर्ग ४ श्लो० २१ पत्र. १३८

शितिवारः सूचिपत्रः **सूच्याह्वः** सुनिषण्णकः ।
श्रीवा**रक**ः शितिवरः स्वस्तिकः **कुक्कुटः** शिखी ।
वर्ग १ श्लो० १५५ पत्र. ३६

मूलकं हरिपर्णं च **मृत्तिका** क्षारमेव च ।
नीलकन्दं महाकन्दं [5]रुचिष्यं हस्तिदन्तकम् ।
वर्ग ४ श्लो० ३३ पत्र १४०

चाणाक्यमूलकं चान्य**च्छा**लेयं मरुसम्भवम् ।
शालामर्कट**कं मिश्रं** विष्णुगु[6]प्तं **मतं तथा** ॥
वर्ग ४ श्लो० ३५ पत्र. १४१

---

१ °दित्यपर्ण्यपि क. ङ. ॥ २ °कालकण्टक इ° त. ॥ ३. °ल्यमागधेया च क. ङ. च. ॥ ४. °लोटिका क. ङ; °लोडिका झ. त. ॥ ५. रोचिष्यं ग. ॥ ६. °गुप्तं मलं तथा छ; °गुप्तसमं तथा ग. ।

निघण्टुशेषटीका

पटोलः कुलकः प्रोक्तः पाण्डु**रः** कर्कशच्छदः ।
राजीफलः पाण्डुफलो राज**मान्यो**ऽमृताफलः ॥
पत्र. १९४

कटुकाला**बुनी** तुम्बी लम्बा पिण्डफला **तथा** ।
इक्ष्वाकुः क्षत्रियवरा तिक्तबीजा महाफला ॥
पत्र. १९५

जीवकः शृङ्गकः **सर्जो** दीर्घायुः कूर्चशीर्षकः ।
ह्रस्वाङ्गो मधुरः स्वादुः प्राण**कश्चिरजीव्यपि** ॥
पत्र. १९६

मूलं पुष्करमूलं च पौष्करं पुष्कराह्वयम् ।
काश्मीरं पुष्करजटा वीरं **तत् पद्मवर्णकम्** ।
पत्र. १९६

अजगन्धा खर**पुष्पो** बस्तगन्धा **सुगन्धिका** ।
कबरी बर्बरी गन्धा तुङ्गी पूतिमयू**रकः** ॥
पत्र. १९७

बिम्बी रक्तफला तुण्डी **तुण्डके**रफला च सा ।
ओष्ठोपमफला गो**ल्हा** पीलुपर्णी च **तुण्डिका** ॥
पत्र. १९७

कत्तृणं **शकलं भूरि पूतीकं रौहिषं मतम्** ।
ध्यामकं श्यामकं पौरं **पुद्गलं देवजग्धकम्** ॥
पत्र. १९८

भू**रितृणो रौ**हिषो भू**रिः पूति**कोऽथ कुटुम्बकः ।
मालातृ**णश्च पालघ्नं छत्रकश्छत्रसंज्ञकः** ॥
पत्र. १९९

मृदुदर्भः कुशो बर्हिः **सूची वीरस्तु** पत्रकः ।
खरोऽन्यः पृथुलः **सीरी** गुन्द्राह्वो नीरजो **निशिः** ॥
पत्र. १९९

काशः काण्डेक्षुरुद्दिष्टः काकेक्षुर्वायसेक्षुकः ।
इक्ष्वा**रक इक्षुकाण्डः** स चैवेक्षुरकः स्मृतः ॥
पत्र, २००

धन्वन्तरीयनिघण्टु

पटोलः कुलकः प्रोक्तः पाण्डु**कः** कर्कशच्छदः ।
राजीफलः पाण्डुफलो राज**नामा**ऽमृताफलः ॥
वर्ग १ श्लो० ४९–५० पत्र. १७

कटुकाला**म्बुनी** तुम्बी लम्बा पिण्डफला **च सा** ।
इक्ष्वाकुः क्षत्रियवरा तिक्तबीजा महाफला ॥
वर्ग १ श्लो०१७० पत्र. ३९

जीवकः शृङ्गकः **क्षवेडो** दीर्घायुः कूर्चशीर्षकः ।
ह्रस्वाङ्गो मधुरः स्वादुः [1]प्राण**द्**क्षिरजीव्यपि ॥
वर्ग १ श्लो० १२३ पत्र. ३०

मूलं **पुष्कर**मूलं च पौष्करं पुष्कराह्वयम् ॥
काश्मीरं पुष्करजटा [2]वीरं **तत्फलपत्रकम्** ॥
वर्ग. १ श्लो० ६६ पत्र. १९

अजगन्धा खर**पुष्पा** बस्तगन्धा **विगन्धिका** ।
कारवी[3] बर्बरा गन्धा तुङ्गी पूतिमयू**रिका** ॥
वर्ग१ श्लो० १०० पत्र. ९०

बिम्बी रक्तफला **तुण्डी तुण्डिके**[4]**रफला** च सा
ओष्ठोपमफला[5] गो**ह्ला** पीलुपर्णी च तुण्डिका ॥
वर्ग १ श्लो० २०२ पत्र. ४८

कत्तृणं सकलं भूतिर्भूतिदं रोहिषं तृणम् ।
ध्यामकं श्यामकं पौरं **पाटलं** [6]**देवदंशकम्** ॥
वर्ग ४ श्लो० ८० पत्र. २१

भू**तृणो रो**हिषो **भूतिर्भूति**कोऽथ कुटुम्बकः ।
मालातृणः प्रलम्बश्च च्छत्रोऽतिच्छत्रक-
स्तथा ॥
वर्ग ४ श्लो० ४७ पत्र. १४३

मृदुदर्भः कुशो बर्हिः [7]**शुचिचीरः सु**वृत्तकः ।
[8]खरोऽन्यः पृथुलः **शीरी** गुन्द्रा **च** नीरजः
स्मृतः ॥
वर्ग ४ श्लो० १३३ पत्र. १६१

काशः काण्डेक्षुरुद्दिष्टः काकेक्षुर्वायसेक्षुकः ।
इक्ष्वा**रिकेक्षुकाण्डश्च** स चैवेक्षुरकः स्मृतः ॥
वर्ग ४ श्लो० १३० पत्र. १६०

---

१. **प्राणदः क्षीर**° च. ॥ २. **चिरं** झ. ॥ ३. °**वी तूग्रगन्धा च तुङ्गी** ङ ॥ ४. °**केशफला** क. च. ङ. ॥ ५. °**फला कोष्णा** क. ङ; °**फला कोह्ला** ख. च. ॥ ६. **देव-दण्डकम्** क. च. ॥ ७. **शुचिवीरोऽथ वृत्तकः** । क. ख. ङ. ॥ ८. **स चान्यः पृ**° ङ. छ ॥

निघण्टुशेषटीका

नलो नडो नटश्चैव स च पोटगलः स्मृतः ।
धमनो नर्त्तको रन्ध्री शून्यमध्यो विभीषणः ॥
पत्र. २०१

शरो बाण **इक्षु**काण्डः **इक्ष्वटः** सायकः क्षुरः ।
स्थूलोऽन्य इक्षुरः प्रोक्त **इक्ष्वारश्च पिता महः** ॥
पत्र. २०२

नीलो दूर्वा स्मृता **शस्या** शाद्वलं हरितं तथा ।
शतपर्वा शीतवीर्या **शीतवल्ल्यसिता लता** ॥
पत्र. २०३-४

श्वेतदूर्वा तु गोलोमी श्वेतद**ण्डी** सिता लता ।
सहस्रवीर्याऽनन्ता च दुर्मरा भार्गवी रुहा ॥
पत्र. २०४

गण्डदूर्वा **तु** गण्डाली तीव्रा मत्स्याक्षिकाऽपि च ।
वल्ली नाडी कलाय**श्च धारणी** शकुलाक्षिका ॥
पत्र. २०४

मुस्तमम्बुधरो मेघो घनो राजक**शेरु**कः ।
भद्रमुस्तो वराहो**ष्ट्रो** गाङ्गेयः कुरुविन्दकः ॥
पत्र. २०५

परिपेलं प्लवं वन्यं गोपुरं स्यात् कुटन्नटम् ।
शतपुष्पं दा**श**पुरं गोनर्दं जीर्ण**बुध्न**कम् ॥
पत्र. २०५

उशीरं च मृणालं स्यादभयं समगन्धिकम् ।
रणप्रियं वीरतरं वीरं वीरणमूलकम् ॥
पत्र. २०६

लामज्जकं सुनालं स्यादमृणालं **लयं** लघु ।
इष्टकापथकं **शीतवीर्यं** मूलं जलाशयम् ॥
पत्र. २०७

राजक्षवक **इत्यन्यो** राजिका कृष्णसर्ष**पः** ।
क्षुताभिजननश्चैव स चोक्तो राजसर्षपः ॥
पत्र. २१८

असुरी राजिका राजी कृ**ष्णि**का रक्तसर्षपः ।
तीक्ष्णगन्धा चातितीक्ष्णा क्षु**र**कः क्षु**व**कः क्षवः ॥
पत्र. २१८

धन्वन्तरीयनिघण्टु

नडो नटो नलश्चैव स च पोटगलः स्मृतः ।
धमनो नर्तको रन्ध्री शून्यमध्यो विभीषणः ॥
वर्ग ४ श्लो० १४१ पत्र. १६२

शरो बाण **इषुः काण्ड उत्कटः** सायकः क्षुरः ।
स्थूलोऽन्य इक्षु**कः** प्रोक्त **इक्षुरश्चापि नामतः** ।
वर्ग ४ श्लो० १३५ पत्र. १६१

नील**दूर्वा** स्मृता **शष्पं** [1]शाद्वलं हरितं तथा ।
शतपर्वा शीतवीर्या **शतव**[2]**ल्ल्यपि शीतला** ॥
वर्ग ४ श्लो० १४३ पत्र. १६३

श्वेतदूर्वा तु गोलोमी श्वेतद**ण्डा** [3]सिता लता ।
सहस्रवीर्याऽनन्ता च दुर्मरा भार्गवी रुहा ॥
वर्ग ४ श्लो० १४४ पत्र. १६३

गण्डदूर्वा **च** गण्डाली तीव्रा मत्स्याक्षिकाऽपि च ।
[4]**बह्वी** नाडी कला**पश्च वारुणी** शकुलाक्षिका ॥
वर्ग ४ श्लो० १४५ पत्र. १६३

[5]**मुस्ता चा**म्बुधरो मेघो घनो राजक**सेरु**कः ।
भद्रमुस्तो वराहोऽब्दो गाङ्गेयः कुरुविन्दकः ॥
वर्ग १ श्लो० ४० पत्र. १५

परिपेलं प्लवं वन्यं गोपुरं स्यात् कुटन्नटम् ।
सितपुष्पं दा**स**पुरं गोनर्दं जीर्ण**पुष्प**कम् ॥
वर्ग ३ श्लो० ५५ पत्र. १०७

उशीरं च मृणालं स्यादभयं समगन्धिकम् ।
रणप्रियं वीरतरं वीरं वीरणमूलकम् ॥
वर्ग ३ श्लो० १४ पत्र. ९६

लामज्जकं सुनालं स्यादमृणालं **लवं** लघु ।
इष्टकापथकं **शीघ्रं दीर्घ**मूलं जलाश्रयम् ॥
वर्ग ३ श्लो० ८६ पत्र. ११३

राजक्षवक **इत्युक्ता** राजिका कृष्णसर्ष**पा** ।
क्षुधाभिजनका चैव सा चोक्ता राजसर्षपः ॥
वर्ग ४ श्लो० ४३ पत्र १४३

आसुरी राजिका राजी कृ**ष्ण**का रक्तसर्षपः ।
तीक्ष्णगन्धा चातितीक्ष्णा क्षु**व**कः क्षवकः क्षवः ॥
वर्ग ४ श्लो० ६० पत्र. १४६

---

१. **शाद्वलं** क. ग. घ. ङ. छ. ण. त. ॥ २. °**वल्ली च शीतला** क. ॥ ३. **शिता** क. ख. ग. ङ. ॥ ४. **बाह्ली** ण. ॥ ५. **मुस्तमम्बुधरो** ग. ङ. च. छ ॥